श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये उत्तरस्थानम्।

प्रथमः+अध्यायः।

अथ+अतः+ बालोपचरणीयम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

जातमात्रं विशोध्य+उल्बाद्बालं सैन्धवसर्पिषा।

प्रसूतिक्लेशितं च+अनु बलातैलेन सेचयेत्॥1॥

अश्मनोः+वादनं च+अस्य कर्णमूले समाचरेत्।

अथ+अस्य दक्षिणे कर्णे मन्त्रम्+उच्चारयेत्+इमम्॥2॥

"अङ्गात्+अङ्गात्+सम्भवसि हृदयात्+अभिजायसे।

आत्मा वै पुत्रनामासि सञ्जीव शरदां शतम्॥3॥

शतायुः शतवर्षः+असि दीर्घम्+आयुः+अवाप्नुहि।

नक्षत्राणि दिशः+ रात्रिः+अहः+च त्वां+अभिरक्षतु"॥4॥

स्वस्थीभूतस्य नाभिं च सूत्रेण चतुरङ्गुलात्।

बद्धोर्ध्वं वर्धयित्वा च ग्रीवायाम्+अवसञ्जयेत्॥5॥

नाभिं च कुष्टतैलेन सेचयेत्+स्नापयेत्+अनु।

क्षीरिवृक्षकषायेण सर्वगन्धोदकेन वा॥6॥

कोष्णेन तप्तरजततपनीयनिमज्जनैः।

ततः+ दक्षिणतर्जन्या तालु+उन्नम्य+अवगुण्ठयेत्॥7॥

शिरसि स्नेहपिचुना, प्राश्यं च+अस्य प्रयोजयेत्।

हरेणुमात्रं मेधायुः+बलार्थम्+अभिमन्त्रितम्॥8॥

ऐन्द्रीब्राह्मीवचाशङ्खपुष्पीकल्कं घृतं मधु।

चामीकरवचाब्राह्मीताप्यपथ्या रजीकृताः॥9॥

लिह्यात्+मधुघृतोपेता हेमधात्रीरजः+अथवा।

गर्भाम्भः सैन्धववता सर्पिषा वामयेत्+ततः॥10॥

प्राजापत्येन विधिना जातकर्माणि कारयेत्।

सिराणां हृदयस्थानां विवृतत्वात् प्रसूतितः॥11॥

तृतीये+अह्नि चतुर्थे वा स्त्रीणा स्तन्यं प्रवर्तते।

प्रथमे दिवसे तस्मात्+त्रिकालं मधुसर्पिषी॥12॥

अनन्तामिश्रिते मन्त्रपाविते प्राशयेत्+शिशुम्।

द्वितीये लक्ष्मणासिद्धं तृतीये च घृतं, ततः॥13॥

प्राङ्निषिद्धस्तनस्य+अस्य तत्+पाणितलसम्मितम्।

स्तन्यानुपानं द्वौ कालौ नवनीतं प्रयोजयेत्॥14॥

मातुः+एव पिबेत्+स्तन्यं तत्+हि+अलं देहवृद्धये।
स्तन्यधात्र्यौ+उभे कार्ये तत्+असम्पदि वत्सले॥15॥
अव्यङ्गे ब्रह्मचारिण्यौ वर्णप्रकृतितः समे।
नीरजे मध्यवयसौ जीवत्+वत्से न लोलुपे॥16॥
हिताहारविहारेण यत्नात्+उपचरेत्+च ते।
शुक्क्रोधलङ्घनायासाः स्तन्यनाशस्य हेतवः॥17॥
स्तन्यस्य सीधुवर्ज्यानि मद्यानि+आनूपजा रसाः।
क्षीरं क्षीरिण्य ओषध्यः शोकादेः+च विपर्ययः॥18॥
विरुद्धाहारभुक्तायाः क्षुधिताया विचेतसः।
प्रदुष्टधातोर्गर्भिण्याः स्तन्यं रोगकरं शिशोः॥19॥
स्तन्याभावे पयः+छागं गव्यं वा तद्गुणं पिबेत्।
ह्रस्वेन पञ्चमूलेन स्थिराभ्यां वा सितायुतम्॥20॥
षष्ठीं निशां विशेषेण कृतरक्षाबलिक्रियाः।
जागृयुःन+बान्धवाः+तस्य दधतः परमां मुदम्॥21॥
दशमे दिवसे पूर्णे विधिभिः स्वकुलोचितैः।
कारयेत्+सूतिकोत्थानं नाम बालस्य च+अर्चितम्॥22॥
बिभ्रतः+अङ्गैः+मनोह्वालरोचनागुरुचन्दनम्।
नक्षत्रदेवतायुक्तं बान्धवं वा समाक्षरम्॥23॥
ततः प्रकृतिभेदोक्तरूपैः+आयुः परीक्षणम्।
प्राक्+उदक्शिरसः कुर्यात् बालस्य ज्ञानवान् भिषक्॥24॥
शुचिधौतोपधानानि निर्वलीनि मृदूनि च।
शय्यास्तरणवासांसि रक्षोघ्नैः+धूपितानि च॥25॥
काकः+ विशस्तः शस्तः+च धूपने त्रिवृतान्वितः।
जीवत्+खड्गादिशृङ्गोत्थान् सदा बालः शुभान् मणीन्॥26॥
धारयेत्+औषधीः श्रेष्ठा ब्राह्यैन्द्रीजीवकादिकाः।
हस्ताभ्यां ग्रीवया मूर्ध्ना विशेषात्+सततं वचाम्॥27॥
आयुर्मेधास्मृतिस्वास्थ्यकरीं रक्षोभिः+अक्षिणीम्।
षट्सप्ताष्टममासेषु नीरुजस्य शुभे+अहनि॥28॥
कर्णौ हिमागमे विध्येत्+धात्र्यङ्कस्थस्य सान्त्वयन्।
प्राग्दक्षिणं कुमारस्य भिषग्वामं तु योषितः॥29॥
दक्षिणेन दधत्+सूचीं पालिम्+अन्येन पाणिना।
मध्यतः कर्णपीठस्य किञ्चित्+गण्डाश्रयं प्रति॥30॥

जरायुमात्रप्रच्छन्ने रविरश्म्यवभासिते।
घृतस्य निर्चलं सम्यक्+अलक्तकरसाङ्किते॥31॥
विध्येत्+दैवकृते छिद्रे सकृत्+एव+ऋजु लाघवात्।
न+ऊर्ध्वं न पार्श्वतः+ नाधः शिराः+तत्र हि संश्रिताः॥32॥
कालिकामर्मरीरक्ताः तद्व्यधाद्रागरुग्ज्वराः।
सशोफदाहसंरम्भमन्यास्तम्भापतानकाः॥33॥
तेषां यथामयं कुर्यात्+विभज्य+आशु चिकित्सितम्।
स्थाने व्यधात्+न रुधिरं न रुग्रागादिसम्भवः॥34॥
स्नेहाक्तं सूच्यनुस्यूतं सूत्रं च+अनु निधापयेत्।
आमतैलेन सिञ्चेत्+च बहला तद्वत्+आरया॥35॥
विध्येत्+पालीं हितभुजः सञ्चार्या+अथ स्थवीयसी।
वर्तिः+त्र्यहात्+ततः+ रूढं वर्धयेत शनैः शनैः॥36॥
अथ+एनं जातदशनं क्रमेण+अपनयेत्+स्तनात्।
पूर्वोक्तं योजयेत्+क्षीरम्+अन्नं च लघु बृंहणम्॥37॥
प्रियालमज्जमधुकमधुलाजसितोपलैः।
अपस्तनस्य संयोज्यः प्रीणनः+ मोदकः शिशोः॥38॥
दीपनः+ बालबिल्वैलाशर्करालाजसक्तुभिः।
सङ्ग्रही धातुकीपुष्पशर्करालाजतर्पणैः॥39॥
रोगान्+च+अस्य जयेत्+सौम्यैः+भेषजैः+अविषादकैः।
अन्यत्र+अत्ययिकात्+व्याधेः+विरेकं सुतरां त्यजेत्॥40॥
त्रासयेत्+न+अविधेयं तं त्रस्तं गृह्णन्ति हि ग्रहाः।
वस्त्रवातात् परस्पर्शात् पालयेत्+लङ्घनात्+च तम्॥41॥
ब्राह्मीसिद्धार्थकवचासारिवाकुष्ठसैन्धवैः।
सकणैः साधितं पीतं वाङ्मेधास्मृतिकृत्+ घृतम्॥42॥
आयुष्यं पाप्मरक्षोघ्नं भूतोन्मादनिबर्हणम्।
वचेन्दुलेखामण्डूकीशङ्खपुष्पीशतावरीः॥43॥
ब्रह्मसोमामृताब्राह्मीः कल्कीकृत्य पलांशिकाः।
अष्टाङ्गं विपचेत्+सर्पिः प्रस्थं क्षीरचतुर्गुणम्॥44॥
तत्+पीतं धन्यम्+आयुष्यं वाङ्मेधास्मृतिबुद्धिकृत्।
अजाक्षीराभयाव्योषपाठोग्राशिग्रुसैन्धवैः॥45॥
सिद्धं सारस्वतं सर्पिर्वाङ्मेधास्मृतिवह्निकृत्।
वचामृताशठीपथ्याशङ्खिनीवेल्लनागरैः॥46॥

अपामार्गेण च घृतं साधितं पूर्ववद्गुणैः।
हेम श्वेतवचा कुष्ठम्+अर्कपुष्पी सकाञ्चना॥47॥
हेम मत्स्याक्षकः शङ्खः कैडर्यः कनकं वचा।
चत्वारः+ एते पादोक्ताः प्राशा मधुघृतप्लुताः॥48॥
वर्षं लीढां वपुः+मेधाबलवर्णकराः शुभाः।
वचायष्ट्याह्वसिन्धूत्थपथ्यानागरदीप्यकैः॥49॥
शुद्ध्यते वाग्घविः+लीढैः सकुष्ठकणजीरकैः॥49 1/2॥
इत श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने बालोपचरणीयः+ नाम प्रथमः+अध्यायः॥1॥
द्वितीयः+अध्यायः।
अथ+अतः+ बालामयप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥
त्रिविधः कथितः+ बालः क्षीरान्नोभयवर्तनः।
स्वास्थ्यं ताभ्याम्+अदुष्टाभ्यां दुष्टाभ्यां रोगसम्भवः॥1॥
यत्+अद्भिः+एकतां याति न च दोषैः+अधिष्ठितम्।
तत्+विशुद्धं पयः+ वातात्+दुष्टं तु प्लवते+अम्भसि॥2॥
कषायं फेनिलं रूक्षं वर्चोमूत्रविबन्धकृत्।
पित्तात्+उष्णाम्लकटुतं पीतराज्यप्सु दाहकृत्॥3॥
कफात्+सलवणं सान्द्रं जले मज्जति पिच्छिलम्।
संसृष्टलिङ्गं संसर्गात्+त्रिलिङ्गं सान्निपातिकम्॥4॥
यथा+स्वलिङ्गान्+तत्+व्याधीन् जनयति+उपयोजितम्।
शिशोः+तीक्ष्णम्+अभीक्ष्णं च रोदनात्+लक्षयेत्+रुतम्॥5॥
सः+ यं स्पृशेत्+भृशं देशं यत्र च स्पर्शनाक्षमः।
तत्र विद्यात्+रुजं मूर्ध्नि रुजं च+अक्षिनिमीलनात्॥6॥
हृदि जिह्वौष्ठदशश्वासमुष्टिनिपीडनैः।
कोष्ठे विबन्धवमथुस्तनदशान्त्रकूजनैः॥7॥
आध्मानपृष्ठनमनजठरोन्नमनैः+अपि।
बस्तौ गुह्ये च विण्मूत्रसङ्गोत्त्रासदिगीक्षणैः॥8॥
अथ धात्र्याः क्रियां कुर्यात्+यथादोषं यथामयम्।
तत्र वातात्मके स्तन्ये दशमूलं त्र्यहं पिबेत्॥9॥
अथवा+अग्निवचापाठाकटुकाकुष्ठदीप्यकम्।
सभार्गीदारुसरलवृश्चिकालीकणोषणम्॥10॥

ततः पिबेत्+अन्यतमं वातव्याधिहरं घृतम्।
अनु च+अच्छसुराम्+एव स्निग्धां मृदु विरेचयेत्॥11॥
बस्तिकर्म ततः कुर्यात्+स्वेदादीन्+च+अनिलापहान्।
रास्नाजमोदासरलदेवदारुरजोन्वितम्॥12॥
बालः+ लिह्यात्+ घृतं तैः+वा विपक्वं ससितोपलम्।
पित्तदुष्टे+अमृताभीरुपटोलीनिम्बचन्दनम्॥13॥
धात्री कुमारः+च पिबेत् क्वाथयित्वा ससारिवम्।
अथवा त्रिफलामुस्तभूनिम्बकटुरोहिणीः॥14॥
सारिवादिं पटोलादिं पद्मकादिं तथा गणम्।
घृतानि+एभिः+च सिद्धानि पित्तघ्नं च विरेचनम्॥15॥
शीतान्+च+अभ्यङ्गलेपादीन् युञ्ज्यात् श्लेष्मात्मके पुनः।
यष्ट्याह्वसैन्धवयुतं कुमारं पाययेत्+ घृतम्॥16॥
सिन्धूत्थपिप्पलीमत्+वा, पिष्टैः क्षौद्रयुतैः+अथ।
राठपुष्पैः स्तनौ लिम्पेत्+शिशोः+च दशनच्छदौ॥17॥
सुखम्+एवं वमेत्+बालः तीक्ष्णैः+धात्रीं तु वामयेत्।
अथ+आचरितसंसर्गी मुस्तादिं क्वथितं पिबेत्॥18॥
तद्वत्+तगरपृथ्वीकासुरदारुकलिङ्गकान्।
अथवा+अतिविषामुस्तषड्ग्रन्थापञ्चकोलकम्॥19॥
स्तन्ये त्रिदोषमलिने दुर्गन्ध्यामं जलोपमम्।
विबद्धम्+अच्छं विच्छिन्नं फेनिलं च+उपवेश्यते॥20॥
शकृन्नानाव्यथावर्णं, मूत्रं पीतं सितं घनम्।
ज्वरारोचकतृट्छर्दिशुष्कोद्गारविजृम्भिकाः॥21॥
अङ्गभङ्गः+अङ्गविक्षेपः कूजनं वेपथुः+भ्रमः।
घ्राणाक्षिमुखपाकाद्या जायन्ते+अन्ये+अपि तं गदम्॥22॥
क्षीरालसकम्+इति+आहुः+अत्ययं च+अतिदारुणम्।
तत्र+आशु धात्रीं बालं च वमनेन+उपपादयेत्॥33॥
विहितायां च संसर्ग्यां वचादिं योजयेत्+गणम्।
निशादिं वा+अथवा माद्रीपाठातिक्ताघनामयान्॥24॥
पाठाशुण्ठ्यमृतातिक्ततिक्तादेवाह्वसारिवाः।
समुस्तमूर्वेन्द्रयवाः स्तन्यदेषहराः परम्॥25॥
अनुबन्धे यथाव्याधि प्रतिकुर्वीतं कालवित्।
दन्तोद्भेदः+च रोगाणां सर्वेषाम्+अपि कारणम्॥26॥

विशेषात्+ज्वरविड्भेदकासच्छर्दिशिरोरुजाम्।
अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते॥27॥
पृष्ठभङ्गे बिडालानां बर्हिणां च शिखोद्गमे।
दन्तोद्भेदे च बालानां न हि किञ्चित्+न दूयते॥28॥
यथादोषं यथारोगं यथोद्रेकं यथाभयम्।
विभज्य देशकालादीन्+तत्र योज्यं भिषग्जितम्॥29॥
त एवं दोषा दूष्याः+च ज्वराद्या व्याधयः+च यत्।
अतः+तत्+एव भैषज्यं मात्रा तु+अस्य कनीयसी॥30॥
सौकुमार्याल्पकायत्वात् सर्वान्नान्+उपसेवनात्।
स्निग्धा एव सदा बाला घृतक्षीरनिषेवणान्॥31॥
सद्यः+तान् वमनं तस्मात् पाययेत्+मतिमान् मृदु।
स्तन्यस्य तृप्तं वमयेत् क्षीरक्षीरान्नसेविनम्॥32॥
पीतवन्तं तनुं पेयाम्+अन्नादं घृतसंयुताम्।
बस्ति साध्ये विरेकेण, मर्शेन प्रतिमर्शनम्॥33॥
युञ्ज्यात्+विरेचनादीन्+तु धात्र्या एव यथा+उदितान्।
मूर्वाव्योषवराकोलजम्बूत्वक्दारुसर्षपाः॥34॥
सपाठा मधुना लीढाः स्तन्यदोषहराः परम्।
दन्तपालीं समधुना चूर्णेन प्रतिसारयेत्॥35॥
पिप्पल्या धातकीपुष्पधात्रीफलकृतेन वा।
लावतित्तिरिवल्लूररजः पुष्परसद्रुतम्॥36॥
द्रुतं करोति बालानां दन्तकेसरवत्+मुखम्।
वचाद्विबृहतीपाठाकटुकातिविषाघनैः॥37॥
मधुरैः+च घृतं सिद्धं सिद्धं दशनजन्मनि।
रजनीदारुसरलश्रेयसीबृहतीद्वयम्॥38॥
पृश्निपर्णी शताह्वा च लीढं माक्षिकसर्पिषा।
ग्रहणीदीपनं श्रेष्ठं मारुतस्य+अनुलोमनम्॥39॥
अतीसारज्वरश्वासकामलापाण्डुकासनुत्।
बालस्य सर्वरोगेषु पूजितं बलवर्णदम्॥40॥
समङ्गाधातकीरोध्रकुटन्नटबलाद्वयैः।
महासहाक्षुद्रसहामुद्गबिल्वशलाटुभिः॥41॥
सकार्पासीफलैः+तोये साधितैः साधितं घृतम्।
क्षीरमस्तुयुतं हन्ति शीघ्रं दन्तोद्भवोद्भवान्॥42॥

विविधान्+आमयान्+एतत्+वृद्धकाश्यपनिर्मितम्।
दन्तोद्भवेषु रोगेषु न बालम्+अतियन्त्रयेत्॥43॥
स्वयम्+अपि+उपशाम्यन्ति जातदन्तस्य यत्+गदाः।
अत्यहःस्वप्नशीताम्बुश्लैष्मिकस्तन्यसेविनः॥44॥
शिशोः कफेन रुद्धेषु स्रोतःसु रसवाहिषु।
अरोचकः प्रतिश्यायः+ ज्वरः कासः+च जायते॥45॥
कुमारः शुष्यति ततः स्निग्धशुक्लमुखेक्षणः।
सैन्धवव्योषशार्ङ्गेष्टापाठागिरिकदम्बकान्॥46॥
शुष्यतः+ मधुसर्पिर्भ्याम्+अरुच्यादिषु योजयेत्।
अशोकरोहिणीयुक्तं पञ्चकोलं च चूर्णितम्॥47॥
बदरीधातकीधात्रीचूर्णं वा सर्पिषा द्रुतम्।
स्थिरावचाद्विबृहतीकाकोलीपिप्पलीनतैः॥48॥
निचुलोत्पलवर्षाभूभार्गीमुस्तैः+च कार्षिकैः।
सिद्धं प्रस्थार्धम्+आज्यस्य स्रोतसां शोधनं परम्॥49॥
सिंह्यश्वगन्धासुरसाकणागर्भं च तद्गुणम्।
यष्ट्याह्वपिप्पलीरोध्रपद्मकोत्पलचन्दनैः॥50॥
तालीससारिवाभ्यां च साधितं शोषजित्+घृतम्।
शृङ्गीमधूलिकाभार्गीपिप्पलीदेवदारुभिः॥51॥
अश्वगन्धाद्विकाकोलीरास्नर्षभकजीवकैः।
शूर्पपर्णीविडङ्गैः+च कल्कितैः साधितं घृतम्॥52॥
शशोत्तमाङ्गनिर्यूहे शुष्यतः पुष्टिकृत्+परम्।
वचावयःस्थातगरकायस्थाचोरकैः शृतम्॥53॥
बस्तमूत्रसुराभ्यां च तैलम्+अभ्यञ्जने हितम्।
लाक्षारससमं तैलप्रस्थं मस्तु चतुर्गुणम्॥54॥
अश्वगन्धानिशादारुकौन्तीकुष्ठाब्दचन्दनैः।
समूर्वारोहिणीरास्नाशताह्वामधुकैः समैः॥55॥
सिद्धं लाक्षादिकं नाम तैलम्+अभ्यञ्जनात्+इदम्।
बल्यं ज्वरक्षयोन्मादश्वासापस्मारवातनुत्॥56॥
यक्षराक्षसभूतघ्नं गर्भिणीनां च शस्यते।
मधुना+अतिविषाशृङ्गीपिप्पलीः+लेहयेत्+शिशुम्॥57॥
एकां वा+अतिविषां कासज्वरच्छर्दिरुपद्रुतम्।
पीतं पीतं वमति यः स्तन्यं तं मधुसर्पिषा॥58॥

द्विवार्ताकीफलरसं पञ्चकोलं च लेहयेत्।
पिप्पलीपञ्चलवणं कृमिजित्पारिभद्रकम्॥59॥
तद्वत्+लिह्यात्+तथा व्योषं मषीं वा रोमचर्मणाम्।
लाभतः शल्यकश्वाविद्गोधर्क्षशिखिजन्मनाम्॥60॥
खदिरार्जुनतालीसकुष्ठचन्दनजे रसे।
सक्षीरं साधितं सर्पिः+वमथुं विनियच्छति॥61॥
[हनुमूलगतः+ वायुर्दन्तदेशास्थिगोचरः।
यदा शिशोः प्रकुपितः+ नोत्तिष्ठन्ति तदा द्विजाः॥1॥
रूक्षाशिनः+ वातिकस्य चालयति+अनिलः शिराः।
हन्वाश्रयाः प्रसुप्तस्य दन्तैः शब्दं करोति+अतः॥2॥]
सदन्तः+ जायते यः+तु दन्ताः प्राक्+यस्य च+उत्तराः।
कुर्वीत तस्मिन्+उत्पाते शान्तिं तं च द्विजातये॥62॥
दद्यात्+सदक्षिणं बालं नैगमेषं च पूजयेत्।
तालुमांसे कफः क्रुद्धः कुरुते तालुकण्टकम्॥63॥
तेन तालुप्रदेशस्य निम्नता मूर्ध्नि जायते।
तालुपातः स्तनद्वेषः कृच्छ्रात्+पानं शकृद्द्रवम्॥64॥
तृडास्यकण्ड्वक्षिरुजा ग्रीवादुर्धरता वमिः।
तत्र+उत्क्षिप्य यवक्षारक्षौद्राभ्यां प्रतिसारयेत्॥65॥
तालु तद्वत्+कणाशुण्ठीगोशकृद्रससैन्धवैः।
शृङ्गबेरनिशाभृङ्गं कल्कितं वटपल्लवैः॥66॥
बध्वा गोशकृता लिप्तं कुकूले स्वेदयेत्+ततः।
रसेन लिम्पेत्+ताल्वास्यं नेत्रे च परिषेचयेत्॥67॥
हरीतकीवचाकुष्ठकल्कं माक्षिकसंयुतम्।
पीत्वा कुमारः स्तन्येन मुच्यते तालुकण्टकात्॥68॥
मलोपलेपात्+स्वेदात्+वा गुदे रक्तकफोद्भवः।
ताम्रः+ व्रणः+अन्तः कण्डूमान् जायते भूर्युपद्रवः॥69॥
केचित्+तं मातृकादोषं वदन्ति+अन्ये+अहिपूतनम्।
पृष्टारुर्गुदकुट्टं च केचित्+च तम्+अनामिकम्॥70॥
तत्र धात्र्याः पयः शोध्यं पित्तश्लेष्महरौषधैः।
शृतशीतं च शीताम्बुयुक्तम्+अन्तरपानकम्॥71॥
सक्षौद्रतार्क्ष्यशैलेन व्रणं तेन च लेपयेत्।
त्रिफलाबदरीप्लक्षत्वक्क्वाथपरिषेचितम्॥72॥

कासीसरोचनातुत्थमनोह्वालरसाञ्जनैः।
लेपयेत्+अम्लपिष्टैः+वा चूर्णितैः+वा+अवचूर्णयेत्॥73॥
सुश्लक्ष्णैः+अथवा यष्टीशङ्खसौवीरकाञ्जनैः।
सारिवाशङ्खनाभिभ्याम्+असनस्य त्वचा+अथवा॥74॥
रागकण्डूत्कटे कुर्यात्+रक्तस्रावं जलौकसा।
सर्वं च पित्तव्रणजित्+शस्यते गुदकुट्टके॥75॥
पाठावेल्लद्विरजनीमुस्तभार्गीपुनर्नवैः।
सबिल्वत्र्यूषणैः सर्पिः+वृश्चिकालीयुतैः शृतम्॥76॥
लिहानः+ मात्रया रोगैः+मुच्यते मृत्तिकोद्भवैः।
व्याधेः+यत्+यस्य भैषज्यं स्तनः+तेन प्रलेपितः।
स्थितः+ मुहूर्त्तं धौतः+अनु पीतः+तं तं जयेत्+गदम्॥77॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने बालामयप्रतिषेधः+ नाम द्वितीयः+अध्यायः॥2॥
तृतीयः+अध्यायः।
अथ+अतः+ बलाग्रहप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पुरा गुहस्य रक्षार्थं निर्मिताः शूलपाणिना।
मनुष्यविग्रहाः पञ्च सप्त स्त्रीविग्रहा ग्रहाः॥1॥
स्कन्दः+ विशाखः+ मेषाख्यः श्वग्रहः पितृसंज्ञितः।
शकुनिः पूतना शीतपूतना+अदृष्टिपूतना॥2॥
मुखमण्डितिका तद्वत्+रेवती शुष्करेवती।
तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः॥3॥
सामान्यं रूपम्+उत्त्रासजृम्भाभ्रूक्षेपदीनताः।
फेनस्रावोर्ध्वदृष्ट्योष्ठदन्तदंशप्रजागराः॥4॥
रोदनं कूजनं स्तन्यविद्वेषः स्वरवैकृतम्।
नखैः+अकस्मात्+परितः स्वधात्र्यङ्गविलेखनम्॥5॥
तत्र+एकनयनस्रावी शिरः+ विक्षिपते मुहुः।
हतैकपक्षः स्तब्धाङ्गः सस्वेदः+ नतकन्धरः॥6॥
दन्तखादी स्तनद्वेषी त्रस्यन् रोदिति विस्वरम्।
वक्रवक्त्रः+ वमन् लालां भृशम्+ऊर्ध्वं निरीक्षते॥7॥
वसासृग्गन्धिरुद्विग्नः+ बद्धमुष्टिशकृत्+शिशुः।
चलितैकाक्षिगण्डभ्रूः संरक्तोभयलोचनः॥8॥

स्कन्दार्तः+तेन वैकल्यं मरणं वा भवेत्+ ध्रुवम्।
संज्ञानाशः+ मुहुः केशलुञ्चनं कन्धरानतिः॥9॥
विनम्य जृम्भमाणस्य शकृन्मूत्रप्रवर्तनम्।
फेनोद्वमनम्+ऊर्ध्वेक्षा हस्त भ्रूपादनर्तनम्॥10॥
स्तनस्वजिह्वासन्दंशसंरम्भज्वरजागराः।
पूयशोणितगन्धः+च स्कन्दापस्मारलक्षणम्॥11॥
आध्मानं पाणिपादस्य स्पन्दनं फेननिर्वमः।
तृण्मुष्टिबन्धातीसारस्वरदैन्यविवर्णताः॥12॥
कूजनं स्तननं छर्दिः कासहिध्माप्रजागराः।
ओष्ठदंशाङ्गसङ्कोचस्तम्भबस्ताभगन्धताः॥13॥
ऊर्ध्वं निरीक्ष्य हसनं, मध्ये विनमनं, ज्वरः।
मूर्च्छैकनेत्रशोफः+च नैगमेषग्रहाकृतिः॥14॥
कम्पः+ हृषितरोमत्वं स्वेदः+चक्षुः+निमीलनम्।
बहिरायामनं जिह्वादंशः+अन्तः कण्ठकूजनम्॥15॥
धावनं विट्सगन्धत्वं क्रोशनं च श्ववत्+शुनि।
रोमहर्षः+ मुहुस्त्रासः सहसा रोदनं ज्वरः॥16॥
कासातिसारवमथुजृम्भातृट्शवगन्धताः।
अङ्गेषु+आक्षेपविक्षेपशोषस्तम्भविवर्णताः॥17॥
मुष्टिबन्धः स्रुतिः+च+अक्ष्णोः+बालस्य स्युः पितृग्रहे।
स्रस्ताङ्गत्वम्+अतीसारः+ जिह्वातालुगले व्रणाः॥18॥
स्फोटाः सदाहरुक्पाकाः सन्धिषु स्युः पुनः पुनः।
निश्यह्नि प्रविलीयन्ते पाकः+ वक्त्रे गुदे+अपि वा॥19॥
भयं शकुनिगन्धत्वं ज्वरः+च शकुनिग्रहे।
पूतनायां वमिः कम्पः+तन्द्रा रात्रौ प्रजागरः॥20॥
हिध्मा+आध्मानं शकृद्भेदः पिपासा मूत्रनिग्रहः।
स्रस्तहृष्टाङ्गरोमत्वं काकवत्पूतिगन्धिता॥21॥
शीतपूतनया कम्पः+ रोदनं निर्यगीक्षणम्।
तृष्णा+अन्त्रकूजः+अतीसारः+ वसावद्विस्रगन्धता॥22॥
पार्श्वस्य+एकस्य शीतत्वम्+उष्णत्वम्+अपरस्य च।
अन्धपूतनया छर्दिः+ज्वरः कासः+अल्पनिद्रता॥23॥
वर्चसः+ भेदवैवर्ण्यदौर्गन्ध्यानि+अङ्गशोषणम्।
दृष्टेः सादातिरुक्कण्डूपोथकीजन्मशूतताः॥24॥

हिध्मोद्वेगस्तनद्वेषवैवर्ण्यस्वरतीक्ष्णताः।
वेपथुर्मत्स्यगन्धत्वम्+अथवा साम्लगन्धता॥25॥
मुखमण्डितया पाणिपादास्यरमणीयता।
सिराभिः+असिताभाभिः+आचितोदरता ज्वरः॥26॥
अरोचकः+अङ्गग्लपनं गोमूत्रसमगन्धता।
रेवत्यां श्यावनीलत्वं कर्णनासाक्षिमर्दनम्॥27॥
कासहिध्माक्षिविक्षेपवक्त्रत्वरक्तताः।
बस्तगन्धः+ ज्वरः शोषः पुरीषं हरितं द्रवम्॥28॥
जायते शुष्करेवत्यां क्रमात्+सर्वाङ्गसङ्क्षयः।
केशशातः+अन्नविद्वेषः स्वरदैन्यं विवर्णता॥29॥
रोदनं गृध्रगन्धत्वं दीर्घकालानुवर्तनम्।
उदरे ग्रन्थयः+ वृत्ता यस्य नानाविधं शकृत्॥30॥
जिह्वाया निम्नता मध्ये श्यावं तालु च तं त्यजेत्।
भुञ्जानः+अन्नं बहुविधं यः+ बालः परिहीयते॥31॥
तृष्णागृहीतः क्षामाक्षः+ हन्ति तं शुष्करेवती।
हिंसारत्यर्चनाकाङ्क्षा ग्रहग्रहणकारणम्॥32॥
तत्र हिंसात्मके बालः+ महान् वा स्रुतनासिकः।
क्षतजिह्वः क्वणेत्+बाढम्+असुखी साश्रुलोचनः॥33॥
दुर्वर्णः+ हीनवचनः पूतिगन्धिः+च जायते।
क्षामः+ मूत्रपुरीषं स्वं मृद्गाति न जुगुप्सते॥34॥
हस्तौ च+उद्यम्य संरब्धः+ हन्ति+आत्मानं तथा परम्।
तद्वत्+च शस्त्रकाष्ठाद्यैः+अग्निं वा दीप्तम्+आविशेत्।35॥
अप्सु मज्जेत्+पतेत्+कूपे कुर्यात्+अन्यत्+च तत्+विधम्।
तृड्दाहमोहान् पूयस्य छर्दनं च प्रवर्तयेत्॥36॥
रक्तं च सर्वमार्गेभ्यः+ रिष्टोत्पत्तिं च तं त्यजेत्।
रहःस्त्रीरतिसंलापगन्धस्रग्भूषणप्रियः॥37॥
हृष्टः शान्तः+च दुःसाध्यः+ रतिकामेन पीडितः।
दीनः परिमृशन् वक्त्रं शुष्कौष्ठगलतालुकः॥38॥
शङ्कितं वीक्षते रौति ध्यायति+आयाति दीनताम्।
अन्नम्+अन्नाभिलाषे+अपि दत्तं न+अति बुभुक्षते॥39॥
गृहीतं बलिकामेन तं विद्यात्+सुखसाधनम्।
हन्तुकामं जयेत्+होमैः सिद्धमन्त्रप्रवर्तितैः॥40॥

इतरौ तु यथाकामं रतिबल्यादिदानतः।
अथ साध्यग्रहं बालं विविक्ते शरणे स्थितम्॥41॥
त्रिरह्नः सिक्तसंमृष्टे सदा सन्निहितानले।
विकीर्णभूतिकुसुमपत्रबीजान्नसर्षपे॥42॥
रक्षोघ्नतैलज्वलितप्रदीपहतपाप्मनि।
व्यवायमद्यपिशितनिवृत्तपरिचारके॥43॥
पुराणसर्पिषा+अभ्यक्तं परिषिक्तं सुखाम्बुना।
साधितेन बलानिम्बवैजयन्तीनृपद्रुमैः॥44॥
पारिभद्रककङ्कङ्कजम्बूवरुणकट्तृणैः।
कपोतवङ्कापामार्गपाटलामधुशिग्रुभिः॥45॥
काकजङ्घामहाश्वेताकपित्थक्षीरिपादपैः।
सकदम्बकरञ्जैः+च, धूपं स्नातस्य च+आचरेत्॥46॥
द्वीपिव्याघ्राहिसिंहर्क्षचर्मभिः+घृतमिश्रितैः।
पूतीदशाङ्गसिद्धार्थवचाभल्लातदीप्यकैः॥47॥
सकुष्ठैः सघृतैः+धूपः सर्वग्रहविमोक्षणः।
सर्षपा निम्बपत्राणि मूलम्+अश्वखुरा वचा॥48॥
भूर्जपत्रं घृतं धूपः सर्वग्रहनिवारणः।
अनन्ताम्रास्थितगरं मरिचं मधुरः+ गणः॥49॥
शृगालविन्ना मुस्ता च कल्कितैः+तैः+घृतं पचेत्।
दशमूलरसक्षीरयुक्तं तद् ग्रहजित्+परम्॥50॥
रास्नाद्व्यंशुमतीवृद्धपञ्चमूलबलाघनात्।
क्वाथे सर्पिः पचेत्+पिष्टैः सारिवाव्योषचित्रकैः॥51॥
पाठाविडङ्गमधुकपस्याहिङ्गुदारुभिः।
सग्रन्थिकैः सेन्द्रयवैः शिशोः+तत्+सततं हितम्॥52॥
सर्वरोगग्रहहरं दीपनं बलवर्णदम्।
सारिवासुरभिब्राह्मीशङ्खिनीकुष्ठसर्षपैः॥53॥
वचाश्वगन्धासुरसयुक्तैः सर्पिः+विपाचयेत्।
तत्+नाशयेत्+ग्रहान् सर्वान् पानेन+अभ्यञ्जनेन च॥54॥
गोशृङ्गचर्मवालाहिनिर्मोकं वृषदंशविट्।
निम्बपत्राज्यकटुकामदनं बृहतीद्वयम्॥55॥
कार्पासास्थियवच्छागरोमदेवाह्वसर्षपम्।
मयूरपत्रश्रीवासं तुषकेशं सरामठम्॥56॥

मृद्भाण्डे बस्तमूत्रेण भावितं श्लक्ष्णचूर्णितम्।
धूपनं च हितं सर्वभूतेषु विषमज्वरे॥57॥
घृतानि भूतविद्यायां वक्ष्यन्ते यानि तानि च।
युञ्ज्यात्+तथा बलिं होमं स्नपनं मन्त्रतन्त्रवित्॥58॥
पूतीकरञ्ज(ञ्जात्)त्वक्पत्रं क्षीरिभ्यः+ बर्वरात्+अपि।
तुम्बीविशालारलुकशमीबिल्वकपित्थतः॥59॥
उत्क्वाथ्य तोयं तत्+रात्रौ बालानां स्नपनं शिवम्।
अनुबन्धान् यथाकृच्छ्रं ग्रहापाये+अपि+उपद्रवान्॥60॥
बालामयनिषेधोक्तभेषजैः समुपाचरेत्॥60 1/2 ॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने बालग्रहप्रतिषेधः+ नाम तृतीयः+अध्यायः॥3॥
चतुर्थः+अध्यायः।
अथ+अतः+ भूतविज्ञानीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
लक्षयेत्+ज्ञानविज्ञानवाक्चेष्टाबलपौरुषम्।
पुरुषे+अपौरुषं यत्र तत्र भूतग्रहं वदेत्॥1॥
भूतस्य रूपप्रकृतिभाषागत्यादिचेष्टितैः।
यस्य+अनुकारं कुरुते तेन+आविष्टं तम्+आदिशेत्॥2॥
सः+अष्टादशविधः+ देवदानवादिविभेदतः।
हेतुस्तत्+अनुषक्तौ तु सद्यः पूर्वकृतः+अथवा॥3॥
प्रज्ञापराधः, सुतरां तेन कामादिजन्मना।
लुप्तधर्मव्रताचारः पूज्यान्+अपि+अतिवर्तते॥4॥
तं तथा भिन्नमर्यादं पापमात्मोपघातिनम्।
देवादयः+अपि+अनुघ्नन्ति ग्रहाश्छिद्रप्रहारिणः॥5॥
छिद्रं पापक्रियारम्भः पाकः+अनिष्टस्य कर्मणः।
एकस्य शून्ये+अवस्थानं श्मशानादिषु वा निशि॥6॥
दिग्वासस्त्वं गुरोः+र्निन्दा रतेः+अविधिसेवनम्।
अशुचेः+देवतार्चादि परसूतकसङ्करः॥7॥
होममन्त्रबलीज्यानां विगुणं परिकर्म च।
समासात्+दिनचर्यादिप्रोक्ताचारव्यतिक्रमः॥8॥
गृह्णन्ति शुक्लप्रतिपत्त्रयोदश्योः सुरा नरम्।
शुक्लत्रयोदशीकृष्णद्वादश्योः+दानवा ग्रहाः॥9॥

गन्धर्वाः+तु चतुर्दश्यां द्वादश्यां च+उरगाः पुनः।
पञ्चम्यां, शुक्लसप्तम्येकादश्योः+तु धनेश्वराः॥10॥
शुक्लाष्टपञ्चमीपौर्णमासीषु ब्रह्मराक्षसाः।
कृष्णे रक्षः पिशाचाद्या नवद्वादशपर्वसु॥11॥
दशामावास्ययोः+अष्टनवम्योः पितरः+अपरे।
गुरुवृद्धादयः प्रायः कालं सन्ध्यासु लक्षयेत्।
फुल्लपद्मोपममुखं सौम्यदृष्टिम्+अकोपनम्।
अल्पवाक्स्वेदविण्मूत्रं भोजनान्+अभिलाषिणम्॥13॥
देवद्विजातिपरमं शुचिं संस्कृतवादिनम्।
मीलयन्तं चिरात्+नेत्रे सुरभिं वरदायिनम्॥14॥
शुक्लमाल्याम्बरसरिच्छैलोच्चभवनप्रियम्।
अनिद्रमप्रधृष्यं च विद्यात्+देववशीकृतम्॥15॥
जिह्मदृष्टिं दुरात्मानं गुरुदेवद्विजद्विषम्।
निर्भयं मानिनं शूरं क्रोधनं व्यवसायिनम्॥16॥
रुद्रः स्कन्दः+ विशाखः+अहम्+इन्द्रः+अहम्+इति वादिनम्।
सुरामांसरुचिं विद्यात् दैत्यग्रहगृहीतकम्॥17॥
स्वाचारं सुरभिं हृष्टं गीतनर्तनकारिणम्।
स्नानोद्यानरुचिं रक्तवस्त्रमाल्यानुलेपनम्॥18॥
शृङ्गारलीलाभिरतं गन्धर्वाध्युषितं वदेत्।
रक्ताक्षं क्रोधनं स्तब्धदृष्टिं वक्रगतिं चलम्॥19॥
श्वसन्तम्+अनिशं जिह्वालोलिनं सृक्किणीलिहम्।
प्रियदुग्धगुडस्नानमधोवदनशायिनम्॥20॥
उरगाधिष्ठितं विद्यात्+त्रस्यन्तं च+आतपत्रतः।
विप्लुतत्रस्तरक्ताक्षं शुभगन्धं सुतेजसम्॥21॥
प्रियनृत्यकथागीतस्नानमाल्यानुलेपनम्।
मत्स्यमांसरुचिं हृष्टं तुष्टं बलिनम्+अव्यथम्॥22॥
चलिताग्रकरं कस्मै किं ददामि+इति वादिनम्।
रहस्यभाषिणं वैद्यद्विजातिपरिभाविनम्॥23॥
अल्परोषं द्रुतगतिं विद्यात्+यक्षगृहीतकम्।
हास्यनृत्यप्रियं रौद्रचेष्टं छिद्रप्रहारिणम्॥24॥
आक्रोशिनं शीघ्रगतिं देवद्विजभिषग्द्विषम्।
आत्मानं काष्ठशस्त्राद्यैः+घ्नन्तं भोःशब्दवादिनम्॥25॥

शास्त्रवेदपठं विद्यात्+ गृहीतं ब्रह्मराक्षसैः।

सक्रोधदृष्टिं भुकुटिम्+उद्वहन्तं ससंभ्रमम्॥26॥

प्रहरन्तं प्रधावन्तं शब्दन्तं भैरवाननम्।

अन्नात्+विना+अपि बलिनं नष्टनिद्रं निशाचरम्॥27॥

निर्लज्जम्+अशुचिं शूरं क्रूरं परुषभाषिणम्।

रोषणं रक्तमाल्यस्त्रीरक्तमद्यामिषप्रियम्॥28॥

दृष्ट्वा च रक्तं मांसं वा+आलिहानं दशनच्छदौ।

हसन्तम्+अन्नकाले च राक्षसाधिष्ठितं वदेत्॥29॥

अस्वस्थचित्तं न+एकत्र तिष्ठन्तं परिधाविनम्।

उच्छिष्टनृत्यगान्धर्वहासमद्यामिषप्रियम्॥30॥

निर्भर्त्सनात्+दीनमुखं रुदन्तम्+अनिमित्ततः।

नखैः+लिखन्तम्+आत्मानं रूक्षध्वस्तवपुःस्वरम्॥31॥

आवेदयन्तं दुःखानि सम्बद्धाबद्धभाषिणम्।

नष्टस्मृतिं शून्यरतिं लोलं नग्नं मलीमसम्॥32॥

रथ्याचैलपरीधानं तृणमालाविभूषणम्।

आरोहन्तं च काष्ठाश्वं तथा सङ्करकूटकम्॥33॥

बह्वाशिनं पिशाचेन विजानीयात्+अधिष्ठितम्।

प्रेताकृतिक्रियागन्धं भीतम्+आहारविद्विषम्॥34॥

तृणच्छिदं च प्रेतेन गृहीतं नरम्+आदिशेत्।

बहुप्रलापं कृष्णास्यं प्रविलम्बितयायिनम्॥35॥

शूनप्रलम्बवृषणं कूष्माण्डाधिष्ठितं वदेत्।

गृहीत्वा काष्ठलोष्टादि भ्रमन्तं चीरवाससम्॥36॥

नग्नं धावन्तम्+उत्त्रस्तदृष्टिं तृणविभूषणम्।

श्मशानशून्यायतनरथ्यैकद्रुमसेविनम्॥37॥

तिलान्नमद्यमांसेषु सततं सक्तलोचनम्।

निषादाधिष्ठितं विद्यात्+ वदन्तं परुषाणि च॥38॥

याचन्तम्+उदकं च+अन्नं त्रस्तलोहितलोचनम्।

उग्रवाक्यं च जानीयात्+नरमौकिरणार्दितम्॥39॥

गन्धमाल्यरतिं सत्यवादिनं परिवेपिनम्।

बहुनिद्रं(उग्रवाक्यं) च जानीयात्+वेतालेन वशीकृतम्॥40॥

अप्रसन्नदृशं दीनवदनं शुष्कतालुकम्।

चलन्नयनपक्ष्माणं निन्द्रालुं मन्दपावकम्॥41॥

अपसव्यपरीधानं तिलमांसगुडप्रियम्।
स्खलत्+वाचं च जानीयात् पितृग्रहवशीकृतम्॥42॥
गुरुवृद्धर्षिसिद्धाभिशापचिन्तानुरूपतः।
व्याहाराहारचेष्टाभिः+यथास्वं तद्ग्रहं वदेत्॥43॥
कुमारवृदानुगतं नग्नम्+उद्धतम्+ऊर्धजम्।
अस्वस्थमनसं दैर्घ्यकालिकं सग्रहं त्यजेत्॥44॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने भूतविज्ञानीयः+ नाम चतुर्थः+अध्यायः॥4॥
पञ्चमः+अध्यायः।
अथ+अतः+ भूतप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
भूतं जयेत्+अहिंसेच्छं जपहोमबलिव्रतैः।
तपःशीलसमाधानदानज्ञानदयादिभिः॥1॥
हिङ्गुव्योषालनेपालीलशुनार्कजटाजटाः।
अजलोमी सगोलोमी भूतकेशी वचा लता॥2॥
कुक्कुटी सर्पगन्धाख्या तिलाः काणविकाणिके।
वज्रप्रोक्ता वयःस्था च शृङ्गी मोहनवल्ली+अपि॥3॥
स्रोतोजाञ्जनरक्षोघ्नं रक्षोघ्नं च+अन्यदौषधम्।
खराश्वश्वाविदुष्ट्रर्क्षगोधानकुलशल्यकात्॥4॥
द्वीपिमार्जारगोसिंहव्याघ्रसामुद्रसत्त्वतः।
चर्मपित्तद्विजनखा वर्गे+अस्मिन् साधयेत्+घृतम्॥5॥
पुराणम्+अथवा तैलं नवं तत्+पाननस्ययोः।
अभ्यङ्गे च प्रयोक्तव्यम्+एषां चूर्णं च धूपने॥6॥
एभिः+च गुटिकां युञ्ज्यात्+अञ्जने सावपीडने।
प्रलेपे कल्कम्+एतेषां क्वाथं च परिषेचने॥7॥
प्रयोगः+अयं ग्रहोन्मादान् सापस्मारान्+शमं नयेत्।
गजाह्वापिप्पलीमूलव्योषामलकसर्षपान्॥8॥
गोधानकुलमार्जारझषपित्तप्रपेषितान्।
नावनाभ्यङ्गसेकेषु विदधीत ग्रहापहान्॥9॥
सिद्धार्थकवचाहिङ्गुप्रियङ्गुरजनीद्वयम्।
मञ्जिष्ठा श्वेतकटभी वरा श्वेता+अद्रिकर्णिका॥10॥
निम्बस्य पत्रं बीजं तु नक्तमालशिरीषयोः।

सुराह्वं त्र्यूषणं सर्पिः+गोमूत्रे तैः+चतुर्गुणे॥11॥
सिद्धं सिद्धार्थकं नाम पाने नस्ये च योजितम्।
ग्रहान् सर्वान्+निहन्ति+आशु विशेषात्+असुरान् ग्रहान्॥12॥
कृत्यालक्ष्मीविषोन्मादज्वरापस्मारपाप्म च।
एभिः+एव+औषधैः+बस्तवारिणा कल्पितः+अगदः॥13॥
पाननस्याञ्जनालेपस्नानोद्धर्षणयोजितः।
गुणैः पूर्ववत्+उद्दिष्टः+ राजद्वारे च सिद्धिकृत्॥14॥
सिद्धार्थकव्योषवचाश्वगन्धा निशाद्वयं हिङ्गुपलाण्डुकन्दः।
बीजं करञ्जात्, कुसुमं शिरीषात् फलं च वल्कं च कपित्थवृक्षात्॥15॥
समाणिमन्थं सनतं सकुष्ठं स्योनाकमूलं किणिही सिता च।
बस्तस्य मूत्रेण सुभावितं तत् पित्तेन गव्येन गुडान् विदध्यात्॥16॥
दुष्टव्रणोन्मादतमोनिशान्धान्+उद्बन्धकान् वारिनिमग्नदेहान्।
दिग्धाहतान् दर्पितसर्पदष्टाः+ते साधयन्ति+अञ्जननस्यलेपैः॥17॥
कार्पासास्थिमयूरपत्रबृहतीनिमाल्यपिण्डीतकत्वङ्मांसीवृषदंशविट्तुषवचाकेशाहिनिर्मोककैः।
नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैः+तुल्यैः कृतं धूपनं स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नं परम्॥18॥
त्रिकटुकदलकुङ्कुमग्रन्थिकक्षारसिंहीनिशादारुसिद्धार्थयुग्माम्बुशक्राह्वयैः
सितलशुनफलत्रयोशीरतिक्तावचातुत्थयष्टीबलालोहितैलाशिलापद्मकैः।
दधितगरमधूकसारप्रियाह्वाविषाख्याविषाताक्ष्यशैलैः सचव्यामयैः
कल्कितैः+घृतम्+अनवम्+अशेषमूत्रांशसिद्धं मतं भूतरावाह्वयं पानतः+तत् ग्रहघ्नं परम्॥19॥
नतमधुकरञ्जलाक्षापटोलीसमङ्गावचापाटलीहिङ्गुसिद्धार्थसिंहीनिशायुग्लतारोहिणीबदरकटुफलत्रिकाकाण्डदारुकृमिघ्नाजगन्धामराङ्कोल्लकोशातकीशिग्रुनिम्बाम्बुदेन्द्राह्वयैः।
गदशुकतरुपुष्पबीजोग्रयष्ट्यद्रिकर्णीनिकुम्भाग्निबिल्वैः समैः कल्कितैः+मूत्रवर्गेण सिद्धं घृतं विधिविनिहितम्+आशु सर्वैः क्रमैः+योजितं हन्ति सर्वग्रहोन्मादकुष्ठज्वरान्+तन्महाभूतरावं स्मृतम्॥20॥
ग्रहा गृह्णन्ति ये येषु तेषां तेषु विशेषतः।
दिनेषु बलिहोमादीन् प्रयुञ्जीति चिकित्सकः॥21॥
स्नानवस्त्रवसामांसमद्यक्षीरगुडादि च।
रोचते यत्+यदा येभ्यः+तत्+तेषाम्+आहरेत्+तदा॥22॥
रत्ननि गन्धमाल्यानि बीजानि मधुसर्पिषी।
भक्ष्याः+च सर्वे सर्वेषां सामान्यः+ विधिः+इति+अयम्॥23॥
सुरर्षिगुरुवृद्धेभ्यः सिद्धेभ्यः+च सुरालये।
दिशि+उत्तरस्यां तत्र+अपि देवाय+उपहरेत्+बलिम्॥24॥
पश्चिमायां यथाकालं दैत्यभूताय चत्वरे।

गन्धर्वाय गवां मार्गे सवस्त्राभरणं बलिम्॥25॥
पितृनागग्रहे नद्यां नागेभ्यः पूर्वदक्षिणे।
यक्षाय यक्षायतने सरितोः+वा समागमे॥26॥
चतुष्पथे राक्षसाय भीमेषु गहनेषु च।
रक्षसां दक्षिणस्यां तु पूर्वस्यां ब्रह्मरक्षसाम्॥27॥
शून्यालये पिशाचाय पश्चिमां दिशमास्थिते।
शुचिशुक्लानि माल्यानि गन्धाः क्षैरेयम्+ओदनम्॥28॥
दधि छत्रं च धवलं देवानां बलिः+इष्यते।
हिङ्गुसर्षपषड्ग्रन्थाव्योषैः+अर्धपलोन्मितैः॥29॥
चतुर्गुणे गवां मूत्रे घृतप्रस्थं विपाचयेत्।
तत्+पाननावनाभ्यङ्गैः+देवग्रहविमोक्षणम्॥30॥
नस्याञ्जनं वचाहिङ्गुलशुनं बस्तवारिणा।
दैत्ये बलिः+बहुफलः सोशीरकमलोत्पलः॥31॥
नागानां सुमनोलाजगुडापूपगुडौदनैः।
परमान्नमधुक्षीरकृष्णमृन्नागकेसरैः॥32॥
वचापद्मपुरोशीररक्तोत्पलदलैः+बलिः।
श्वेतपत्रं च रोध्रं च तगरं नागसर्षपाः॥33॥
शीतेन वारिणा पिष्टं नावनाञ्जनयोः+हितम्।
यक्षाणां क्षीरदध्याज्यमिश्रकौदनगुग्गुलु॥34॥
देवदारूत्पलं पद्मम्+उशीरं वस्त्रकाञ्चनम्।
हिरण्यं च बलिः+योज्यः+ मूत्राज्यक्षीरम्+एकतः॥35॥
सिद्धं समोन्मितं पाननावनाभ्यञ्जने हितम्।
हरीतकी हरिद्रे द्वे लशुनः+ मरिचं वचा॥36॥
निम्बपत्रं च बस्ताम्बुकल्कितं नावनाञ्जनम्।
ब्रह्मरक्षोबलिः सिद्धं यवानां पूर्णम्+आढकम्॥37॥
तोयस्य कुम्भः पललं छत्रं वस्त्रं विलेपनम्।
गायत्रीविंशतिपलक्वाथे+अर्धपलिकैः पचेत्॥38॥
त्र्यूषणत्रिफलाहिङ्गुषड्ग्रन्थामिशिसर्षपैः।
सनिम्बपत्रलशुनैः कुडवान् सप्त सर्पिषः॥39॥
गोमूत्रे त्रिगुणेपाननस्याभ्यङ्गेषु तत्+हितम्।
रक्षसां पललं शुक्लं कुसुमं मिश्रकौदनम्॥40॥
बलिः पक्वाममांसानि निष्पावा रुधिरोक्षिताः।

नक्तमालशिरीषत्वङ्मूलपुष्पफलानि च॥41॥

तद्वत्+च कृष्णपाटल्या बिल्वमूलं कटुत्रिकम्।

हिंग्विन्द्रयवसिद्धार्थलशुनामलकीफलम्॥42॥

नावनाञ्जनयोः+योज्यः+ बस्तमूत्रयुतः+अगदः।

एभिः+एव घृतं सिद्धं गवां मूत्रे चतुर्गुणे॥43॥

रक्षोग्रहान् वारयते पानाभ्यञ्जननावनैः।

पिशाचानां बलिः सीधुः पिण्याकः पललं दधि॥44॥

मूलकं लवणं सर्पिः सभूतौदनयावकम्।

हरिद्राद्वयमञ्जिष्ठामिशिसैन्धवनागरम्॥45॥

हिङ्गुप्रियङ्गुत्रिकटुरसोनत्रिफला वचा।

पाटलीश्वेतकटभीशिरीषकुसुमैः+घृतम्॥46॥

गोमूत्रपादिकं सिद्धं पानाभ्यञ्जनयोः+हितम्।

बस्ताम्बुपिष्टैः+तैः+एव योज्यम्+अञ्जननावनम्॥47॥

देवर्षिपितृगन्धर्वे तीक्ष्णं नस्यादि वर्जयेत्।

सर्पिष्पानादि मृदुः+अस्मिन् भैषज्यम्+अवचारयेत्॥48॥

ऋते पिशाचात्+सर्वेषु प्रतिकूलं च न+आचरेत्।

सवैद्यमातुरं घ्नन्ति क्रुद्धाः+ते हि महौजसः॥49॥

ईश्वरं द्वादशभुजं नाथमार्यावलोकितम्।

सर्वव्याधिचिकित्सां च जपन् सर्वग्रहान् जयेत्॥50॥

तथा+उन्मादान्+अपस्मारान्+अन्यं वा चित्तविप्लवम्।

महाविद्यां च मायूरीं शुचिं तं श्रावयेत्+सदा॥51॥

भूतेशं पूजयेत् स्थाणुं प्रमथाख्यान्+च तद्गणान्।

जपन् सिद्धान्+च तन्मन्त्रान् ग्रहान् सर्वान्+अपोहति॥52॥

यत्+च+अनन्तरयोः किञ्चित्+वक्ष्यते+अध्याययोः+हितम्।

यत्+च+उक्तम्+इह तत्+सर्वं प्रयुञ्जीतं परस्परम्॥53॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने भूतप्रतिषेधः+ नाम पञ्चमः+अध्यायः॥5॥

षष्ठः+अध्यायः।

अथ+अतः+ उन्मादप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

उन्मादाः षट् पृथक्+दोषनिचयाधिविषोद्भवाः।

उन्मादः+ नाम मनसः+ दोषैः+उन्मार्गगैः+मदः॥1॥

शारीरमानसैः+दुष्टैः+अहितात्+अन्नपानतः।
विकृतासात्म्यसमलात्+विषमात्+उपयोगतः॥2॥
विषण्णस्य+अल्पसत्त्वस्य व्याधिवेगसमुद्गमात्।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात्॥3॥
आधिभिः+चित्तविभ्रंशात्+ विषेण+उपविषेण च।
एभिः+हि हीनसत्त्वस्य हृदि दोषाः प्रदूषिताः॥4॥
धियः+ विधाय कालुष्यं हत्वा मार्गान् मनोवहान्।
उन्मादं कुर्वते, तेन धीविज्ञानस्मृतिभ्रमात्॥5॥
देहः+ दुःखसुखभ्रष्टः+ भ्रष्टसारथिवत्+रथः।
भ्रमति+अचिन्तितारम्भः तत्र वातात्+कृशाङ्गता॥6॥
अस्थाने रोदनाक्रोशहसितस्मितनर्तनम्।
गीतवादित्रवागङ्गविक्षेपास्फोटनानि च॥7॥
असाम्ना वेणुवीणादिशब्दानुकरणं मुहुः।
आस्यात्+फेनागमः+अजस्रम्+अटनं बहुभाषिता॥8॥
अलङ्कारः+अनलङ्कारैः+अयानैः+गमनोद्यमः।
गृद्धिः+अभ्यवहार्येषु तत्+लाभे च+अवमानता॥9॥
उत्पिण्डितारुणाक्षित्वं जीर्णे च+अन्ने गदोद्भवः।
पित्तात्+सन्तर्जनं क्रोधः+ मुष्टिलोष्टाद्यभिद्रवः॥10॥
शीतच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता।
असत्यज्वलनज्वालातारकादीपदर्शनम्॥11॥
कफात्+अरोचकश्छर्दिरल्पेहाहारवाक्यता।
स्त्रीकामता रहःप्रीतिः+लालासिङ्घाणकस्रुतिः॥12॥
बैभत्स्यं शौचविद्वेषः+ निद्रा श्वयथुः+आनने।
उन्मादः+ बलवान् रात्रौ भुक्तमात्रे च जायते॥13॥
सर्वायतनसंस्थानसन्निपाते तत्+आत्मकम्।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्जयेत्॥14॥
धनकान्तादिनाशेन दुःसहेन+अभिषङ्गवान्।
पाण्डुः+दीनः+ मुहुः+मुह्यने हाहा+इति परिदेवते॥15॥
रोदिति+अकस्मात्+म्रियते तत्+गुणान् बहु मन्यते।
शोकक्लिष्टमना ध्यायन् जागरूकः+ विचेष्टते॥16॥
विषेण श्यावวदनः+ नष्टच्छायाबलेन्द्रियः।
वेगान्तरे+अपि सम्भ्रान्तः+ रक्ताक्षः+तं विवर्जयेत्॥17॥

अथ+अनिलज उन्मादे स्नेहपानं प्रयोजयेत्।
पूर्वम्+आवृतमार्गे तु सस्नेहं मृदु शोधनम्॥18॥
कफपित्तभवे+अपि+आदौ वमनं सविरेचनम्।
स्निग्धस्विन्नस्य बस्तिं च शिरसः सविरेचनम्॥19॥
तथा+अस्य शुद्धदेहस्य प्रसादं लभते मनः।
इत्थम्+अपि+अनुवृत्तौ तु तीक्ष्णं नावनम्+अञ्जनम्॥20॥
हर्षणाश्वासनोत्त्रासभयताडनतर्जनम्।
अभ्यङ्गोद्वर्तनालेपधूपान् पानं च सर्पिषः॥21॥
युञ्ज्यात्+तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः।
हिङ्गुसौवर्चलव्योषैः+द्विपलांशैः+घृताढकम्॥22॥
सिद्धं समूत्रम्+उन्मादभूतापस्मारनुत्परम्।
द्वौ प्रस्थौ स्वरसात्+ ब्राह्म्या घृतप्रस्थं च साधितम्॥23॥
व्योषश्यामात्रिवृत्+दन्तीशङ्खपुष्पीनृपद्रुमैः।
ससप्तलाकृमिहरैः कल्कितैः+अक्षसम्मितैः॥24॥
पलवृद्ध्या प्रयुञ्जीत परं मात्रा चतुष्पलम्।
उन्मादकुष्ठापस्मारहरं वन्ध्यासुतप्रदम्॥25॥
वाक्स्वरस्मृतिमेधाकृत्+ धन्यं ब्राह्मीघृतं स्मृतम्।
वराविशालाभद्रैलादेवदार्वेलवालुकैः॥26॥
द्विसारिवाद्विरजनीद्विस्थिराफलिनीनतैः।
बृहतीकुष्ठमञ्जिष्ठानागकेसरदाडिमैः॥27॥
वेल्लतालीसपत्रैलामालतीमुकुलोत्पलैः।
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत्॥28॥
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु।
पाण्डुकण्डूविषे शोषे मोहे मेहे गरे ज्वरे॥29॥
अरेतस्यप्रजसि वा दैवोपहतचेतसि।
अमेधसि स्खलत्+वाचि स्मृतिकामे+अल्पपावके॥30॥
बल्यं मङ्गल्यम्+आयुष्यं कान्तिसौभाग्यपुष्टिदम्।
कल्याणकम्+इदं सर्पिः श्रेष्ठं पुंसवनेषु च॥31॥
एभ्यः+ द्विसारिवादीनि जले पक्त्वा+एकविंशतिम्।
रसे तस्मिन् पचेत्+सर्पिः+गृष्टिक्षीरचतुर्गुणम्॥32॥
वीराद्विमेदाकाकोलीकपिकच्छूविषाणिभिः।
शूर्पपर्णीयुतैः+एतत्+महाकल्याणकं परम्॥33॥

बृंहणं सन्निपातघ्नं पूर्वस्मात्+अधिकं गुणैः।
जटिला पूतना केशी चारटी मर्कटी वचा॥34॥
त्रायमाणां जया वीरा चोरकः कटुरोहिणी।
वयःस्था शूकरी छत्रा सातिच्छत्रा पलङ्कषा॥35॥
महापुरुषदन्ता च कायस्था नाकुलीद्वयम्।
कटम्भरा वृश्चिकाली शालिपर्णी च तैः+घृतम्॥36॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम्।
महापैशाचकं नाम घृतम्+एतत्+यथा+अमृतम्॥37॥
बुद्धिमेधास्मृतिकरं बालानां च+अङ्गवर्धनम्।
ब्राह्मीम्+ऐन्द्रीं विडङ्गानि व्योषं हिङ्गु जटां मुराम्॥38॥
रास्नां विषघ्नां लशुनं विशल्यां सुरसां वचाम्।
ज्योतिष्मतीं नागविन्नामनन्तां सहरीतकीम्॥39॥
काञ्ची च हस्तिमूत्रेण पिष्ट्वा छायाविशोषिता।
वर्तिः+नस्याञ्जनालेपधूपैः+उन्मादसूदनी॥40॥
अवपीडाः+च विविधाः सर्षपाः स्नेहसंयुताः।
कटुतैलेन च+अभ्यङ्गः+ ध्मापयेत्+चास्य तत्+रजः॥41॥
सहिङ्गुः+तीक्ष्णधूमः+च सूत्रस्थानोदितः+ हितः।
शृगालशल्यकोलूकजलौकावृषबस्तजैः॥42॥
मूत्रपित्तशकृल्लोमनखचर्मभिः+आचरेत्।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम्॥43॥
धूपयेत्+सततं च+एनं श्वगोमत्स्यैः सुपूतिभिः।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते॥44॥
तिक्तकं जीवनीयं च सर्पिः स्नेहः+च मिश्रकः।
शीतानि च+अन्नपानानि मधुराणि लघूनि च॥45॥
विध्येत्+शिरां यथा+उक्तां वा तृप्तं मेद्यामिषस्य वा।
निवाते शाययेत्+एवं मुच्यते मतिविभ्रमात्॥46॥
प्रक्षिप्यासलिले कूपे शोषयेत्+वा बुभुक्षया।
आश्वासयेत्+सुहृत्+तं वा वाक्यैः+धर्मार्थसंहितैः॥47॥
ब्रूयात्+इष्टविनाशं वा दर्शयेत्+अद्भुतानि वा।
बद्धं सर्षपतैलाक्तं न्यसेत्+वा+उत्तानमातपे॥48॥
कपिकच्छ्वा+अथवा तप्तैः+लोहतैलजलैः स्पृशते।
कशाभिः+ताडयित्वा वा बद्धं श्वभ्रे विनिःक्षिपेत्॥49॥

अथवा वीतशस्त्राश्मजने संतमसे गृहे।
सर्पेण+उद्धृतदंष्ट्रेण दान्तैः सिंहैः+गजैः+च तम्॥50॥
(त्रासयेत्+शस्त्रहस्तैः+वा किराताराततिस्करैः।)
अथवा राजपुरुषा बहिः+नीत्वा सुसंयतम्।
भापयेयुः+वधेन+एनं तर्जयन्तः+ नृपाज्ञया॥51॥
देहदुःखभयेभ्यः+ हि परं प्राणभयं मतम्।
तेन याति शमं तस्य सर्वतः+ विप्लुतं मनः॥52॥
सिद्धा क्रिया प्रयोज्या+इयं देशकालाद्यपेक्षया।
इष्टद्रव्यविनाशात्+तु मनः+ यस्य+उपहन्यते॥53॥
तस्य तत्+सदृशप्राप्तिसान्त्वाश्वासैः शमं नयेत्।
कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्॥54॥
परस्परप्रतिद्वन्द्वैः+एभिः+एव शमं नयेत्।
भूतानुबन्धम्+ईक्षेत प्रोक्तलिङ्गाधिकाकृतिम्॥55॥
यदि+उन्मादे ततः कुर्यात्+भूतनिर्दिष्टम्+औषधम्।
बलिं च दद्यात्+पललं यावकं सक्तुपिण्डिकाम्॥56॥
स्निग्धं मधुरम्+आहारं तण्डुलान् रुधिरोक्षितान्।
पक्वामकानि मांसानि सुरां मैरेयम्+आसवम्॥57॥
अतिमुक्तस्य पुष्पाणि जात्याः सहचरस्य च।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च॥58॥
निवृत्तामिषमद्यः+ यः+ हिताशी प्रयतः शुचिः।
निजागन्तुभिः+उन्मादैः सत्ववान्+न सः+ युज्यते॥59॥
प्रसादः+ इन्द्रियार्थानां बुद्ध्यात्ममनसां तथा।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्॥60॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने उन्मादप्रतिषेधः+ नाम षष्ठः+अध्यायः॥6॥
सप्तमोध्यायः।
अथ+अतः+अपस्मारप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
स्मृत्यपायः+ हि+अपस्मारः सः+ धीसत्त्वाभिसंप्लवात्।
जायते+अभिहते चित्ते चिन्ताशोकभयादिभिः॥1॥
उन्मादवत्+प्रकुपितैः+चित्तदेहगतैः+मलैः।
हते सत्त्वे हृदि व्याप्ते संज्ञावाहिषु खेषु च॥2॥

तमः+ विशन् मूढमतिः+बीभत्साः कुरुते क्रियाः।
दन्तान् खादन् वमन् फेनं हस्तौ पादौ च विक्षिपन्॥3॥
पश्यन्+हसन्ति रूपाणि प्रस्खलन् पतति क्षितौ।
विजिह्माक्षिभ्रुवः+ दोषवेगे+अतीते विबुध्यते॥4॥
कालान्तरेण सः+ पुनः+च+एवम्+एव विचेष्टते।
अपस्मारः+चतुर्भेदः+ वाताद्यैः+निचयेन च॥5॥
रूपम्+उत्पत्स्यमाने+अस्मिन् हृत्कम्पः शून्यता भ्रमः।
तमसः+ दर्शनं ध्यानं भ्रूव्युदासः+अक्षिवैकृतम्॥6॥
अशब्दश्रवणं स्वेदः+ लालासिङ्घाणकस्रुतिः।
अविपाकः+अरुचिः+मूर्च्छा कुक्ष्याटोपः+ बलक्षयः॥7॥
निद्रानाशः+अङ्गमर्दः+तृट् स्वप्ने गानं सनर्तनम्।
पानं तैलस्य मद्यस्य तयोः+एव च मेहनम्॥8॥
तत्र वातात्+स्फुरत्+सक्थिः प्रपतन्+च मुहुः+मुहुः।
अपस्मरति संज्ञां च लभते विस्वरं रुदन्॥9॥
उत्पिण्डिताक्षः श्वसिति फेनं वमति कम्पते।
आविध्यति शिरः+ दन्तान् दशति+आध्मातकन्धरः॥10॥
परितः+ विक्षिपति+अङ्गं विषमं विनताङ्गुलिः।
रूक्षश्यावारुणाक्षित्वङ्नखास्यः कृष्णम्+ईक्षते॥11॥
चपलं परुषं रूपं विरूपं विकृताननम्।
अपस्मरति पित्तेन मुहुः संज्ञां च विन्दति॥12॥
पीतफेनाक्षिवक्त्रत्वगास्फालयति मेदिनीम्।
भैरवादीप्तरूषितरूपदर्शी तृषान्वितः॥13॥
कफात्+चिरेण ग्रहणं चिरेण+एव विबोधनम्।
चेष्टा+अल्पा भूयसी लाला शुक्लनेत्रनखास्यता॥14॥
शुक्लाभरूपदर्शित्वं सर्वलिङ्गं तु वर्जयेत्।
अथ+आवृतानां धीचित्तहृत्खानां प्राक्प्रबोधनम्॥15॥
तीक्ष्णैः कुर्यात्+अपस्मारे कर्मभिः+वमनादिभिः।
वातिकं बस्तिभूयिष्ठैः, पैत्तं प्रायः+ विरेचनैः॥16॥
श्लैष्मिकं वमनप्रायैः+अपस्मारम्+उपाचरेत्।
सर्वतः सुविशुद्धस्य सम्यक्+आश्वासितस्य च॥17॥
अपस्मारविमोक्षार्थं योगान् संशमनान् शृणु।
गोमयस्वरसक्षीरदधिमूत्रैः शृतं हविः॥18॥

अपस्मारज्वरोन्मादकामलान्तकरं पिबेत्।
द्विपञ्चमूलत्रिफलाद्विनिशाकुटजत्वचः॥19॥
सप्तपर्णम्+अपामार्गं नीलिनीं कटुरोहिणीम्।
शम्याकपुष्करजटाफल्गुमूलदुरालभाः॥20॥
द्विपलाः सलिलद्रोणे पक्त्वा पादावशेषिते।
भार्गीपाठाढकीकुम्भनिकुम्भव्योषरोहिषैः॥21॥
मूर्वाभूतीकभूनिम्बश्रेयसीसारिवाद्वयैः।
मदयन्ति+अग्निनिचुलैः+अक्षांशैः सर्पिषः पचेत्॥22॥
प्रस्थं तद्वत्+ द्रवैः पूर्वैः पञ्चगव्यम्+इदं महत्।
ज्वरापस्मारजठरभगन्दरहरं परम्॥23॥
शोफार्शः कामलापाण्डुगुल्मकासग्रहापहम्।
ब्राह्मीरसवचाकुष्ठशङ्खपुष्पीशृतं घृतम्॥24॥
पुराणं मेध्यम्+उन्मादालक्ष्म्यपस्मारपाप्मजित्।
तैलप्रस्थं घृतप्रस्थं जीवनीयैः पलोन्मितैः॥25॥
क्षीरद्रोणे पचेत्+सिद्धम्+अपस्मारविमोक्षणम्।
कंसे क्षीरेक्षुरसयोः काश्मर्ये+अष्टगुणे रसे॥26॥
कार्षिकैः+जीवनीयैः+च सर्पिः प्रस्थं विपाचयेत्।
वातपित्तोद्भवं क्षिप्रम्+अपस्मारं निहन्ति तत्॥27॥
तद्वत् काशविदारीक्षुकुशक्वाथशृतं पयः।
कूष्माण्डस्वरसे सर्पिः+अष्टादशगुणे शृतम्॥28॥
यष्टीकल्कम्+अपस्मारहरं धीवाक्स्वरप्रदम्।
कपिलानां गवां पित्तं नावने परमं हितं॥29॥
श्वशृगालबिडालानां सिंहादीनां च पूजितम्।
गोधानकुलनागानां पृषतर्क्षगवाम्+अपि॥30॥
पित्तेषु साधितं तैलं नस्ये+अभ्यङ्गे च शस्यते।
त्रिफलाव्योषपीतद्रुयवक्षारफणिज्जकैः॥31॥
श्याह्वापामार्गकारञ्जबीजैः+तैलं विपाचितम्।
बस्तमूत्रे हितं नस्यं चूर्णं वा ध्मापयेत्+भिषक्॥32॥
नकुलोलूकमार्जारगृध्रकीटाहिकाकजैः।
तुण्डैः पक्षैः पुरीषैः+च धूपमस्य प्रयोजयेत्॥33॥
शीलयेत्+तैललशुनं पयसा वा शतावरीम्।
ब्राह्मीरसं कुष्ठरसं वचां वा मधुसंयुताम्॥34॥

समं क्रुद्धैः+अपस्मारः+ दोषैः शारीरमानसैः।
यत्+जायते यतः+च+एषः+ महामर्मसमाश्रयः॥35॥
तस्मात्+रसायनैः+एनं दुश्चिकित्स्यम्+उपाचरेत्।
तदार्तं च+अग्नितोयादेः+विषमात्+पालयेत्+सदा॥36॥
मुक्तं मनः+ विकारेण त्वम्+इत्थं कृतवान्+इति।
न ब्रूयात्+विषयैः+इष्टैः क्लिष्टं चेतः+अस्य बृंहयेत्॥37॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने+अपस्मारप्रतिषेधः+ नाम सप्तमः+अध्यायः॥7॥
अष्टमः+अध्यायः।
अथ+अतः+ वर्त्मरोगविज्ञानीयम्+अध्यायं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वरोगनिदानोक्तैः+अहितैः कुपिता मलाः।
अचक्षुष्यैः+विशेषेण प्रायः पित्तानुसारिणः॥1॥
शिराभिः+ऊर्ध्वं प्रसृता नेत्रावयवम्+आश्रिताः।
वर्त्म सन्धिं सितं कृष्णं दृष्टिं वा सर्वम्+अक्षिं वा॥2॥
रोगान् कुर्युः चलः+तत्र प्राप्य वर्त्माश्रयाः सिराः।
सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम्॥3॥
पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनम्+अश्रु च।
विमर्दनात् स्यात्+च शमः कृच्छ्रोन्मीलं वदन्ति तत्॥4॥
चालयन् वर्त्मनी वायुः+निमेषोन्मेषणं मुहुः।
करोति+अरुङ् निमेषः+असौ वर्त्म यत्+तु निमील्यते॥5॥
विमुक्तसन्धि निश्चेष्टं हीनं वातहतं हि तत्।
कृष्णाः पित्तेन बह्व्यः+अन्तर्वर्त्म कुम्भीकबीजवत्॥6॥
आध्मायन्ते पुनः+भिन्नाः पिटिकाः कुम्भिसंज्ञिताः।
सदाहक्लेदनिस्तोदं रक्ताभं स्पर्शनाक्षमम्॥7॥
पित्तेन जायते वर्त्म पित्तोत्क्लिष्टम्+उशन्ति तत्।
करोति कण्डूं दाहं च पित्तं पक्ष्मान्तम्+आस्थितम्॥8॥
पक्ष्मणां शातनं च+अनु पक्ष्मशातं वदन्ति तम्।
पोथक्यः पिटिकाः श्वेताः सर्षपाभा घनाः कफात्॥9॥
शोफोपदेहरुक्कण्डूपिच्छिलाश्रुसमन्विताः।
कफोत्क्लिष्टं भवेत्+वर्त्म स्तम्भक्लेदोपदेहवत्॥10॥
ग्रन्थिः पाण्डुररुक्पाकः कण्डूमान् कठिनः कफात्।

कोलमात्रः सः+ लगणः किञ्चित्+अल्पः+ततः+अथ वा॥11॥
रक्ता रक्तेन पिटिका तत्+तुल्यपिटिकाचिता।
उत्सङ्गाख्या तथा+उत्क्लिष्टं राजिमत्+स्पर्शनाक्षमम्॥12॥
अर्शः+अधिमांसं वर्त्मान्तः स्तब्धं स्निग्धं सदाहरुक्।
रक्तं रक्तेन तत्+स्रावि छिन्नं छिन्नं च वर्धते॥13॥
मध्ये वा वर्त्मनः+अन्ते वा कण्डूषारुग्वती स्थिरा।
मुद्गमात्रा+असृजा ताम्रा पिटिका+अञ्जननामिका॥14॥
दोषैः+वर्त्म बहिः शूनं यत्+अन्तः सूक्ष्मखाचितम्।
सस्रावम्+अन्तरुदकं बिसाभं बिसवर्त्म तत्॥15॥
यत्+वर्त्मोत्क्लिष्टम्+उत्क्लिष्टम्+अकस्मात्+म्लानतामियात्।
रक्तदोषत्रयोत्क्लेशात्+भवति+उत्क्लिष्टवर्त्म तत्॥16॥
श्याववर्त्म मलैः सास्रैः श्यावं रुक्क्लेदशोफवत्।
श्लिष्टाख्यं वर्त्मनी श्लिष्टे कण्डूश्वयथुरागिणी॥17॥
वर्त्मनः+अन्तः खरा रूक्षाः पिटिकाः सिकतोपमाः।
सिकतावर्त्म कृष्णं तु कर्दमं कर्दमोपमम्॥18॥
बहलं बहलैः+मांसैः सवर्णैः+चीयते समैः।
कुकूणकः शिशोः+एव दन्तोत्पत्तिनिमित्तजः॥19॥
स्यात्+तेन शिशुः+उच्छूनताम्राक्षः+ वीक्षणाक्षमः।
सवर्त्मशूलपैच्छिल्यः कर्णनासाक्षिमर्दनः॥20॥
पक्ष्मोपरोधे सङ्कोचः+ वर्त्मनां जायते तथा।
खरता+अन्तर्मुखत्वं च रोम्णाम्+अन्यानि वा पुनः॥21॥
कण्टकैः+इव तीक्ष्णाग्रैः+घृष्टं तैः+अक्षि शूयते।
उष्यते च+अनिलादिद्विडल्पाहः शान्तिः+उद्धृतैः॥22॥
कनीनके बहिः+वर्त्म कठिनः+ ग्रन्थिः+उन्नतः।
ताम्रः पक्वः+अस्रपूयस्रुदलज्याध्मायते मुहुः॥23॥
वर्त्मान्तर्मांसपिण्डाभः श्वयथुर्ग्रथितः+अरुजः।
सास्रैः स्यात्+अर्बुदः+ दोषैः+विषमः+ बाह्यतः+चलः॥24॥
चतुर्विंशतिः+इति+एते व्याधयः+ वर्त्मसंश्रयाः।
आद्यः+अत्र भेषजैः साध्यः+ द्वौ ततः+अर्शः+च वर्जयेत्॥25॥
पक्ष्मोपरोधः+ याप्यः स्यात्+शेषान्+शस्त्रेण साधयेत्।
कुट्टयेत्+पक्ष्मसदनं छिन्द्यात्+तेषु+अपि च+अर्बुदम्॥26॥
भिन्द्यात्+लगणकुम्भीकाविसोत्सङ्गाञ्जनालजीः।

पोथकीश्यावसिकताश्लिष्टोत्क्लिष्टचतुष्टयम्॥27॥
सकर्दमं सबहलं विलिखेत्+सकुकूणकम्॥27 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने वर्त्मरोगविज्ञानीयः+ नाम अष्टमः+अध्यायः॥8॥
नवमः+अध्यायः।
अथ+अतः+ वर्त्मरोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कृच्छ्रोन्मीले पुराणाज्यं द्राक्षाकल्काम्बुसाधितम्।
ससितं योजयेत्+स्निग्धं नस्यधूमाञ्जनादि च॥1॥
कुम्भीकावर्त्म लिखितं सैन्धवप्रतिसारितम्।
यष्टीधात्रीपटोलीनां क्वाथेन परिषेचयेत्॥2॥
निवाते+अधिष्ठितस्य+आप्तैः शुद्धस्य+उत्तानशायिनः।
बहिः कोष्णाम्बुतप्तेन स्वेदितं वर्त्म वाससा॥3॥
निर्भुज्य वस्त्रान्तरितं वामाङ्गुष्ठाङ्गुलीधृतम्।
न स्रंसते चलति वा वर्त्म+एवं सर्वतः+ततः॥4॥
मण्डलाग्रेण तत्+तिर्यक् कृत्वा शस्त्रपदाङ्कितम्।
लिखेत्+तेन+एव पत्रैः+वा शाकशेफालिकादिजैः॥5॥
फेनेन तोयराशेः+वा पिचुना प्रमृजन्+असृक्।
स्थिते रक्ते सुलिखितं सक्षौद्रैः प्रतिसारयेत्॥6॥
यथास्वमुक्तैः+अनु च प्रक्षाल्य+उष्णेन वारिणा।
घृतेन सिक्तम्+अभ्यक्तं बध्नीयात्+मधुसर्पिषा॥7॥
ऊर्ध्वाधः कर्णयोः+दत्त्वा पिण्डीं च यवसक्तुभिः।
द्वितीये+अहनि मुक्तस्य परिषेकं यथायथम्॥8॥
कुर्यात्+चतुर्थे नस्यादीन् मुञ्चेत्+एव+अह्नि पञ्चमे।
समं नखनिभं शोफकण्डूघर्षाद्यपीडितम्॥9॥
विद्यात्+सुलिखितं वर्म लिखेत्+ भूयः+ विपर्यये।
रुक्क्ष्मवर्त्मसदनस्रंसनानि+अतिलेखनात्॥10॥
स्नेहस्वेदादिकः+तस्मिन्+इष्टः+ वातहरः क्रमः।
अभ्यज्य नवनीतेन श्वेतरोध्रं प्रलेपयेत्॥11॥
एरण्डमूलकल्केन पुटपाके पचेत्+ततः।
स्विन्नं प्रक्षालितं शुष्कं चूर्णितं पोटलीकृतम्॥12॥
स्त्रियाः क्षीरे छगल्या वा मृदिनं नेत्रसेचनम्।

शालितन्दुलकल्केन लिप्तं तद्वत् परिष्कृतम्॥13॥
कुर्यात्+नेत्रे+अतिलिखिते मृदितं दधिमस्तुना।
केवलेन+अपि वा सेकं मस्तुना जाङ्गलाशिनः॥14॥
पिटिका व्रीहिवक्त्रेण भित्त्वा तु कठिनोन्नताः।
निष्पीडयेत्+अनु विधिः परिशेषः+तु पूर्ववत्॥15॥
लेखने भेदने च+अयं क्रमः सर्वत्र वर्त्मनि।
पित्तास्रोत्क्लिष्टयोः स्वादुस्कन्धसिद्धेन सर्पिषा॥16॥
सिराविमोक्षः स्निग्धस्य त्रिवृत्+श्रेष्ठं विरेचनम्।
लिखिते स्रुतरक्ते च वर्त्मनि क्षालनं हितम्॥17॥
यष्टीकषायः, सेकः+तु क्षीरं चन्दनसाधितम्।
पक्ष्मणां सदने सूच्या रोमकूपान् विकुट्टयेत्॥18॥
ग्राहयेत्+वा जलौकोभिः, पयसेक्षुरसेन वा।
वमनं नावनं सर्पिः शृतं मधुरशीतलैः॥19॥
सञ्चुर्ण्य पुष्पकासीसं भावयेत्+सुरसारसैः।
ताम्रे दशाहं परमं पक्ष्मशाते तत्+अञ्जनम्॥20॥
पोथकीः+लिखिताः शुण्ठीसैन्धवप्रतिसारिताः।
उष्णाम्बुक्षालिताः सिञ्चेत् खदिराढकिशिग्रुभिः॥21॥
अप्सिद्धैः+द्विनिशाश्रेष्ठामधुकैः+वा समाक्षिकैः।
कफोत्क्लिष्टे विलिखिते सक्षौद्रैः प्रतिसारणम्॥22॥
सूक्ष्मैः सैन्धवकासीसमनोह्वाकणतार्क्ष्यजैः।
वमनाञ्जननस्यादि सर्वं च कफजित्+हितम्॥23॥
कर्तव्यं लगणे+अपि+एतत्+अशान्तौ+अग्निना दहेत्।
[स्विन्नां भित्त्वा विनिष्पीड्य भिषग(ङ्योत्सङ्गां चा)ञ्जननामिकाम्।
शिलैलासैन्धवनतैः सक्षौद्रैः प्रतिसारयेत्॥1॥]
कुकूणे खदिरश्रेष्ठानिम्बपत्रशृतं घृतम्॥24॥
पीत्वा धात्री वमेत्+कृष्णायष्टीसर्षपसैन्धवैः।
अभयापिप्पलीद्राक्षाक्वाथेन+एनां विरेचयेत्॥25॥
मुस्ताद्विरजनीकृष्णाकल्केन+आलेपयेत्+स्तनौ।
धूपयेत्+सर्षपैः साज्यैः शुद्धा क्वाथं च पाययेत्॥26॥
पटोलमुस्तमृद्वीकागुडूचीत्रिफलोद्भवम्।
शिशोः+तु लिखितं वर्त्म स्रुतासृक्+वा+अम्बुजन्मभिः॥27॥
धात्र्यश्मन्तकजम्बूत्थपत्रक्वाथेन सेचयेत्।

प्रायः क्षीरघृताशित्वात्+बालानां श्लेष्मजा गदाः॥28॥

तस्मात्+वमनम्+एव+अग्रे सर्वव्याधिषु पूजितम्।

सिन्धूत्थकृष्णापामार्गबीजाज्यस्तन्यमाक्षिकम्॥29॥

चूर्णः+ वचायाः सक्षौद्रः+ मदनं मधुकान्वितम्।

क्षीरं क्षीरान्नम्+अन्नं च भजतः क्रमतः शिशोः॥30॥

वमनं सर्वरोगेषु विशेषेण कुकूणके।

सप्तलारससिद्धाज्यं योज्यं च+उभयशोधनम्॥31॥

द्विनिशारोध्रयष्ट्याह्वरोहिणीनिम्बपल्लवैः।

कुकूणके हिता वर्तिः पिष्टैः+ताम्ररजोन्वितैः॥32॥

क्षीरक्षौद्रघृतोपेतं दग्धं वा लोहजं रजः।

एलारसोनकतकशङ्खोषणफणिज्जकैः॥33॥

वर्तिः कुकूणपोथक्योः सुरापिष्टैः सकट्फलैः।

पक्ष्मरोधे प्रवृद्धेषु शुद्धदेहस्य रोमसु॥24॥

उत्सृज्य द्वौ भ्रुवः+अधस्तात्+भागौ भागं च पक्ष्मतः।

यवमात्रं यवाकारं तिर्यक् छित्वा+आर्द्रवाससा॥35॥

अपनेयम्+असृक् तस्मिन्+अल्पीभवति शोणिते।

सीव्येत्+कुटिलया सूच्या मुद्गमात्रान्तरैः पदैः॥36॥

बध्वा ललाटे पट्टं च तत्र सीवनसूत्रकम्।

न+अतिगाढश्लथं सूच्या निक्षिपेत्+अथ योजयेत्॥37॥

मधुसर्पिः कवलिकां न च+अस्मिन् बन्धम्+आचरेत्।

न्यग्रोधादिकषायैः+च सक्षीरैः सेचयेत्+रुजि॥38॥

पञ्चमे दिवसे सूत्रम्+अपनीय+अवचूर्णयेत्।

गैरिकेण व्रणं युञ्ज्यात्+तीक्ष्णं नस्याञ्जनादि च॥39॥

दहेत्+अशान्तौ निर्भुज्य वर्त्मदोषाश्रयां वलीम्।

संदंशेनाधिकं पक्ष्म हृत्वा तस्य+आश्रयं दहेत्॥40॥

सूच्यग्रेण+अग्निवर्णेन, दाहः+ बाह्यालजेः पुनः।

भिन्नस्य क्षारवह्निभ्यां सुच्छिन्नस्य+अर्बुदस्य च॥41॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने वर्त्मरोगप्रतिषेधः+ नाम नवमः+अध्यायः॥9॥

दशमः+अध्यायः।

अथ+अतः+ सन्धिसितासितरोगविज्ञानीयं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

वायुः क्रुद्धः सिराः प्राप्य जलाभं जलवाहिनीः।
अश्रु स्रावयते वर्त्मशुक्लसन्धेः कनीनकात्।1॥
तेन नेत्रं सरुग्रागशोफं स्यात्+स जलास्रवः।
कफात् कफास्रवे श्वेतं पिच्छिलं बहलं स्रवेत्॥2॥
कफेन शोफः+तीक्ष्णाग्रः क्षारबुद्बुदकोपमः।
पृथुमूलबलः स्निग्धः सवर्णः+ मृदुपिच्छिलः॥3॥
महानपाकः कण्डूमान्+उपनाहः सः+ नीरुजः।
रक्तात्+ रक्तास्रवे ताम्रं बहूष्णं च+अश्रु संस्रवेत्॥4॥
वर्त्मसन्ध्याश्रया शुक्ले पिटिका दाहशूलिनी।
ताम्रा मुद्गोपमा भिन्ना रक्तं स्रवति पर्वणी॥5॥
पूयास्रवे मलाः सास्रा वर्त्मसन्धेः कनीनकात्।
स्रावयन्ति मुहुः पूयं सास्रं त्वङ्मांसपाकतः॥6॥
पूयालसः+ व्रणः सूक्ष्माः शोफसंरम्भपूर्वकः।
कनीनसन्धौ+आध्मायी पूयास्नावी सवेदनः॥7॥
कनीनस्य+अन्तरलजी शोफः+ रुक्तोददाहवान्।
अपाङ्गे वा कनीने वा कण्डूषापक्ष्मपोटवान्॥8॥
पूयास्रावी कृमिग्रन्थिः+ग्रन्थिः कृमियुतः+अर्तिमान्।
उपनाहकृमिग्रन्थिपूयालसकपर्वणीः॥9॥
शस्त्रेण साधयेत्+पञ्च सालजीनास्रवान्+त्यजेत्।
पित्तं कुर्यात्+सिते बिन्दूनसितश्यावपीतकान्॥10॥
मलाक्तादर्शतुल्यं वा सर्वं शुक्लं सदाहरुक्।
रोगः+अयं शुक्तिकासंज्ञः सशकृत्+भेदतृड्ज्वरः॥11॥
कफात्+शुक्ले समं श्वेतं चिरवृद्ध्यधिमांसकम्।
शुक्लार्म शोफः+तु+अरुजः सवर्णः+ बहुलः+अमृदुः॥12॥
गुरुः स्निग्धः+अम्बुबिन्द्वाभः+ बलासग्रथितं स्मृतम्।
बिन्दुभिः पिष्टधवलैः+उत्सन्नैः पिष्टकं वदेत्॥13॥
रक्तराजीततं शुक्लम्+उष्यते यत्+सवेदनम्।
अशोफाश्रूपदेहं च सिरोत्पातः सः+ शोणितात्॥14॥
उपेक्षितः सिरोत्पातः+ राजीस्ता एव वर्धयन्।
कुर्यात्+सास्रं सिराहर्षं तेन+अक्ष्युद्वीक्षणाक्षमम्॥15॥
सिराजाले सिराजालं बहूद्रक्तं घनोन्नतम्।
शोणितार्म समः श्लक्ष्णं पद्माभम्+अधिमांसकम्॥16॥

नीरुक् श्लक्ष्णः+अर्जुनं बिन्दुः शशलोहितलोहितः।
मृद्वाशुवृद्ध्यरुङ्मांसं प्रस्तारि श्यावलोहितम्॥17॥
प्रस्तार्यर्म मलैः सास्रैः स्नावार्म स्नावसन्निभम्।
शुष्कासृक्पिण्डवत्+श्यावं यत्+मांसं बहलं पृथु॥18॥
अधिमांसार्म तत्+ दाहघर्षवत्यः सिरावृताः।
कृष्णासन्नाः सिरासंज्ञाः पिटिकाः सर्षपोपमाः॥19॥
शुक्तिहर्षसिरोत्पातपिष्टकग्रथितार्जुनम्।
साधयेत्+औषधैः षट्कं शेषं शस्त्रेण सप्तकम्॥20॥
नवोत्थं तत्+अपि द्रव्यैः अर्मोक्तं यत्+च पञ्चधा।
तत्+छेद्यम्+असितप्राप्तं मांसस्नावसिरावृतम्॥21॥
चर्मोद्दालवत्+उच्छ्रायि दृष्टिप्राप्तं च वर्जयेत्।
पित्तं कृष्णे+अथवा दृष्टौ शुक्रं तोदाश्रुरागवत्॥22॥
छित्त्वा त्वचं जनयति तेन स्यात्+कृष्णमण्डलम्।
पक्वजम्बूनिभं किञ्चित्+निम्नं च क्षतशुक्रकम्॥23॥
तत्+कृच्छ्रसाध्यं, याप्यं तु द्वितीयपटलव्यधात्।
तत्र तोदादिबाहुल्यं सूचीविद्धाभकृष्णता॥24॥
तृतीयपटलच्छेदादसाध्यं निचितं व्रणैः।
शङ्खशुक्लं कफात्+साध्यं न+अतिरुक् शुद्धशुक्रकम्॥25॥
आताम्रपिच्छिलास्रस्रुदाताम्रपिटिका+अतिरुक्।
अजाविट्सदृशोच्छ्रायकार्ष्ण्यां वर्ज्या+असृजा+अजका॥
सिराशुक्रं मलैः सास्रैः+तत्+जुष्टं कृष्णमण्डलम्।
सतोददाहताम्राभिः सिराभिः+अवतन्यते॥27॥
अनिमित्तोष्णशीताच्छघनास्रस्रुत्+च तत्+त्यजेत्।
दोषैः सास्रैः सकृत्+कृष्णं नीयते शुक्लरूपताम्॥28॥
धवलाभ्रोपलिप्ताभं निष्पावार्धदलाकृति।
अतितीव्ररुजारागदाहश्वयथुपीडितम्॥29॥
पाकात्ययेन तत्+शुक्रं वर्जयेत्+तीव्रवेदनम्।
यस्य वा लिङ्गनाशः+अन्तः श्यावं यत्+वा सलोहितम्॥30॥
अत्युत्सेधावगाढं वा साश्रु नाडीव्रणावृतम्।
पुराणं विषमं मध्ये विच्छिन्नं यत्+च शुक्रकम्॥31॥
पञ्चेत्युक्ता गदाः कृष्णे साध्यासाध्यविभागतः॥31 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने सन्धिसितासितरोगविज्ञानीयः+ नाम दशमः+अध्यायः॥10॥

एकादशोध्यायः।

अथ+अतः+ सन्धिसितासितरोगप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥

उपनाहं भिषक् स्विन्नं भिन्नं व्रीहिमुखेन च।

लेखयेत्+मण्डलाग्रेण ततः+च प्रतिसारयेत्॥1॥

पिप्पलीक्षौद्रसिन्धूत्थैः+बध्नीयात्+पूर्ववत्+ततः।

पटोलपत्रामलकक्वाथेन+आश्च्योतयेत्+च तम्॥2॥

पर्वणी बडिशेन+आत्ता बाह्यसन्धित्रिभागतः।

वृद्धिपत्रेण वर्ध्या+अर्धे स्यात्+अश्रुगतिः+अन्यथा॥3॥

चिकित्सा च+अर्मवत्+क्षौद्रसैन्धवप्रतिसारिता।

पूयालसे सिरां विध्येत्+ततः+तम्+उपनाहयेत्॥4॥

कुर्वीत च+अक्षिपाकोक्तं सर्वं कर्म यथाविधिः।

सैन्धवार्द्रककासीसलोहताम्रैः सुचूर्णितैः॥5॥

चूर्णाञ्जनं प्रयुञ्जीत सक्षौद्रैः+वा रसक्रियाम्।

कृमिग्रन्थिं करीषेण स्विन्नं भित्त्वा विलिख्य च॥6॥

त्रिफलाक्षौद्रकासीससैन्धवैः प्रतिसारयेत्।

पित्ताभिष्यन्दवत्+शुक्तिं बलासाह्वयपिष्टके॥7॥

कफाभिष्यन्दवत्+मुक्त्वा सिराव्यधम्+उपाचरेत्।

बीजपूररसाक्तं च व्योषकट्फलमञ्जनम्॥8॥

जातीमुकुलसिन्धूत्थदेवदारुमहौषधैः।

पिष्टैः प्रसन्नया वर्तिः शोफकण्डूघ्नम्+अञ्जनम्॥9॥

रक्तस्यन्दवत्+उत्पातहर्षजालार्जुनक्रिया।

सिरोत्पाते विशेषेण घृतमाक्षिकम्+अञ्जनम्॥10॥

सिराहर्षे तु मधुना श्लक्ष्णघृष्टं रसाञ्जनम्।

अर्जुने शर्करामस्तुक्षौद्रैः+आश्च्योतनं हितम्॥11॥

स्फटिकः कुङ्कुमं शङ्खः+ मधुकं मधुना+अञ्जनम्।

मधुना च+अञ्जनं शङ्खः फेनः+ वा सितया सह॥12॥

अर्मोक्तं पञ्चधा तत्र तनु धूमाविलं च यत्।

रक्तं दधिनिभं यत्+च शुक्रवत्+तस्य भेषजम्॥13॥

उत्तानस्य+इतरत् स्विन्नं ससिन्धूत्थेन च+अञ्जितम्।

रसेन बीजपूरस्य निमील्याक्षि विमर्दयेत्॥14॥

इत्थं संरोषिताक्षस्य प्रचले+अर्माधिमांसके।

धृतस्य निर्चलं मूर्ध्नि वर्त्मनोः+च विशेषतः॥15॥

अपाङ्गम्+ईक्षमाणस्य वृद्धे+अर्मणि कनीनकात्।

बली स्यात्+यत्र तत्र+आर्म बडिशेन+अवलम्बितम्॥16॥

न+अत्यायतं मुचुण्ड्या वा सूच्या सूत्रेण वा ततः।

समन्तान्+मण्डलाग्रेण मोचयेत्+अथ मोक्षितम्॥17॥

कनीनकम्+उपानीय चतुर्भागावशेषितम्।

छिन्द्यात्+कनीनकं रक्षेत्+वाहिनीः+च+अश्रुवाहिनीः॥18॥

कनीनकव्यधादश्रु नाडी च+अक्ष्णि प्रवर्तते।

वृद्धे+अर्मणि तथा+अपङ्गात्+पश्यतः+अस्य कनीनकम्।

सम्यक् छिन्नं मधुव्योषसैन्धवप्रतिसारितम्।

उष्णेन सर्पिषा सिक्तम्+अभ्यक्तं मधुसर्पिषा॥20॥

बध्नीयात्+सेचयेत्+मुक्त्वा तृतीयादिदिनेषु च।

करञ्जबीजसिद्धेन क्षीरेण क्वथितैः+तथा॥21॥

सक्षौद्रैः+द्विनिशारोध्रपटोलीयष्टिकिंशुकैः।

कुरण्टमुकुलोपेतैः+मुञ्चेत्+एव+अह्नि सप्तमे॥22॥

सम्यक् छिन्ने भवेत्+स्वास्थ्यं हीनातिच्छेदजान् गदान्।

सेकाञ्जनप्रभृतिभिः+जयेत्+लेखनबृंहणैः॥23॥

सितामनःशिलैलेयलवणोत्तमनागरम्।

अर्धकर्षोन्मितं तार्क्ष्यं पलार्धं च मधुद्रुतम्॥24॥

अञ्जनं श्लेष्मतिमिरपिल्लशुक्रार्मशेषजित्।

त्रिफलैकतमद्रव्यत्वचं पानीयकल्किताम्॥25॥

शरावपिहितां दग्ध्वा कपाले चूर्णयेत्+ततः।

पृथक्+शेषौषधरसैः पृथक्+एव च भाविता॥26॥

सा मषी शोषिता पेष्या भूयः+ द्विलवणान्विता।

त्रीणि+एतानि+अञ्जनानि+आह लेखनानि परं निमिः॥27॥

सिराजाले सिरा याः+तु कठिना लेखनौषधैः।

न सिद्ध्यन्ति+अर्मवत्+तासां पिटिकानां च साधनम्॥28॥

दोषानुरोधात्+शुक्रेषु स्निग्धरूक्षा वरा घृतम्।

तिक्तम्+ऊर्ध्वम्+असृक्+स्रावः+ रेकसेकादि च+इष्यते॥29॥

त्रिस्त्रिवृद्वारिणा पक्वं क्षतशुक्रे घृतं पिबेत्।

सिरया+अनु हरेत्+रक्तं जलौकोभिः+च लोचनात्॥30॥
सिद्धेनोत्पलकाकोलीद्राक्षायष्टिविदारिभिः।
ससितेन+अजपयसा सेचनं सलिलेन वा॥31॥
रागाश्रुवेदनाशान्तौ परं लेखनम्+अञ्जनम्।
वर्तयः+ जातिमुकुललाक्षागैरिकचन्दनैः॥32॥
प्रसादयन्ति पित्तास्रं घ्नन्ति च क्षतशुक्रकम्।
दन्तैः+दन्तिवराहोष्ट्रगवाश्वाजखरोद्भवैः॥33॥
सशङ्खमौक्तिकाम्भोधिफेनैः+मरिचपादिकैः।
क्षतशुक्रम्+अपि व्यापि दन्तवर्तिः+निवर्तयेत्॥34॥
तमालपत्रं गोदन्तशङ्खफेनः+अस्थि गार्दभम्।
ताम्रं च वर्तिः+मूत्रेण सर्वशुक्रकनाशिनी॥35॥
रत्नाति दन्ताः शृङ्गाणि धातवस्त्र्यूषणं त्रुटिः।
करञ्जबीजं लशुनः+ व्रणसादि च भेषजम्॥36॥
सव्रणाव्रणगम्भीरत्वक्स्थशुक्रघ्नम्+अञ्जनम्।
निम्नम्+उन्नमयेत्+स्नेहपाननस्यरसाञ्जनैः॥37॥
सरुजं नीरुजं तृप्तिपुटपाकेन शुक्रकम्।
शुद्धशुक्रे निशायष्टीसारिवाशाबराम्भसा॥38॥
सेचनं रोध्रपोटल्या कोष्णाम्भोमग्नया+अथवा।
बृहतीमूलयष्ट्याह्वताम्रसैन्धवनागरैः॥39॥
धात्रीफलाम्बुना पिष्टैः+लेपितं ताम्रभाजनम्।
यवाज्यामलकीपत्रैः+बहुशः+ धूपयेत्+ततः॥40॥
तत्र कुर्वीत गुटिकास्ता जलक्षौद्रपेषिताः।
महानीला इति ख्याताः शुद्धशुक्रहराः परम्॥41॥
स्थिरे शुक्रे घने च+अस्य बहुशः+अपहरेत्+असृक्।
शिरःकायविरेकान्+च पुटपाकान्+च भूरिशः॥42॥
कुर्यात्+मरिचवैदेहीशिरीषफलसैन्धवैः।
हर्षणं त्रिफलाक्वाथपीतेन लवणेन वा॥43॥
कुर्यात्+अञ्जनयोगौ वा श्लोकार्धगदितौ+इमौ।
शङ्खकोलास्थिकतकद्राक्षामधुकमाक्षिकैः॥44॥
सुरादन्तार्णवमलैः शिरीषकुसुमान्वितैः।
धात्रीफणिज्जकरसे क्षारः+ लाङ्गलिकोद्भवः॥45॥
उषितः शोषितः+चूर्णः शुक्रहर्षणम्+अञ्जनम्।

मुद्गा वा निस्तुषाः पिष्टाः शङ्खक्षौद्रसमायुताः॥46॥

सारः+ मधूकान्+मधुमान् मज्जा वा+अक्षात्+समाक्षिका।

गोखराश्वोष्ट्रदशनाः शङ्खः फेनः समुद्रजः॥47॥

वर्तिः+अर्जुनतोयेन हृष्टशुक्रकनाशिनी।

उत्सन्नं वा सशल्यं वा शुक्रं वालादिभिः+लिखेत्॥48॥

सिराशुक्रे तु+अदृष्टिघ्ने चिकित्सा व्रणशुक्रवत्।

पुण्ड्रयष्ट्याह्वकाकोलीसिंहीलोहनिशाञ्जनम्॥49॥

कल्कितं छागदुग्धेन सघृतैः+धूपितं यवैः।

धात्रीपत्रैः+च पर्यायात्+वर्तिः+अत्र+अञ्जनं परम्॥50॥

अशान्तावर्मवत्+शस्त्रम्+अजकाख्ये च योजयेत्।

अजकायाम्+असाध्यायां शुक्रे+अन्यत्र च तत्+विधे॥51॥

वेदनोपशमं स्नेहपानासृक्स्रावणादिभिः।

कुर्यात्+बीभत्सतां जेतुं शुक्रस्य+उत्सेधसाधनम्॥52॥

नालिकेरास्थिभल्लाततालवंशकरीरजम्।

भस्माद्भिः स्नावयेत्+ताभिः+भावयेत्+करभास्थिजम्॥53॥

चूर्णं शुक्रेषु+असाध्येषु तत्+वैवर्ण्यघ्नम्+अञ्जनम्।

साध्येषु साधनाय+अलम्+इदम्+एव च शीलितम्॥54॥

अजकां पार्श्वतः+ विध्वा सूच्या विस्राव्य च+उदकम्।

समं प्रपीड्य+अङ्गुष्ठेन वसार्द्रेण+अनु पूरयेत्॥55॥

व्रणं गोमांसचूर्णेन बद्धं बद्धं विमुच्य च।

सप्तरात्रात्+ व्रणे रुढे कृष्मभागे समे स्थिरे॥56॥

स्नेहाञ्जनं च कर्तव्यं नस्यं च क्षीरसर्पिषा।

तथा+अपि पुनराध्माने भेदच्छेदादिकां क्रियाम्॥57॥

युक्त्या कुर्यात्+यथा न+अतिच्छेदेन स्यत्+निमज्जनम्॥57 1/2॥

नित्यं च शुक्रेषु शृतं यथास्वं पाने च मर्शे च घृतं विदध्यात्।

न हीयते लब्धबला तथा+अन्तः+तीक्ष्णाञ्जनैः+दृक् सततं प्रयुक्तैः॥58 1/2॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने

सन्धिसितासितरोगप्रतिषेधः+ नाम+एकादशः+अध्यायः॥11॥

द्वादशः+अध्यायः।

अथ+अतः+ दृष्टिरोगविज्ञानीयम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

सिरानुसारिणि मले प्रथमं पटलं श्रिते।

अव्यक्तम्+ईक्षते रूपं व्यक्तम्+अपि+अनिमित्ततः॥1॥

प्राप्ते द्वितीयं पटलम्+अभूतम्+अपि पश्यति।

भूतं तु यत्नात्+आसन्नं दूरे सूक्ष्मं च नेक्षते॥2॥

दूरान्तिकस्थं रूपं च विपर्यासेन मन्यते।

दोषे मण्डलसंस्थाने मण्डलानि+इव पश्यति॥3॥

द्विधा+एकं दृष्टिमध्यस्थे बहुधा बहुधास्थिते।

दृष्टेः+अभ्यन्तरगते ह्रस्ववृद्धविपर्ययम्॥4॥

नान्तिकस्थम्+अधःसंस्थे दूरगं नोपरं स्थिते।

पार्श्वे पश्येत्+न+पार्श्वस्थे तिमिराख्यः+अयम्+आमयः॥5॥

प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते।

तेन+ऊध्वम्+ईक्षते न+अधः+तनुचैलावृतोपमम्॥6॥

यथा वर्णं च रज्येत दृष्टिहीयेत च क्रमात्।

तथा+अपि+उपेक्षमाणस्य चतुर्थं पटलं गतः॥7॥

लिङ्गनाशं मलः कुर्वन् छादयेत्+दृष्टिमण्डलम्।

तत्र वातेन तिमिरे व्याविद्धम्+इव पश्यति॥8॥

चलाविलारुणाभासं प्रसन्नं चेक्षते मुहुः।

जालानि केशान् मशकान् रश्मीन्+च+उपेक्षिते+अत्र च॥9॥

काचीभूते दृगरुणा पश्यति+आस्यमनासिकम्।

चन्द्रदीपाद्यनेकत्वं वक्रम्+ऋजु+अपि मन्यते॥10॥

वृद्धः काचः+ दृशं कुर्यात्+रजोधूमावृताम्+इव।

स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम्॥11॥

स लिङ्गनाशः+ वाते तु सङ्कोचयति दृक्सिराः।

दृग्मण्डलं विशति+अन्तर्गम्भीरा दृगसौ स्मृता॥12॥

पित्तजे तिमिरे विद्युत्+खद्योतद्योतदीपितम्।

शिखितित्तिरिपत्राभं प्रायः+ नीलं च पश्यति॥13॥

काचे दृक् काचनीलाभा तादृक्+एव च पश्यति।

अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च॥24॥

भृङ्गनीलां निरालोका दृक् स्निग्धा लिङ्गनाशतः।

दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शिनी॥15॥

भवेत्+पित्तविदग्धाख्या पीता पीताभदर्शना।

कफेन तिमिरे प्रायः स्निग्धं श्वेतं च पश्यति॥16॥

शङ्खेदुकुन्दकुसुमैः कुमुदैः+इव च+आचितम्।

काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैः+इव+अचितम्॥17॥
सिताभा सा च दृष्टिः स्यात्+लिङ्गनाशे तु लक्ष्यते।
मूर्तः कफः+ दृष्टिगतः स्निग्धः+ दर्शननाशनः॥18॥
बिन्दुः+जलस्य+इव चलः पद्मिनीपुटसंस्थितः।
उष्णे सङ्कोचम्+आयाति छायायां परिसर्पति॥19॥
शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा।
रक्तेन तिमिरे रक्तं तमोभूतं च पश्यति॥20॥
काचेन रक्ता कृष्णा वा दृष्टिः+तादृक् च पश्यति।
लिङ्गनाशे+अपि तादृक्+ दृङ् निष्प्रभा हतदर्शना॥21॥
संसर्गसन्निपातेषु विद्यात्+सङ्कीर्णलक्षणान्।
तिमिरादीन्+अकस्मात्+च तैः स्यात्+व्यक्ताकुलेक्षणः॥22॥
तिमिरे, शेषयोः+दृष्टौ चित्रः+ रागः प्रजायते।
द्योत्यते नकुलस्य+इव यस्य दृङ् निचिता मलैः॥23॥
नकुलान्धः सः+ तत्र+अह्निः+ चित्रं पश्यति नः+ निशि।
अर्के+अस्तम्+अस्तकन्यस्तगभस्तौ स्तम्भम्+आगताः॥24॥
स्थगयन्ति दृशं दोषा दोषान्धः सः+ गदः+अपरः।
दिवाकरकरस्पृष्टा भ्रष्टा दृष्टिपथान्मलाः॥25॥
विलीनलीना यच्छन्ति व्यक्तम्+अत्र+अह्नि दर्शनम्।
उष्णतप्तस्य सहसा शीतवारिनिमज्जनात्॥26॥
त्रिदोषरक्तसंपृक्तः+ याति+ऊष्मोर्ध्वं ततः+अक्षिणि।
दाहोषे मलिनं शुक्लम्+अहनि+आविलदर्शनम्॥27॥
रात्रौ+आन्ध्यं च जायेत विदग्धोष्णेन सा स्मृता।
भृशम्+अम्लाशनात्+दोषैः सास्रैः+या दृष्टिः+आचिता॥28॥
सक्लेदकण्डूकलुषा विदग्धा+अम्लेन सा स्मृता।
शोकज्वरशिरोरोगसन्तप्तस्य+अनिलादयः॥29॥
धूमाविलां धूमदृशं दृशं कुर्युः सः+ धूमरः।
सहसा+एव+अल्पसत्त्वस्य पश्यतः+ रूपम्+अद्भुतम्॥30॥
भास्वरं भास्करादिं वा वाताद्या नयनाश्रिताः।
कुर्वन्तिः तेजः संशोष्य दृष्टिं मुषितदर्शनाम्॥31॥
वैडूर्यवर्णां स्तिमितां प्रकृतिस्थाम्+इव+अव्यथाम्।
औपसर्गिक इति+एषः लिङ्गनाशः+अत्र वर्जयेत्॥32॥
विना कफात्+लिङ्गनाशान् गम्भीरां ह्रस्वजाम्+अपि।

षट् काचा नकुलान्धः+च याप्याः, शेषान्+तु साधयेत्॥
द्वादश+इति गदा दृष्टौ निर्दिष्टाः सप्तविंशतिः॥33 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने दृष्टिरोगविज्ञानीयः+ नाम द्वादशः+अध्यायः॥12॥
त्रयोदशः+अध्यायः।
अथ+अतः+तिमिरप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
तिमिरं काचतां याति काचः+अपि+आन्ध्यम्+उपेक्षया।
नेत्ररोगेषु+अतः+ घोरं तिमिरं साधयेत्+ द्रुतम्॥1॥
तुलां पचेत जीवन्त्या द्रोणे+अपां पादशेषिते।
तत्+क्वाथे द्विगुणक्षीरं घृतप्रस्थं विपाचयेत्॥2॥
प्रपौण्डरीककाकोलीपिप्पलीरोध्रसैन्धवैः।
शताह्वामधुकद्राक्षासितादारुफलत्रयैः॥3॥
कार्षिकैः+निशि तत्+पीतं तिमिरापहरं परम्।
द्राक्षाचन्दनमञ्जिष्ठाकाकोलीद्वयजीवकैः॥4॥
सिताशतावरीमेदापुण्ड्राह्वमधुकोत्पलैः।
पचेत्+जीर्णघृतप्रस्थं समक्षीरं पिचून्मितैः॥5॥
हन्ति तत्+काचतिमिररक्तराजीशिरोरुजः।
पटोलनिम्बकटुकादार्वीसेव्यवरावृषम्॥6॥
सधन्वयासत्रायन्तीपर्पटं पालिकं पृथक्।
प्रस्थम्+आमलकानां च क्वाथयेत्+नल्वमे+अम्भसि॥7॥
तदाढके+अर्धपलिकैः पिष्टैः प्रस्थं घृतात्+पचेत्।
मुस्तभूनिम्बयष्ट्याह्वकुटजोदीच्यचन्दनैः॥8॥
सपिप्पलीकैः+तत्+सर्पिः+घ्राणकर्णास्यरोगजित्।
विद्रधिज्वरदुष्टारुर्विसर्पापचिकुष्ठनुत्॥9॥
विशेषात्+शुक्रतिमिरनक्तान्ध्योष्णाम्लदाहहृत्।
त्रिफलाष्टपलं क्वाथ्यं पादशेषं जलाढके॥20॥
तेन तुल्यपयस्केन त्रिफलापलकल्कवान्।
अर्धप्रस्थः+ घृतात्+सिद्धः सितया माक्षिकेण वा॥11॥
युक्तं पिबेत्+तत्+तिमिरी तत्+युक्तं वा वरारसम्।
यष्टीमधुद्विकाकोलीव्याघ्रीकृष्णामृतोत्पलैः॥12॥
पालिकैः ससिताद्राक्षैः+घृतप्रस्थं पचेत्+समैः।

अजाक्षीरवरावासामार्कवस्वरसैः पृथक्॥13॥
महात्रैफलम्+इति+एतत्+परं दृष्टिविकारजित्।
त्रैफलेन+अथ हविषा लिहानः+त्रिफलां निशि॥14॥
यष्टीमधुकसंयुक्तां मधुना च परिप्लुताम्।
मासम्+एकं हिताहारः पिबन्+आमलकोदकम्॥15॥
सौपर्णं लभते चक्षुः+इति+आह भगवान्+निमिः।
ताप्यायोहेमयष्ट्याह्वसिताजीर्णाज्यमाक्षिकैः॥16॥
संयोजिता यथाकामं तिमिरघ्नी वरा वरा।
सघृतं वा वराक्वाथं शीलयेत्+तिमिरामयी॥17॥
अपूपसूपसक्तून् वा त्रिफलाचूर्णसंयुतान्।
पायसं वा वरायुक्तं शीतं समधुशर्करम्॥18॥
प्रातर्भक्तस्य वा पूर्वम्+अद्यात्+पथ्यां पृथक् पृथक्।
मृद्वीकाशर्कराक्षौद्रैः सततं तिमिरातुरः॥19॥
स्रोतोजांशान्+चतुःषष्टि ताम्रायोरूप्यकाञ्चनैः।
युक्तान् प्रत्येकम्+एकांशैः+अन्धम्+उषोदरस्थितान्॥20॥
ध्मापयित्वा समावृत्तं ततः+तत्+च निषेचयेत्।
रसस्कन्धकषायेषु सप्तकृत्वः पृथक् पृथक्॥21॥
वैडूर्यमुक्ताशङ्खानां त्रिभिः+भागैः+युतं ततः।
चूर्णाञ्जनं प्रयुञ्जीतं तत्+सर्वतिमिरापहम्॥22॥
मांसीत्रिजातकायः कुङ्कुमनीलोत्पलाभयातुत्थैः।
सितकाचशङ्खफेनकमरिचाञ्जनपिप्पलीमधुकैः॥23॥
चन्द्रे+अश्विनीसनाथे सुचूर्णितैः+अञ्जयेत्+युगलम्+अक्ष्णोः।
तिमिरार्मरक्तराजीकण्डूकाचादिशमम्+इच्छन्॥24॥
मरिचवरलवणभागौ भागौ द्वौ कणसमुद्रफेनाभ्याम्।
सौवीरभागनवकं चित्रायां चूर्णितं कफाम्+अयजित्॥25॥
[मनोह्वातुत्थकस्तूरीमांसीमलयरोचनाः।
दशकर्पूरसंयुक्तम्+अशीतिगुणम्+अञ्जनम्॥1॥
पिष्टं चित्राश्विनीपुष्ये षड्विधे तिमिरे हितम्।
प्रसादनं च दृष्टेः स्यात्+चक्षुषेण+अवभाषितम्॥2॥]
द्राक्षामृणालीस्वरसे क्षीरमद्यवसासु च।
पृथक् दिव्याप्सु स्रोतोजं सप्तकृत्वः+ निषेचयेत्॥26॥
तत्+चूर्णितं स्थितं शङ्खे दृक्प्रसादनम्+अञ्जनम्।

शस्तं सर्वाक्षिरोगेषु विदेहपतिनिर्मितम्॥27॥
निर्दग्धं बादराङ्गारैः+तुत्थं च+इत्थं निषेचितम्।
क्रमात्+अजापयः सर्पिः क्षौद्रे तस्मात् पलद्वयम्॥28॥
कार्षिकैः+ताप्यमरिचस्रोतोजकटुकानतैः।
पटुरोध्रशिलापथ्याकणैलाञ्जनफेनकैः॥29॥
युक्तं पलेन यष्ट्याः+च मूषान्तर्ध्मातचूर्णितम्।
हन्ति काचार्मनक्तान्ध्यरक्तराजीः सुशीलितः॥30॥
चूर्णः+ विशेषात्+तिमिरं भास्करः+ भास्करः+ यथा।
त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम्॥31॥
शुल्बतालकयोः+द्वौ द्वौ वङ्गस्य+एकः+अञ्जनात्+त्रयम्।
अन्धमूषीकृतं ध्मातं पक्वं विमलम्+अञ्जनम्॥32॥
तिमिरान्तकरं लोके द्वितीयः+ इव भास्करः।
गोमूत्रे छगणरसे+अम्लकाञ्जिके च
स्त्रीस्तन्ये हविषि विषे च माक्षिके च।
यत्+तुत्थं ज्वलितम्+अनेकशः+ निषिक्तं
तत्+कुर्यात्+गरुडसमं नरस्य चक्षुः॥33॥
श्रेष्ठाजलं भृङ्गरसं सविषाज्यम्+अजापयः।
यष्टीरसं च यत्+सीसं सप्तकृत्वः पृथक् पृथक्॥34॥
तप्तं तप्तं पायितं तत्+शलाका नेत्रे युक्ता साञ्जना+अनञ्जना वा।
तैमिर्यार्मस्रावपैच्छिल्यपैल्लं कण्डूं जाड्यं रक्तराजीं च हन्ति॥35॥
रसेन्द्रभुजगौ तुल्यौ तयोः+तुल्यम्+अथ+अञ्जनम्।
ईषत्+कर्पूरसंयुक्तम्+अञ्जनं तिमिरापहम्॥36॥
यः+ गृध्रः+तरुणरविप्रकाशगल्लः+तस्य+आस्यं समयम्+ऋतस्य गोशकृद्भिः।
निर्दग्धं समधृतम्+अञ्जनं च पेष्यं योगः+अयं नयनबलं करोति गार्ध्रम्॥37॥
कृष्णसर्पवदने सहविष्कं दग्धम्+अञ्जननिःसृतधूमम्।
चूर्णितं नलदपत्रविमिश्रं भिन्नतारम्+अपि रक्षति चक्षुः॥38॥
कृष्णसर्पं मृतं न्यस्य चतुरः+च+अपि वृश्चिकान्।
क्षीरकुम्भे त्रिसप्ताहं क्लेदयित्वा प्रमन्थयेत्॥39॥
तत्र यत्+नवनीतं स्यात्+पुष्णीयात्+तेन कुक्कुटम्।
अन्धः+तस्य पुरीषेण प्रेक्षते ध्रुवम्+अञ्जनात्॥40॥
कृष्णसर्पवसा शङ्खः कतकात् फलम्+अञ्जनम्।
रसक्रिया+इयम्+अचिरात्+अन्धानां दर्शनप्रदा॥41॥

मरिचानि दशार्धपिचुः+ताप्यात्+तुत्थात्+पलं पिचुः+यष्ट्याः।
क्षीरार्द्रदग्धम्+अञ्जनम्+अप्रतिसाराख्यम्+उत्तमं तिमिरे॥42॥
अक्षबीजमरिचामलकत्वक्तुत्थयष्टिमधुकैः+जलपिष्टैः।
छायया+एव गुटिकाः परिशुष्का नाशयन्ति तिमिराणि+अचिरेण॥43॥
मरिचामलकजलोद्भवतुत्थाञ्जनताप्यधातुभिः क्रमवृद्धैः।
षण्माक्षिक इति योगः+तिमिरार्मक्लेदकाचकण्डूहन्ता॥44॥
रत्नानि रूप्यं स्फटिकं सुवर्णं स्रोतोञ्जनं ताम्रमयः सशङ्खम्।
कुचन्दनं लोहितगैरिकं च चूर्णाञ्जनं सर्वदृक्+आमयघ्नम्॥45॥
तिलतैलम्+अक्षतैलं भृङ्गस्वरसः+असनात्+च निर्यूहः।
आयसपात्रविपक्वं करोति दृष्टेः+बलं नस्यम्॥46॥
दोषानुरोधेन च न+एकशस्तं स्नेहास्रविस्रावणरेकनस्यैः।
उपाचरेत्+अञ्जनमूर्धबस्तिबस्तिक्रियातर्पणलेपसेकैः॥47॥
सामान्यं साधनम्+इदम्+प्रतिदोषम्+अतः शृणु॥48॥
वातजे तिमिरे तत्र दशमूलाम्भसा घृतम्।
क्षीरे चतुर्गुणे श्रेष्ठाकल्कपक्वं पिबेत्+ततः॥49॥
त्रिफलापञ्चमूलानां कषायं क्षीरसंयुतम्।
एरण्डतैलसंयुक्तं योजयेत्+च विरेचनम्॥50॥
समूलजालजीवन्तीतुलां द्रोणे+अम्भसः पचेत्।
अष्टभागस्थिते तस्मिन्+तैलप्रस्थं पयःसमे॥51॥
बलात्रितयजीवन्तीवरीमूलैः पलोन्मितैः।
यष्टीपलैः+चतुर्भिः+च लोहपात्रे विपाचयेत्॥52॥
लोहः+ एव स्थितं मासं नावनात्+ऊर्ध्वजत्रुजान्।
वातपित्तामयान् हन्ति तत्+विशेषात्+दृगाश्रयान्॥53॥
केशास्यकन्धरास्कन्धपुष्टिलावण्यकान्तिदम्।
सितैः+अण्डजटासिंहीफलदारुवचानतैः॥54॥
घोषया बिल्वमूलैः+च तैलं पक्वं पयोन्वितम्।
नस्यं सर्वोर्ध्वजत्रूत्थवातश्लेष्मामयार्तिजित्॥55॥
वसा+अञ्जने च वैयाघ्री वाराही वा प्रशस्यते।
गृध्राहिकुक्कुटोत्था वा मधुकेन+अन्विता पृथक्॥56॥
प्रत्यञ्जने च स्रोतोजं रसक्षीरघृते क्रमात्।
निषिक्तं पूर्ववत्+योज्यं तिमिरघ्नम्+अनुत्तमम्॥57॥
न चेत्+एवं शमं याति ततः+तर्पणम्+आचरेत्।

शताह्वाकुष्ठनलदकाकोलीद्वययष्टिभिः॥58॥
प्रपौण्डरीकसरलपिप्पलीदेवदारुभिः।
सर्पिः+अष्टगुणक्षीरं पक्वं तर्पणम्+उत्तमम्॥59॥
मेदसः+तद्वत्+ऐणेयात्+दुग्धसिद्धात् खजाहतात्।
उद्धृतं साधितं तेजः+ मधुकोशीरचन्दनैः॥60॥
श्वाविच्छल्यकगोधानां दक्षतित्तिरिबर्हिणाम्।
पृथक्+पृथक्+अनेन+एव विधिना कल्पयेत्+वसाम्॥61॥
प्रसादनं स्नेहनं च पुटपाकं प्रयोजयेत्।
वातपीनसवत्+च+अत्र निरूहं सानुवासनम्॥62॥
पित्तजे तिमिरे सर्पिः+जीवनीयफलत्रयैः।
विपाचितं पाययित्वा स्निग्धस्य व्यधयेत्+सिराम्॥63॥
शर्करैलात्रिवृच्चूर्णैः+मधुयुक्तैः+विरेचयेत्।
सुशीतान् सेकलेपादीन् युञ्ज्यात्+नेत्रास्यमूर्धसु॥64॥
सारिवापद्मकोशीरम्+उक्ताशाबरचन्दनैः।
वर्तिः शस्ता+अञ्जने, चूर्णः+तथा पत्रोत्पलाञ्जनैः॥65॥
सनागपुष्पकर्पूरयष्ट्याह्वस्वर्णगैरिकैः।
सौवीराञ्जनतुत्थकशृङ्गीधात्रीफलस्फटिककर्पूरम्॥66॥
पञ्चांशं पञ्चाशं त्र्यंशम्+अथ+एकांशम्+अञ्जनं तिमिरघ्नम्।
नस्यं च+आज्यं शृतं क्षीरजीवनीयसितोत्पलैः॥67॥
श्लेष्मोद्भवे+अमृताक्वाथवराकणशृतं घृतम्।
विध्येत्+सिरां पीतवतः+ दद्यात्+च+अनु विरेचनम्॥68॥
क्वाथं पूगाभयाशुण्ठीकृष्णाकुम्भनिकुम्भजम्।
ह्रीबेरदारुद्विनिशाकृष्णाकल्कैः पयोन्वितैः॥69॥
द्विपञ्चमूलनिर्यूहे तैलं पक्वं च नावनम्।
शङ्खप्रियङ्गुनेपालीकटुत्रिकफलत्रिकैः॥70॥
दृग्वैमल्याय विमला वर्तिः स्यात् कोकिला पुनः।
कृष्णलोहरजोव्योषसैन्धवत्रिफलाञ्जनैः॥71॥
शशगोखरसिंहोष्ट्रद्विजा लालाटम्+अस्थि च।
श्वेतगोवालमरिचशङ्खचन्दनफेनकम्॥72॥
पिष्टं स्तन्याजदुग्धाभ्यां वर्तिः+तिमिरशुक्रजित्।
रक्तजे पित्तवत्+सिद्धिः शीतैः+च+अस्रं प्रसादयेत्॥73॥
द्राक्षया नलदरोध्रयष्टिभिः शङ्खताम्रहिमपद्मपद्मकैः।

सोत्पलैः+छगलदुग्धवर्तितैः+अस्रजं तिमिरम्+आशु नश्यति॥74॥
संसर्गसन्निपातोत्थे यथादोषोदयं क्रिया।
सिद्धं मधूककृमिजिन्मरिचामरदारुभिः॥75॥
सक्षीरं नावनं तैलं पिष्टैः+लेपः+ मुखस्य च।
नतनीलोत्पलानन्तायष्ट्याह्वसुनिषण्णकैः॥76॥
साधितं नावने तैलं शिरोबस्तौ च शस्यते।
दद्यात्+उशीरनिर्यूहे चूर्णितं कणसैन्धवम्॥77॥
तत्+स्रुतं सघृतं भूयः पचेत्+क्षौद्रं घने क्षिपेत्।
शीते च+अस्मिन् हितम्+इदं सर्वजे तिमिरे+अञ्जनम्॥78॥
अस्थीनि मज्जपूर्णानि सत्त्वानां रात्रिचारिणाम्।
स्रोतोजाञ्जनयुक्तानि वहति+अम्भसि वासयेत्॥79॥
मासं विंशतिरात्रं वा ततः+च+उद्धृत्य शोषयेत्।
समेषशृङ्गीपुष्पाणि सयष्ट्याह्वानि तानि+अनु॥80॥
चूर्णितानि+अञ्जनं श्रेष्ठं तिमिरे सान्निपातिके।
काचे+अपि+एषा क्रिया मुक्त्वा सिरां, यन्त्रनिपीडिताः॥81॥
आन्ध्याय स्युः+मला दद्यात्+स्राव्ये तु+अस्रे जलौकसः।
गुडः फेनः+अञ्जनं कृष्णां मरिचं कुङ्कुमात्+रजः॥82॥
रसक्रिया+इयं सक्षौद्रा काचयापनम्+अञ्जनम्।
नकुलान्धे त्रिदोषोत्थे तैमिर्यविहितः+ विधिः॥83॥
रसक्रिया घृतक्षौद्रगोमयस्वरसद्रुतैः।
तार्क्ष्यगैरिकतालीसैः+निशान्धे हितम्+अञ्जनम्॥84॥
दध्ना विघृष्टं मरिचं रात्र्यन्धे+अञ्जनम्+उत्तमम्।
करञ्जिकोत्पलस्वर्णगैरिकाम्भोजकेसरैः॥84॥
पिष्टैः+गोमयतोयेन वर्तिः+दोषान्धनाशिनी।
अजामूत्रेण वा कौन्तीकृष्णास्रोतोजसैन्धवैः॥86॥
कालानुसारीत्रिकटुत्रिफलालमनःशिलाः।
सफेनाश्छागदुग्धेन रात्र्यन्धे वर्तयः+ हिताः॥87॥
सन्निवेश्य यकृन्मध्ये पिप्पलीः+अदहन्+पचेत्।
ताः शुष्का मधुना घृष्टा निशान्धे श्रेष्ठम्+अञ्जनम्॥88॥
खादेत्+च प्लीहयकृती माहिषे तैलसर्पिषा।
घृते सिद्धानि जीवन्त्याः पल्लवानि च भक्षयेत्॥89॥
तथा+अतिमुक्तकैः+अण्डशेफाल्यभीरुजानि च।

भृष्टं घृतं कुम्भयोनेः पत्रैः पाने च पूजितम्॥90॥

धूमराख्याम्लपित्तोष्णविदाहे जीर्णसर्पिषा।

स्निग्धं विरेचयेत्+शीतैः शीतैः+दिह्यात्+च सर्वतः॥91॥

गोशकृद्रसदुग्धाज्यैः+विपक्वं शस्यते+अञ्जनम्।

स्वर्णगैरिकतालीसचूर्णावापा रसक्रिया॥92॥

मेदाशाबरकानन्तामञ्जिष्ठादार्वियष्टिभिः।

क्षीराष्टांशं घृतं पक्वं सतैलं नावनं हितम्॥93॥

तर्पणं क्षीरसर्पिः स्यात्+अशाम्यति सिराव्यधः।

चिन्ताभिघातभीशोकरौक्ष्यात् सोत्कटकासनात्॥94॥

विरेकनस्यवमनपुटपाकादिविभ्रमात्।

विदग्धाहारवमनात् क्षुत्तृष्णादिविधारणात्॥95॥

अक्षिरोगावसानात्+च पश्येत्+तिमिररोगिवत्।

यथास्वं तत्र युञ्जीतं दोषादीन् वीक्ष्य भेषजम्॥96॥

सूर्योपरागानलविद्युदादिविलोकनेनोपहतेक्षणस्य।

सन्तर्पणं स्निग्धहिमादि कार्यं तथा+अञ्जनं हेम घृतेन घृष्टम्॥97॥

चक्षूरक्षायां सर्वकालं मनुष्यैः+यत्नः कर्तव्यः+ जीविते यावत्+इच्छा।

व्यर्थः+ लोकः+अयं तुल्यरात्रिंदिवानां।

पुंसामन्धानां विद्यमाने+अपि वित्ते॥98॥

त्रिफला रुधिरस्रुतिः+विशुद्धिः+मनसः+ निर्वृतिः+अञ्जनं सनस्यम्।

शकुनाशनता सपादपूजा घृतपानं च सदा+एव नेत्ररक्षा॥99॥

अहितादशनात्+सदा निवृत्तिः+भृशभास्वत्+चलसूक्ष्मवीक्षणात्+च।

मुनिना निमिनोपदिष्टम्+एतत् परमं रक्षणम्+ईक्षणस्य पुंसाम्॥100॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने तिमिरप्रतिषेधः+ नाम त्रयोदशः+अध्यायः॥13॥

चतुर्दशः+अध्यायः।

अथ+अतः+ लिङ्गनाशप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

विध्येत्+सुजातं निःप्रेक्ष्यं लिङ्गनाशं कफोद्भवम्।

आवर्तक्यादिभिः षड्भिः+विवर्जितम्+उपद्रवैः॥1॥

सः+असञ्जातः+ हि विषमः+ दधिमस्तुनिभस्तनुः।

शलाकया+अवकृष्टः+अपि पुनः+ऊर्ध्वं प्रपद्यते॥2॥

करोति वेदनां तीव्रां दृष्टिं च स्थगयेत्+पुनः।

श्लेष्मलैः पूर्यते च+आशु सः+अन्यैः सोपद्रवः+चिरात्॥3॥
श्लैष्मिकः+ लिङ्गनाशः+ हि सितत्वात्+श्लेष्मणः सितः।
तस्य+अन्यदोषाभिभवात्+भवति+आनीलता गदः॥4॥
तत्र+आवर्तचला दृष्टिः+आवर्तकी+अरुणा+असिता।
शर्करा+अर्कपयोलेशनिचिता+इव घनाति च॥5॥
राजीमती दृङ्निचिता शालिशूकाभराजिभिः।
विषमच्छिन्नदग्धाभा सरुक् छिन्नांशुका स्मृता॥6॥
दृष्टिः कांस्यसमच्छाया चन्द्रकी चन्द्रकाकृतिः।
छत्राभा न+एकवर्णा च छत्रकी नाम नीलिका॥7॥
न विध्येत्+असिरार्हाणां न तृट्पीनसकासिनाम्।
न+अजीर्णिभीरुवमितशिरःकर्णाक्षिशूलिनाम्॥8॥
अथ साधारणे काले शुद्धसम्भोजितात्मनः।
देशे प्रकाशे पूर्वाह्णे भिषग्जानूच्चपीठगः॥9॥
यन्त्रितस्य+उपविष्टस्य स्विन्नाक्षस्य मुखानिलैः।
अङ्गुष्ठम्+ऋदिते नेत्रे दृष्टौ दृष्ट्वोत्प्लुतं मलम्॥10॥
स्वां नासां प्रेक्षमाणस्य निष्कम्पं मूर्ध्नि धारिते।
कृष्णात्+अर्धाङ्गुलं मुक्त्वा तथा+अर्धार्धम्+अपाङ्गतः॥11॥
तर्जनीमध्यमाङ्गुष्ठैः शलाकां निर्चलं धृताम्।
दैवच्छिद्रं नयेत्+पार्श्वात्+ऊर्ध्वम्+आमन्थयन्+इव॥12॥
सव्यं दक्षिणहस्तेन नेत्रं सव्येन च+इतरत्।
विध्येत् सुविद्धे शब्दः स्यात्+अरुक् च+अम्बुलवस्रुतिः॥13॥
सान्त्वयन्+आतुरं च+अनु नेत्रं स्तन्येन सेचयेत्।
शलाकायाः+ततः+अग्रेण निर्लिखेत्+नेत्रमण्डलम्॥14॥
अबाधमानः शनकैः+नासां प्रति नुदन्+ततः।
उच्छिङ्घनात्+च+अपहरेत्+दृष्टिमण्डलगं कफम्॥15॥
स्थिरे दोषे चले वा+अति स्वेदयेत्+अक्षि बाह्यतः।
अथ दृष्टेषु रूपेषु शलाकाम्+आहरेत्+शनैः॥16॥
घृताप्लुतं पिचुं दत्त्वा बद्ध्वाक्षं शाययेत्+ततः।
विद्धात्+अन्येन पार्श्वेन तम्+उत्तानं द्वयोः+व्यधे॥17॥
निवाते शयने+अभ्यक्तशिरःपादं हिते रतम्।
क्षवथुं कासम्+उद्गारं ष्ठीवनं पानम्+अम्भसः॥18॥
अधोमुखस्थितिं स्नानं दन्तधावनभक्षणम्।

सप्ताहं न+आचारेत्+स्नेहपीतवत्+च+अत्र यन्त्रणा॥19॥
शक्तितः+ लङ्घयेत्+सेकः+ रुजि कोष्णेन सर्पिषा।
सव्योषामलकं वाट्यम्+अश्नीयात्+सघृतं द्रवम्॥20॥
विलेपीं वा त्र्यहात्+च+अस्य क्वाथैः+मुक्त्वा+अक्षि सेचयेत्।
वातघ्नैः सप्तमे तु+अह्नि सर्वथा+एव+अक्षि मोचयेत्॥21॥
यन्त्रणाम्+अनुरुध्येत दृष्टेः+आस्थैर्यलाभतः।
रूपाणि सूक्ष्मदीप्तानि सहसा न+अवलोकयेत्॥22॥
शोफरागरुजादीनाम्+अधिमन्थस्य च+उद्भवः।
अहितैः+वेधदोषात्+च यथास्वं तान्+उपाचरेत्॥23॥
कल्किताः सघृता दूर्वायवगैरिकसारिवाः।
मुखालेपे प्रयोक्तव्या रुजारागोपशान्तये॥24॥
ससर्षपाः+तिलाः+तद्वत्+मातुलुङ्गरसाप्लुताः।
पयस्यासारिवापत्रमञ्जिष्ठामधुयष्टिभिः।25॥
अजाक्षीरयुतैः+लेपः सुखोष्णः शर्मकृत्+परम्।
रोध्रसैन्धवमृद्वीकामधुकैः+छागलं पयः।26॥
शृतम्+आश्च्योतनं योज्यं रुजारागविनाशनम्।
मधुकोत्पलकुष्ठैः+वा द्राक्षालाक्षासितान्वितैः॥27॥
वातघ्नसिद्धे पयसि शृतं सर्पिः+चतुर्गुणे।
पद्मकादिप्रतीवापं सर्वकर्मसु शस्यते॥28॥
सिरां तथा+अनुपशमे स्निग्धस्विन्नस्य मोक्षयेत्।
मन्थोक्तां च क्रियां कुर्यात्+वेधे रूढे+अञ्जनं मृदु॥29॥
आढकीमूलमरिचहरितालरसाञ्जनैः।
विद्धे+अक्ष्णि सगुडा वर्तिः+योज्या दिव्याम्बुपेषिता॥30॥
जातीशिरीषधवमेषविषाणिपुष्पवैडूर्यमौक्तिकफलं पयसा सुपिष्टम्।
आजेन ताम्रम्+अमुना प्रतनु प्रदिग्धं सप्ताहतः पुनः+इदं पयसा+एव पिष्टम्॥31॥
पिण्डाञ्जनं हितम्+अनातपशुष्कम्+अक्ष्णि विद्धे प्रसादजननं बलकृत्+च दृष्टेः।
स्रोतोजविद्रुमशिलाम्बुधिफेनतीक्ष्णैः+अस्य+एव तुल्यम्+उदितं गुणकल्पनाभिः॥32॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृयसंहितायां षष्ठे उत्तरस्थाने लिङ्गनाशप्रतिषेधः+ नाम चतुर्दशः+अध्यायः॥14॥

पञ्चदशः+अध्यायः।

अथ+अतः+ सर्वाक्षिरोगविज्ञानीयं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥

वातेन नेत्रे+अभिष्यण्णे नासानाहः+अल्पशोफता।
शङ्खाक्षिभ्रूललाटस्य तोदस्फुरणभेदनम्॥1॥
शुष्काल्पा दूषिकां शीतम्+अच्छं च+अश्रु चला रुजः।
निमेषोन्मेषणं कृच्छ्रात्+जन्तूनाम्+इव सर्पणम्॥2॥
अक्ष्याध्मातम्+इव+आभाति सूक्ष्मैः शल्यैः+इव+अचितम्।
स्निग्धोष्णैः+च+उपशमनं सः+अभिष्यन्दः उपेक्षितः॥3॥
अधिमन्थः+ भवेत्+तत्र कर्णयोः+नदनं भ्रमः।
अरण्यः+इव च मथ्यन्ते ललाटाक्षिभ्रुवादयः॥4॥
हताधिमन्थः सः+अपि स्यात् प्रमादात्तेन वेदनाः।
अनेकरूपा जायन्ते व्रणः+ दृष्टौ च दृष्टिहा॥5॥
मन्याक्षिशङ्खतः+ वायुः+अन्यतः+ वा प्रवर्तयन्।
व्यथां तीव्रामपैच्छिल्यरागशोफं विलोचनम्॥6॥
सङ्कोचयति पर्यश्रु सः+अन्यतोवातसंज्ञितः।
तद्वत्+जिह्मं भवेत्+नेत्रम्+ऊनं वा वातपर्यये॥7॥
दाहः+ धूमायनं शोफः श्यावता वर्त्मनः+ बहिः।
अन्तःक्लेदः+अश्रु पीतोष्णं रागः पीताभदर्शनम्॥8॥
क्षारोक्षितक्षताक्षित्वं पित्ताभिष्यन्दलक्षणम्।
ज्वलदङ्गारकीर्णाभं यकृत्पिण्डसमप्रभम्॥9॥
अधिमन्थे भवेत्+नेत्रं स्यन्दे तु कफसम्भवे।
जाड्यं शोफः+ महान् कण्डूः+निद्रा+अन्नान्+अभिनन्दनम्॥10॥
सान्द्रस्निग्धबहुश्वेतपिच्छावत्+दूषिकाश्रुता।
अधिमन्थे नतं कृष्णम्+उन्नतं शुक्लमण्डलम्॥11॥
प्रसेकः+ नासिकाध्मानं पांशुपूर्णम्+इव+ईक्षणम्।
रक्ताश्रुराजीदूषीकारक्तमण्डलदर्शनम्॥12॥८
रक्तस्यन्देन नयनं सपित्तस्यन्दलक्षणम्।
मन्थे+अक्षि ताम्रपर्यन्तम्+उत्पाटनसमानरुक्॥13॥
रागेण बन्धूकनिभं ताम्यति स्पर्शनाक्षमम्।
असृङ्निमग्नारिष्टाभं कृष्णम्+अग्न्याभदर्शनम्॥14॥
अधिमन्था यथास्वं च सर्वे स्यन्दाधिकव्यथाः।
शङ्खदन्तकपोलेषु कपाले च+अतिरुक्कराः॥15॥
वातपित्तातुरं घर्षतोदभेदोपदेहवत्।
रूक्षदारुणवर्त्माक्षि कृच्छ्रोन्मीलनिमीलनम्॥16॥

विकूणनविशुष्कत्वशीतेच्छाशूलपाकवत्।

उक्तः शुष्काक्षिपाकः+अयं सशोफः स्यात्+त्रिभिः+मलैः॥17॥

सरक्तैः+तत्र शोफः+अतिरुग्दाहष्ठीवनादिमान्।

पक्वोदुम्बरसङ्काशं जायते शुक्लमण्डलम्॥18॥

अश्रूष्णशीतविशदपिच्छिलाच्छघनं मुहुः।

अल्पशोफे+अल्पशोफः+तु पाकः+अन्यैः+लक्षणैः+तथा॥19॥

अक्षिपाकात्यये शोफः संरम्भः कलुषाश्रुता।

कफोपदिग्धम्+असितं सितं प्रक्लेदरागवत्॥20॥

दाहः+ दर्शनसंरोधः+ वेदनाः+च+अनवस्थिताः।

अन्नसारः+अम्लतां नीतः पित्तरक्तोल्बणैः+मलैः॥21॥

शिराभिः+नेत्रम्+आरुढः करोति श्यावलोहितम्।

सशोफदाहपाकाश्रु भृशं च+आविलदर्शनम्॥22॥

अम्लोषितः+अयम् इति+उक्ता गदाः षोडश सर्वगाः।

हताधिमन्थम्+एतेषु साक्षिपाकात्ययं त्यजेत्॥23॥

वातोद्भूतः पञ्चरात्रेण दृष्टिं सप्ताहेन श्लेष्मजातः+अधिमन्थः।

रक्तोत्पन्नः+ हन्ति तद्वत्+त्रिरात्रात् मिथ्याचारात् पैत्तिकः सद्यः+ एव॥24॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने सर्वाक्षिरोगविज्ञानीयः+ नाम पञ्चदशः+अध्यायः॥15॥

षोडशः+अध्यायः।

अथ+अतः+ सर्वाक्षिरोगप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

प्राग्रूपः+ एव स्यन्देषु तीक्ष्णं गण्डूषनावनम्।

कारयेत्+उपवासं च कोपात्+अन्यत्र वातजात्॥1॥

दाहोपदेहरागाश्रुशोफशान्त्यै बिडालकम्।

कुर्यात्+सर्वत्र पत्रैलामरिचस्वर्णगैरिकैः॥2॥

सरसाञ्जनयष्ट्याह्वनतचन्दनसैन्धवैः।

सैन्धवं नागरं तार्क्ष्यं भृष्टं मण्डेन सर्पिषः॥3॥

वातजे घृतभृष्टं वा योज्यं शबरदेशजम्।

मांसीपद्मककालीययष्ट्याह्वैः पित्तरक्तयोः॥4॥

मनोह्वाफलिनीक्षौद्रैः कफे, सर्वैः+तु सर्वजे।

सितमरिचभागम्+एकं चतुर्मनोह्वं द्विरष्टशाबरकम्।

सञ्चूर्ण्य वस्त्रबद्धं प्रकुपितमात्रे+अवगुण्ठनं नेत्रे॥5॥

आरण्यात्+छगणरसे पटावबद्धाः सुस्विन्ना नखवितुषीकृताः कुलत्थाः।
तत्+चूर्णं सकृत्+अवचूर्णनात्+निशीथे नेत्रणां विधमति सद्यः+ एव कोपम्॥6॥
घोषाभयातुत्थकयष्टिरोध्रैर्मूती सुसूक्ष्मैः श्लथवस्त्रबद्धैः।
ताम्रस्थधान्याम्लनिमग्नमूर्तिः+अर्तिं जयति+अक्षिणि न+एकरूपाम्॥7॥
षोडशभिः सलिलपलैः पलं तथा+एकं कटङ्कटेर्याः सिद्धम्।
सेकः+अष्टभागशिष्टः क्षौद्रयुतः सर्वदोषकुपिते नेत्रे॥8॥
वातपित्तकफसन्निपातजां नेत्रयोः+बहुविधाम्+अपि व्यथाम्।
शीघ्रम्+एव जयति प्रयोजितः शिग्रुपल्लवरसः समाक्षिकः॥9॥
तरुणमुरुबूकपत्रं मूलं च विभिद्यं सिद्धम्+आजे क्षीरे।
वाताभिष्यन्दरुजं सद्यः+ विनिहन्ति सक्तुपिण्डिका च+उष्णा॥10॥
आश्च्योतनं मारुतजे क्वाथः+ बिल्वादिभिः+हितः।
कोष्णः सहैः+अण्डजटाबृहतीमधुशिग्रुभिः॥11॥
ह्रीबेरवक्रशर्ङ्गेष्टोदुम्बरत्वक्षु साधितम्।
साम्भसा पयसा+आजेन शूलाश्च्योतनम्+उत्तमम्॥12॥
मञ्जिष्ठारजनीलाक्षाद्राक्षर्द्धिमधुकोत्पलैः।
क्वाथः सशर्करः शीतः सेचनं रक्तपित्तजित्॥13॥
कसेरुयष्ट्याह्वरजस्तान्तवे शिथिलं स्थितम्।
अप्सु दिव्यासु निहितं हितं स्यन्दे+अस्रपित्तजे॥24॥
पुण्ड्रयष्टीनिशामूती प्लुता स्तन्ये सशर्करे।
छागदुग्धे+अथवा दाहरुग्रागाश्रुनिवर्तनी॥15॥
श्वेतरोध्रं समधुकं घृतभृष्टं सुचूर्णितम्।
वस्त्रस्थं स्तन्यम्+ऋदितं पित्तरक्ताभिघातजित्॥16॥
नागरत्रिफलानिम्बवासारोध्ररसः कफे।
कोष्णम्+आश्च्योतनं मिश्रैः+भेषजैः सान्निपातिके॥17॥
सर्पिः पुराणं पवने, पित्ते शर्करया+अन्वितम्।
व्योषसिद्धं कफे पीत्वा यवक्षारावचूर्णितम्॥18॥
स्रावयेत्+रुधिरं भूयः+ततः स्निग्धं विरेचयेत्।
आनूपवेसवारेण शिरोवदनलेपनम्॥19॥
उष्णेन शूले, दाहे तु पयः सर्पिः+युतैः+हिमैः।
तिमिरप्रतिषेधं च वीक्ष्य युञ्ज्यात्+यथायथम्॥20॥
अयम्+एव विधिः सर्वः+ मन्थादिषु+अपि शस्यते।
अशान्तौ सर्वथा मन्थे भ्रुवोः+उपरि दाहयेत्॥21॥

रूप्यं रूक्षेण गोदध्ना लिम्पेत्+नीलत्वम्+आगते।
शुष्के तु मस्तुना वर्तिः+वाताक्ष्यामयनाशिनी॥22॥
सुमनःकोरकाः शङ्खः+त्रिफला मधुकं बला।
पित्तरक्तापहा वर्तिः पिष्टा दिव्येन वारिणा॥23॥
सैन्धवं त्रिफला व्योषं शङ्खनाभिः समुद्रजः।
फेन ऐलेयकं सर्जः+ वर्तिः श्लेष्माक्षिरोगनुत्॥24॥
प्रपौण्डरीकं यष्ट्याह्वं दार्वी च+अष्टपलं पचेत्।
जलद्रोणे रसे पूते पुनः पक्वे घने क्षिपेत्॥25॥
पुष्पाञ्जनात्+दशपलं कर्षं च मरिचात्+ततः।
कृतशः+चूर्णः+अथवा वर्तिः सर्वाभिष्यन्दसम्भवान्॥26॥
हन्ति रागरुजाघर्षान् सद्यः+ दृष्टिं प्रसादयेत्।
अयं पाशुपतः+ योगः+ रहस्यं भिषजां परम्॥27॥
शुष्काक्षिपाके हविषः पानम्+अक्ष्णोः+च तर्पणम्।
घृतेन जीवनीयेन नस्यं तैलेन वा+अणुना।28॥
परिषेकः+ हितः+च+अत्र पयः कोष्णं ससैन्धवम्।
सर्पिः+युक्तं स्तन्यपिष्टम्+अञ्जनं च महौषधम्॥29॥
वसा वा+आनूपसत्त्वोत्था किञ्चित्+सैन्धवनागरा।
घृताक्तन् दर्पणे घृष्टान् केशान् मल्लकसम्पुटे॥30॥
दग्ध्वा+आज्यपिष्टा लोहस्था सा मषी श्रेष्ठम्+अञ्जनम्।
सशोफे वा+अल्पशोफे च स्निग्धस्य व्यधयेत्+सिराम्॥31॥
रेकः स्निग्धे पुनः+द्राक्षापथ्याक्वाथत्रिवृद्धृतैः।
श्वेतरोध्रं घृते भृष्टं चूर्णितं तान्तवस्थितम्॥32॥
उष्णाम्बुना विमृदितं सेकः शूलहरः परम्।
दार्वीप्रपौण्डरीकस्य क्वाथः+ वा+आश्च्योतने हितः॥33॥
सन्धावान्+च प्रयुञ्जीत घर्षरागाश्रुरुग्घरान्॥33 1/2॥
ताम्रं लोहे मूत्रघृष्टं प्रयुक्तं नेत्रे सर्पिः+धूपितं वेदनाघ्नम्।
ताम्रे घृष्टः+ गव्यदध्नः सरः+ वा युक्तः कृष्णासैन्धवाभ्यां वरिष्ठः॥34 1/2॥
शङ्खं ताम्रं स्तन्यघृष्टं घृताक्तैः शम्याः पत्रैः+धूपितं तद्यवैः+च।
नेत्रे युक्तं हन्ति सन्धौ+असंज्ञं क्षिप्रं घर्षं वेदनां च+अतितीव्राम्॥35 1/2॥
उदुम्बरफलं लोहे घृष्टं स्तन्येन धूपितम्॥36॥
साज्यैः शमीच्छदैः+दाहशूलरागाश्रुहर्षजित्।
शिग्रुपल्लवनिर्यासः सुघृष्टः+ताम्रसम्पुटे॥37॥

घृतेन धूपितः+ हन्ति शोफघर्षाश्रुवेदनाः।
तिलाम्भसा मृत्कपालं कांस्ये घृष्टं सुधूपितम्॥38॥
निम्बपत्रैः+घृताभ्यक्तैः+घर्षशूलाश्रुरागजित्।
सन्धावेनाञ्जिते नेत्रे विगतौषधवेदने॥39॥
स्तन्येन+आश्च्योतनं कार्यं त्रिः परं न+अञ्जयेत्+च तैः।
तालीसपत्रचपलानतलोहरजोञ्जनैः॥40॥
जातीमुकुलकासीससैन्धवैः+मूत्रपेषितैः।
ताम्रम्+आलिप्य सप्ताहं धारयेत्+पेषयेत्+ततः॥41॥
मूत्रेण+एव+अनु गुटिकाः कार्यात्+छायाविशोषिताः।
ताः स्तन्यघृष्टा घर्षाश्रुशोफकण्डूविनाशनाः॥42॥
व्याघ्रीत्वङ्मधुकं ताम्ररजः+अजाक्षीरकल्कितम्।
शम्यामलकपत्राज्यधूपितं शोफरुक्प्रणुत्॥43॥
अम्लोषिते प्रयुञ्जीत पित्ताभिष्यन्दसाधनम्।
उत्क्लिष्टाः कफपित्तास्रनिचयोत्थाः कुकूणकः॥44॥
पक्ष्मोपरोधः शुष्काक्षिपाकः पूयालसः+ बिसः।
पोथक्यम्लोषितः+अल्पाख्यः स्यन्दमन्था विना+अनिलात्॥45॥
एते+अष्टादश पिल्लाख्या दीर्घकालानुबन्धिनः।
किचित्सा पृथक्+एतेषां स्वंस्वमुक्ता अथ वक्ष्यते॥46॥
पिल्लीभूतेषु सामान्यत् अथ पिल्लाख्यरोगिणः।
स्निग्धस्य छर्दितवतः सिराव्यधहृतासृजः॥47॥
विरिक्तस्य च वर्त्मानु निर्लिखेत्+आविशुद्धितः।
तुत्थकस्य पलं श्वेतमरिचानि च विंशतिः॥48॥
त्रिंशता काञ्जिकपलैः पिष्ट्वा ताम्रे निधापयेत्।
पिल्लान्+अपिल्लान् कुरुते बहुवर्षोत्थितान्+अपि॥49॥
तत्सेकेनोपदेहाश्रुकण्डूशोफान्+च नाशयेत्।
करञ्जबीजं सुरसं सुमनःकोरकाणि च॥50॥
संक्षुद्य साधयेत्+क्वाथे पूते तत्र रसक्रिया।
अञ्जनं पिल्लभैषज्यं पक्ष्मणां च प्ररोहणम्॥51॥
रसाञ्जनं सर्जरसः+ रीतिपुष्पं मनःशिला।
समुद्रफेनः+ लवणं गैरिकं मरिचानि च॥52॥
अञ्जनं मधुना पिष्टं क्लेदकण्डूघ्नम्+उत्तमम्।
अभयारसपिष्टं तगरं पिल्लनाशनम्॥53॥

भावितं बस्तमूत्रेण सस्नेहं देवदारु च।
सैन्धवत्रिफलाकृष्णाकटुकाशङ्खनाभयः॥54॥
सताम्ररजसः+ वर्तिः पिल्लशुक्रककनाशिनी।
पुष्पकासीसचूर्णः+ वा सुरसारसभावितः॥55॥
ताम्रे दशाहं तत् पैल्ल्यपक्ष्मशातजिदञ्जनम्॥55 1/2॥
अलं च सौवीरकम्+अञ्जनं च ताभ्यां समं ताम्ररजः सुसूक्ष्मम्।
पिल्लेषु रोमाणि निषेवितः+असौ चूर्णः करोति+एकशलाकया+अपि॥56 1/2॥
लाक्षानिः+गुण्डीभृङ्गदार्वीरसेन श्रेष्ठं कार्पासं भावितं सप्तकृत्वः।
दीपः प्रज्वाल्यः सर्पिषा तत्+समुत्था श्रेष्ठा पिल्लानां रोपणार्थे मषी सा॥ 57 1/2॥
वर्त्मावलेखं बहुशस्तद्वत्+शोणितमोक्षणम्॥58॥
पुनःपुनः+विरेकं च नित्यम्+आश्च्योतनाञ्जनम्।
नावनं धूमपानं च पिल्लरोगातुरः+ भजेत्॥59॥
पूयालसे तु+अशान्ते+अन्ते दाहः सूक्ष्मशलाकया।
चतुर्णवतिः+इति+अक्ष्णः+ हेतुलक्षणसाधनैः॥60॥
परस्परम्+असङ्कीर्णाः कात्स्न्येन गदिता गदाः।
सर्वदा च निषेवेत स्वस्थः+अपि नयनप्रियः॥61॥
पुराणयवगोधूमशालिषष्टिककोद्रवान्।
मुद्गादीन् कफपित्तघ्नान् भूरिसर्पिः परिप्लुतान्॥62॥
शाकं च+एवं विधं मांसं जाङ्गलं दाडिमं सिताम्।
सैन्धवं त्रिफलां द्राक्षां वारि पाने च नाभसम्॥63॥
आतपत्रं पदत्राणं विधिवत्+दोषशोधनम्।
वर्जयेत्+वेगसंरोधम्+अजीर्णाध्यशनानि च॥64॥
क्रोधशोकदिवास्वप्नरात्रिजागरणातपान्।
विदाहि विष्टम्भकरं यत्+च+इह+आहारभेषजम्॥65॥
द्वे पादमध्ये पृथुसन्निवेशे शिरे गते ते बहुधा च नेत्रे।
ता म्रक्षणोद्वर्तनलेपनादीन् पादप्रयुक्तात्+नयने नयन्ति॥66॥
मलौष्ण्यसङ्घट्टनपीडनाद्यैः+ताः+ दूषयन्ते नयनानि दुष्टाः।
भजेत्+सदा दृष्टिहितानि तस्मात्+उपानत्+अभ्यञ्जनधावनानि॥67॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने सर्वाक्षिरोगप्रतिषेधः+
नाम षोडशः+अध्यायः॥16॥
सप्तदशः+अध्यायः।
अथ+अतः कर्णरोगविज्ञानीयं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

प्रतिश्यायजलक्रीडाकर्णकण्डूयनैः+मरुत्।

मिथ्यायोगेन शब्दस्य कुपितः+अन्यैः+च कोपनैः॥1॥

प्राप्य श्रोत्रसिराः कुर्यात्+शूलं स्रोतसि वेगवत्।

अर्धावभेदकं स्तम्भं शिशिरान्+अभिनन्दनम्॥2॥

चिरात्+च पाकं पक्वं तु लसीकाम्+अल्पशः स्रवेत्।

श्रोत्रं शून्यम्+अकस्मात्+च स्यात्+सञ्चारविचारवत्॥3॥

शूलं पित्तात् सदाहोषाशीतेच्छाश्वयथुज्वरम्।

आशुपाकं प्रपक्वं च सपीतलसिकास्रुति॥4॥

सा लसीका स्पृशेत्+यत्+यत्+तत्+तत्+पाकम्+उपैति च।

कफात्+शिरोहनुग्रीवागौरवं मन्दता रुजः॥5॥

कण्डूः श्वयथुः+उष्णेच्छा पाकात्+श्वेतघनस्रुतिः।

करोति श्रवणे शूलम्+अभिघातादिदूषितम्॥6॥

रक्तं पित्तसमानार्ति किञ्चित्+वा+अधिकलक्षणम्।

शूलं समुदितैः+दोषैः सशोफज्वरतीव्ररुक्॥7॥

पर्यायात्+उष्णशीतेच्छं जायते श्रुतिजाड्यवत्।

पक्वं सितासितारक्तघनपूयप्रवाहि च॥8॥

शब्दवाहिसिरासंस्थे शृणोति पवने मुहुः।

नादान्+अकस्मात्+विविधान् कर्णनादं वदन्ति तम्॥9॥

श्लेष्मणा+अनुगतः+ वायुः+नादः+ वा समुपेक्षितः।

उच्चैः कृच्छ्रात्+श्रुतिं कुर्यात्+बधिरत्वं क्रमेण च॥10॥

वातेन शोषितः श्लेष्मा श्रोतः+ लिम्पेत्+ततः+ भवेत्।

रुग्गौरवं पिधानं च सः+ प्रतीनाहसंज्ञितः॥11॥

कण्डूशोफौ कफात्+श्रोत्रे स्थिरौ तत्+संज्ञया स्मृतौ।

कफः+ विदग्धः पित्तेन सरुजं नीरुजं तु+अपि॥12॥

घनपूतिबहुक्लेदं कुरुते पूतिकर्णकम्।

वातादिदूषितं श्रोत्रं मांसासृक्क्लेदजा रुजम्॥13॥

खादन्तः+ जन्तवः कुर्युः+तीव्रां सः+ कृमिकर्णकः।

श्रोत्रकण्डूयनात्+जाते क्षते स्यात्+पूर्वलक्षणः॥14॥

विद्रधिः, पूर्ववत्+च+अन्यः शोफः+अर्शः+अर्बुदम्+इरितम्।

तेषु रुक् पूतिकर्णत्वं बधिरत्वं च बाधते॥15॥

गर्भे+अनिलात्+सङ्कुचिता शष्कुली कुचिकर्णकः।

एकः+ नीरुक्+अनेकः+ वा गर्भे मांसाङ्कुरः स्थिरः॥16॥
पिप्पली पिप्पलीमानः सन्निपातात्+विदारिका।
सवर्णः सरुजः स्तब्धः श्वयथुः, सः+ उपेक्षितः॥17॥
कटुतैलनिभं पक्वः स्रवेत् कृच्छ्रेण रोहति।
सङ्कोचयति रुढा च सा ध्रुवं कर्णशष्कुलीम्॥18॥
सिरास्थः कुरुते वायुः पालीशोषं तदा+आह्वयम्।
कृशा दृढा च तन्त्रीवत् पाली वातेन तन्त्रिका॥19॥
सुकुमारे चिरोत्+सर्गात्+सहसा+एव प्रवर्धिते।
कर्णे शोफः सरुक् पाल्याम्+अरुणः परिपोटवान्॥20॥
परिपोटः सः+ पवनात् उत्पातः पित्तशोणितात्।
गुर्वाभरणभाराद्यैः श्यावः+ रुग्दाहपाकवान्॥21॥
श्वयथुः स्फोटपिटिकारागोषाक्लेदसंयुतः।
पाल्यां शोफः+अनिलकफात्+सर्वतः+ निर्व्यथः स्थिरः॥22॥
स्तब्धः सवर्णः कण्डूमान्+उन्मन्थः+ गल्लिरः+च सः।
दुर्विद्धे वर्धिते कर्णे सकण्डूदाहपाकरुक्॥23॥
श्वयथुः सन्निपातोत्थः सः+ नाम्ना दुःखवर्धनः।
कफासृक्कृमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः॥24॥
लेह्याख्यः पिटिकाः+ता हि लिह्युः पालीम्+उपेक्षिताः।
पिप्पली सर्वजं शूलं विदारी कुचिकर्णकः॥25॥
एषाम्+असाध्याः, याप्य+एका तन्त्रिका+अन्यान्+तु साधयेत्।
पञ्चविंशतिः+इत्युक्ताः कर्णरोगा विभागतः॥26॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने कर्णरोगविज्ञानीयः+ नाम सप्तदशः+अध्यायः॥17॥
अष्टादशः+अध्यायः।
अथ+अतः कर्णरोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कर्णशूले पवनजे पिबेत्+रात्रौ रसाशितः।
वातघ्नसाधितं सर्पिः, कर्णं स्विन्नं च पूरयेत्॥1॥
पत्राणां पृथक्+अश्वत्थबिल्वार्कैः+अण्डजन्मनाम्।
तैलसिन्धूत्थदिग्धानां स्विन्नानां पुटपाकतः॥2॥
रसैः कवोष्णैः+तद्वत्+च मूलकस्य+अरलोः+अपि।
गणे वातहरे+अम्लेषु मूत्रेषु च विपाचितः॥3॥

महास्नेहः+ द्रुतं हन्ति सुतीव्राम्+अपि वेदनाम्।
महतः पञ्चमूलस्य काष्ठात्+क्षौमेण वेष्टितात्॥4॥
तैलसिक्तात्+प्रदीप्ताग्रात् स्नेहः सद्यः+ रुजापहः।
योज्यः+च+एवं भद्रकाष्ठात्+कुष्ठात्+काष्ठात्+च सारलात्॥5॥
वातव्याधिप्रतिश्यायविहितं हितम्+अत्र च।
वर्जयेत्+शिरसा स्नानं शीताम्भः पानम्+अह्नि+अपि॥6॥
पित्तशूले सितायुक्तघृतस्निग्धं विरेचयेत्।
द्राक्षायष्टिशृतं स्तन्यं शस्यते कर्णपूरणम्॥7॥
यष्ट्यनन्ताहिमोशीरकाकोलीरोध्रजीवकैः।
मृणालबिसमञ्जिष्ठासारिवाभिः+च साधयेत्॥8॥
यष्टीमधुरसप्रस्थक्षीरद्विप्रस्थसंयुतम्।
तैलस्य कुडवं नस्यपूरणाभ्यञ्जनैः+इदम्॥9॥
निहन्ति शूलदाहोषाः केवलं क्षौद्रम्+एव वा।
यष्ट्यादिभिः+च सघृतैः कर्णौ दिह्यात्+समन्ततः॥10॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्धं कफोद्भवे।
धूमनावनगण्डूषस्वेदान् कुर्यात्+कफापहान्॥11॥
लशुनार्द्रकशिग्रूणां मुरुङ्ग्या मूलकस्य च।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे॥12॥
अर्काङ्कुरान्+अम्लपिष्टान्+तैलाक्तान्+लवणान्वितान्।
सन्निधाय स्नुहीकाण्डे कोरिते तत्+शदावृतान्॥13॥
स्वेदयेत्+पुटपाकेन सः+ रसः शूलजित्+परम्।
रसेन बीजपूरस्य कपित्थस्य च पूरयेत्॥14॥
सुक्तेन पूरयित्वा वा फेनेन+अन्ववचूर्णयेत्।
अजाविमूत्रवंशत्वक्सिद्धं तैलं च पूरणम्॥15॥
सिद्धं वा सार्षपं तैलं हिङ्गुतुम्बुरुनागरैः।
रक्तजे पित्तवत्कार्यं सिरां च+आशु विमोक्षयेत्॥16॥
पक्वे पूयवहे कर्णे धूमगण्डूषनावनम्।
युञ्ज्यात्+नाडीविधानं च दुष्टव्रणहरं च यत्॥17॥
स्रोतः प्रमृज्य दिग्धं तु द्वौ कालौ पिचुवर्तिभिः।
पुरेण धूपयित्वा तु माक्षिकेण प्रपूरयेत्॥18॥
सुरसादिगणक्वाथफाणिताक्तां च योजयेत्।
पिचुवर्तिं सुसूक्ष्मैः+च तत्+चूर्णैः+अवचूर्णयेत्॥19॥

शूलक्लेदगुरुत्वानां विधिः+एषः+ निवर्तकः।
प्रियङ्गुमधुकाम्बुष्ठाधातक्युत्पलपर्णिभिः॥20॥
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन च।
पचेत्+तैलं तदा+अस्रावं निगृह्णाति+आशु पूरणात्॥21॥
नादबाधिः+ययोः कुर्यात्+ वातशूलोक्तम्+औषधम्।
श्लेष्मानुबन्धे श्लेष्माणं प्राक्+जयेत्+वमनादिभिः॥22॥
एरण्डशिग्रुवरुणमुलकात्+पत्रजे रसे।
चतुर्गुणे पचेत्+तैलं क्षीरे च+अष्टगुणोन्मिते॥23॥
यष्ट्याह्वाक्षीरकाकोलीकल्कयुक्तं निहन्ति तत्।
नादबाधिर्यशूलानि नावनाभ्यङ्गपूरणैः॥24॥
पक्वं प्रतिविषाहिङ्गुमिशित्वक्स्वर्जिकोषणैः।
ससुक्तैः पूरणात्+तैलं रुक्स्रावाश्रुतिनादनुत्॥25॥
कर्णनादे हितं तैलं सर्षपोत्थं च पूरणे।
शुष्कमूलकखण्डानां क्षारः+ हिङ्गु महौषधम्॥26॥
शतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम्।
सौवर्चलयवक्षारस्वर्जिकौद्भिदसैन्धवम्॥27॥
भूर्जग्रन्थिबिडं मुस्ता मधुसुक्तं चतुर्गुणम्।
मातुलुङ्गरसः+तद्वत् कदलीस्वरसः+च तैः॥28॥
पक्वं तैलं जयति+आशु सुकृच्छ्रान्+अपि पूरणात्।
कण्डूं क्लेदं च बाधिर्यपूतकर्णत्वरुक्कृमीन्॥29॥
क्षारतैलम्+इदं श्रेष्ठं मुखदन्तामयेषु च।
अथ सुप्तौ+इव स्यातां कर्णौ रक्तं हरेत्+ततः॥30॥
सशोफक्लेदयोः+मन्दश्रुतेः+वमनम्+आचरेत्।
बाधिः+यं वर्जयेत्+बालवृद्धयोः+चिरजं च यत्॥31॥
प्रतीनाहे परिक्लेद्य स्नेहस्वेदैः+विशोधयेत्।
कर्णशोधनकेन+अनु कर्णं तैलस्य पूरयेत्॥32॥
ससुक्तसैन्धवमधोर्मातुलुङ्गरसस्य वा।
शोधनात्+रूक्षतोत्पत्तौ घृतमण्डस्य पूरणम्॥33॥
क्रमः+अयं मलपूर्णे+अपि कर्णे कण्ड्वां कफापहम्।
नस्यादि, तद्वत्+शोफे+अपि कटूष्णैः+च+अत्र लेपनम्॥34॥
कर्णस्रावोदितं कुर्यात्+पूतिकृमिणकर्णयोः।
पूरणं कटुतैलेन विशेषात् कृमिकर्णके॥35॥

वमिपूर्वा हिता कर्णविद्रधौ विद्रधिक्रिया।
पित्तोत्थकर्णशूलोक्तं कर्तव्यं क्षतविद्रधौ॥36॥
अर्शोः+बुदेषु नासावत्+ आमा कर्णविदारिका।
कर्णविद्रधिवत्साध्या यथादोषोदयेन च॥37॥
पालीशोषे+अनिलश्रोत्रशूलवत्+नस्यलेपनम्।
स्वेदं च कुर्यात् स्विन्नां च पालीम्+उद्वर्तयेत्+तिलैः॥38॥
प्रियालबीजयष्ट्याह्वहयगन्धायवान्वितैः।
ततः पुष्टिकरैः स्नेहैः+अभ्यङ्गं नित्यम्+आचरेत्॥39॥
शतावरीवाजिगन्धापयस्यैः+अण्डजीवकैः।
तैलं विपक्वं सक्षीरं पालीनां पुष्टिकृत्+परम्॥40॥
कल्केन जीवनीयेन तैलं पयसि पाचितम्।
आनूपमांसक्वाथे च पालीपोषणवर्धनम्॥41॥
पालीं छित्त्वा+अतिसङ्क्षीणां शेषां सन्धाय पोषयेत्।
याप्य+एवं तन्त्रिकाख्या+अपि परिपोटे+अपि+अयं विधिः॥42॥
उत्पाते शीतलैः+लेपः+ जलौकोहृतशोणिते।
जम्ब्वाम्रपल्लवबलायष्टीरोध्रतिलोत्पलैः॥43।
सधान्याम्लैः समञ्जिष्ठैः सकदम्बैः ससारिवैः।
सिद्धम्+अभ्यञ्जने तैलं विसर्पोक्तघृतानि च॥44॥
उन्मन्थे+अभ्यञ्जनं तैलं गोधाकर्कवसान्वितम्।
तालपत्र्यश्वगन्धार्कबाकुचीफलसैन्धवैः॥45॥
सुरसालाङ्गलीभ्यां च सिद्धं, तीक्ष्णं च नावनम्।
दुर्विद्धे+अश्मन्तजम्ब्वाम्रपत्रक्वाथेन सेचिताम्॥46॥
तैलेन पालीं स्वभ्यक्तां सुश्लक्ष्णैः+अवचूर्णयेत्।
चूर्णैः+मधुकमञ्जिष्ठाप्रपुण्ड्राह्वनिशोद्भवैः॥47॥
लाक्षाविडङ्गसिद्धं च तैलम्+अभ्यञ्जने हितम्।
स्विन्नां गोमयजैः पिण्डैः+बहुशः परिलेहिकाम्॥48॥
विडङ्गसारैरालिम्पेत्+उरभ्रीमूत्रकल्कितैः।
कौटजेङ्गुदकारञ्जबीजशम्याकवल्कलैः॥49॥
अथवा+अभ्यञ्जनं तैः+वा कटुतैलं विपाचयेत्।
सनिम्बपत्रमरिचमदनैः+लेहिकाव्रणे॥50॥
छिन्नं तु कर्णं शुद्धस्य बन्धम्+आलोच्य यौगिकम्।
शुद्धास्रं लागयेत्+लग्ने सद्यः+छिन्ने विशोधनम्॥51॥

अथ ग्रथित्वा केशान्तं कृत्वा छेदनलेखनम्।
निवेश्य सन्धिं सुषमं न निम्नं न समुन्नतम्॥52॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुप्लोतावगुण्ठितम्।
सूत्रेण+आगाढशिथिलं बद्ध्वा चूर्णैः+अवाकिरेत्॥53॥
शोणितस्थापनैः+व्रण्यम्+आचारं च+आदिशेत्+ततः।
सप्ताहात्+आमतैलाक्तं शनैः+अपनयेत् पिचुम्॥54॥
सुरूढं जातरोमाणं श्लिष्टसन्धिं समं स्थिरम्।
सुवर्ष्माणम्+अरोगं च शनैः कर्णं विवर्धयेत्॥55॥
जलशूकः स्वयङ्गुप्ता रजन्यौ बृहतीफलम्।
अश्वगन्धाबलाहस्तिपिप्पलीगौरसर्षपाः॥56॥
मूलं कोशातकाश्वघ्नरूपिकासप्तपर्णजम्।
छुच्छुन्दरी कालमृता गृहं मधुकरीकृतम्॥57॥
जतूका जलजन्मा च तथा शबरकन्दकम्।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम्॥58॥
हस्त्यश्वमूत्रेण परम्+अभ्यङ्गात्+कर्णवर्धनम्।
अथ कुर्यात्+वयस्थस्य छिन्नां शुद्धस्य नासिकाम्॥59॥
छिन्द्यात्+नासासमं पत्रं तत्+तुल्यं च कपोलतः।
त्वङ्मांसं नासिकासन्ने रक्षन्+तत्+तनुतां नयेत्॥60॥
सीव्येत्+ गण्डं ततः सूच्या सेविन्या पिचुयुक्तया।
नासाच्छेदे+अथ लिखिते परिवर्त्य+उपरि त्वचम्॥61॥
कपोलवध्रं सन्दध्यात्+सीव्येत्+नासां च यत्नतः।
नाडीभ्याम्+उत्क्षिपेत्+अन्तः सुखोच्छ्वासप्रवृत्तये॥62॥
आमतैलेन सिक्त्वा+अनु पत्तङ्गमधुकाञ्जनैः।
शोणितस्थापनैः+च+अन्यैः सुश्लक्ष्णैः+अवचूर्णयेत्॥63॥
ततः+ मधुघृताभ्यक्तं बध्वा+आचारिकम्+आदिशेत्।
ज्ञात्वा+अवस्थान्तरं कुर्यात् सद्योव्रणविधिं ततः॥64॥
छिन्द्यात्+रूढे+अधिकं मांसं नासोपान्तात्+च चर्म तत्।
सीव्येत्+ततः+च सुश्लक्ष्णं हीनं संवर्धयेत्+पुनः॥65॥
निवेशिते यथान्यासं सद्यः+च्छिन्ने+अपि+अयं विधिः।
नाडीयोगात्+विनौष्ठस्य नासासन्धानवत्+विधिः॥66॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने कर्णरोगप्रतिषेधः+नाम+अष्टादशः+अध्यायः॥18॥

एकोनविंशः+अध्यायः।

अथ+अतः+ नासारोगविज्ञानीयं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

अवश्यायानिलरजोभाष्यातिस्वप्नजागरैः।

नीचात्युच्चोपधानेन पीतेन+अन्येन वारिणा॥1॥

अत्यम्बुपानरमणच्छर्दिबाष्पग्रहादिभिः।

क्रुद्धा वातोल्बणा दोषा नासायां स्त्यानतां गताः॥2॥

जनयन्ति प्रतिश्यायं वर्धमानं क्षयप्रदम्।

तत्र वातात्+प्रतिश्याये मुखशोषः+ भृशं क्षवः॥3॥

घ्राणोपरोधनिस्तोददन्तशङ्खशिरोव्यथाः।

कीटिका इव सर्पन्तीः+मन्यते परितः+ भ्रुवौ॥4॥

स्वरसादः+चिरात्+पाकः शिशिराच्छकफस्रुतिः।

पित्तात्+तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः॥5॥

नासाग्रपाकः+ रूक्षोष्णताम्रपीतकफस्रुतिः।

कफात्+कासः+अरुचिः श्वासः+ वमथुः+गात्रगौरवम्॥6॥

माधुर्यं वदने कण्डूः स्निग्धशुक्लकफस्रुतिः।

सर्वजः+ लक्षणैः सर्वैः+अकस्मात्+वृद्धिशान्तिमान्॥7॥

दुष्टं नासासिराः प्राप्य प्रतिश्यायं करोति+असृक्।

उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता॥8॥

कण्डूः श्रोत्राक्षिनासासु पित्तोक्तं च+अत्र लक्षणम्।

सर्वः+ एव प्रतिश्याया दुष्टतां यान्ति+उपेक्षिताः॥9॥

यथा+उक्तोपद्रवाधिक्यात्+स सर्वेन्द्रियतापनः।

साग्निसादज्वरश्वासकासोरः पार्श्ववेदनः॥10॥

कुप्यति+अकस्मात्+बहुशः+ मुखदौर्गन्ध्यशोफकृत्।

नासिकाक्लेदसंशोषशुद्धिरोधकरः+ मुहुः॥11॥

पूयोपमासितारक्तग्रथितश्लेष्मसंस्रुतिः।

मूर्च्छन्ति च+अत्र कृमयः+ दीर्घस्निग्धसिताणवः॥12॥

पक्वलिङ्गानि तेषु+अङ्गलाघवं क्षवथोः शमः।

श्लेष्मा सचिक्कणः पीतः+अज्ञानं च रसगन्धयोः॥13॥

तीक्ष्णाघ्राणोपयोगार्करश्मिसूत्रतृणादिभिः।

वातकोपिभिः+अन्यैः+वा नासिकातरुणास्थनि॥14॥

विघट्टिते+अनिलः क्रुद्धः+ रुद्धः शृङ्गाटकः व्रजेत्।

निवृत्तः कुरुते+अत्यर्थं क्षवथुं सः+ भृशक्षवः॥15॥
शोषयन्+नासिकास्रोतः कफं च कुरुते+अनिलः।
शूकपूर्णाभनासात्वं कृच्छ्रात्+उत्+श्वसनं ततः॥16॥
स्मृतः+असौ नासिकाशोषः+ नासानाहे तु जायते।
नद्धत्वम्+इव नासायाः श्लेष्मरुद्धेन वायुना॥17॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव।
पचेत्+नासापुटे पित्तं त्वङ्मांसं दाहशूलवत्॥18॥
स घ्राणपाकः स्रावः+तु तत्+संज्ञः श्लेष्मसम्भवः।
अच्छः+ जलोपमः+अजस्रं विशेषात्+निशि जायते॥19॥
कफः प्रवृद्धः+ नासायां रुद्ध्वा स्रोतांसि+अपीनसम्।
कुर्यात्+सघुर्घुरश्वासं पीनसाधिकवेदनम्॥20॥
अवेः+इव स्रवति+अस्य प्रक्लिन्ना तेन नासिका।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम्॥21॥
रक्तेन नासा दग्धः+इव बाह्यान्तः स्पर्शनासहा।
भवेत्+धूमोपमोच्छ्वासा सा दीप्तिः+दहति+इव च॥22॥
तालुमूले मलैः+दुष्टैः+मारुतः+ मुखनासिकात्।
श्लेष्मा च पूतिः+निर्गच्छेत् पूतिनासं वदन्ति तम्॥23॥
निचयात्+अभिघातात्+वा पूयासृङ् नासिका स्रवेत्।
तत्+पूयरक्तम्+आख्यातं शिरोदाहरुजाकरम्॥24॥
पित्तश्लेष्मावरुद्धः+अन्तर्नासायां शोषयेत्+मरुत्।
कफं, सः+ शुष्कः पुटतां प्राप्नोति पुटकं तु तत्॥25॥
अर्शोर्बुदानि विभजेत्+दोषलिङ्गैः+यथायथम्।
सर्वेषु कृच्छ्रोच्छ्वसनं पीनसः प्रततं क्षुतिः॥26॥
सानुनासिकवादित्वं पूतिनासः शिरोव्यथा।
अष्टादशानाम्+इति+एषां यापयेत्+दुष्टपीनसम्॥27॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने नासारोगविज्ञानीयः+ नाम+एकोनविंशः+अध्यायः॥19॥

## विंशः+अध्यायः।

अथ+अतः+ नासारोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वेषु पीनसेषु+आदौ निवातागारगः+ भजेत्।
स्नेहनस्वेदवमनधूमगण्डूषधारणम्॥1॥

वासः+ गुरूष्णं शिरसः सुघनं परिवेष्टनम्।
लघ्वम्ललवणं स्निग्धम्+उष्णं भोजनम्+अद्रवम्॥2॥
धन्वमांसगुडक्षीरचणकत्रिकटूत्कटम्।
यवगोधूमभूयिष्ठं दधिदाडिमसारिकम्॥3॥
बालमूलकजः+ यूषः कुलत्थोत्थः+च पूजितः।
कवोष्णं दशमूलाम्बु जीर्णां वा वारुणी पिबेत्॥4॥
जिघ्रेत्+चोरकतर्करीवचाजाज्युपकुञ्चिकाः।
व्योषतालीसचविकातिन्तिडीकाम्लवेतसम्॥5॥
साग्न्यजाजि द्विपलिकं त्वगेलापत्रपादिकम्।
जीर्णात्+गुडात्+तुलार्धेन पक्वेन वटकीकृतम्॥6॥
पीनसश्वासकासघ्नं रुचिस्वरकरं परम्।
शताह्वात्वग्बला मूलं स्योनाकैः+अण्डबिल्वजम्॥7॥
सारग्वधं पिबेत्+धूमं वसाज्यमदनान्वितम्।
अथवा सघृतान् सक्तून् कृत्वा मल्लकसम्पुटे॥8॥
त्यजेत्स्नानं शुचं क्रोधं भृशं शय्यां हिमं जलम्।
पिबेत्+वातप्रतिश्याये सर्पिः+वातघ्नसाधितम्॥9॥
पटुपञ्चकसिद्धं वा विदार्यादिगणेन वा।
स्वेदनस्यादिकां कुर्यात् चिकित्साम्+अर्दितोदिताम्॥10॥
पित्तरक्तोत्थयोः पेयं सर्पिः+मधुरकैः शृतम्।
परिषेकान् प्रदेहान्+च शीतैः कुर्वीत शीतलान्॥11॥
धवत्वक्त्रिफलाश्यामाश्रीपर्णीयष्टितिल्वकैः।
क्षीरे दशगुणे तैलं नावनं सनिशैः पचेत्॥12॥
कफजे लङ्घनं लेपः शिरसः+ गौरसर्षपैः।
सक्षारं वा घृतं पीत्वा वमेत्, पिष्टैः+तु नावनम्॥13॥
बस्ताम्बुना पटुव्योषवेल्लवत्सकजीरकैः।
कटुतीक्ष्णैः+घृतैः+नस्यैः कवलैः सर्वजं जयेत्॥24॥
यक्ष्मकृमिक्रमं कुर्वन् यापयेत्+दुष्टपीनसम्।
व्योषोरुबूककृमिजिद्दारुमाद्रीगदेङ्गुदम्॥15॥
वार्ताकबीजं त्रिवृता सिद्धार्थः पूतिमत्स्यकः।
अग्निमन्थस्य पुष्पाणि पीलुशिग्रुफलानि च॥16॥
अश्वविड्रसमूत्राभ्यां हस्तिमूत्रेण च+एकतः।
क्षौमगर्भा कृतां वर्तिं धूमं घ्राणास्यतः पिबेत्॥17॥

क्षवथौ पुटकाख्ये च तीक्ष्णैः प्रधमनं हितम्।
शुण्ठीकुष्ठकणावेल्लद्राक्षाकल्ककषायवत्॥18॥
साधितं तैलम्+आज्यं वा नस्यं क्षवपुटप्रणुत्।
नासाशोषे बलातैलं पानादौ भोजनं रसैः॥19॥
स्निग्धः+ धूमः+तथा स्वेदः+ नासानाहे+अपि+अयं विधिः।
पाके दीप्तौ च पित्तघ्नं तीक्ष्णं नस्यादि संस्रुतौ॥20॥
कफपीनसवत्पूतिनासापीनसयोः क्रिया।
लाक्षाकरञ्जमरिचवेल्लहिङ्गुकणागुडैः॥21॥
अविमूत्रद्रुतैः+नस्यं कारयेत्+वमने कृते।
शिग्रुसिंहीनिकुम्भानां बीजैः सव्योषसैन्धवैः॥22॥
सवेल्लसुरसैः+तैलं नावनं परमं हितम्।
पूयरक्ते नवे कुर्यात्+ रक्तपीनसवत् क्रमम्॥23॥
अतिप्रवृद्धे नाडीवत् दग्धेषु+अर्शोर्बुदेषु च।
निकुम्भकुम्भसिन्धूत्थमनोह्वालकणाग्निकैः॥24॥
कल्कितैः+घृतमध्वक्तां घ्राणे वर्तिं प्रवेशयेत्।
शिग्र्वादि नावनं च+अत्र पूतिनासोदितं भजेत्॥25॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने नासारोगप्रतिषेधः+ नाम विंशः+अध्यायः॥20॥
एकविंशः+अध्यायः।
अथ+अतः+ मुखरोगविज्ञानीयं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
मात्स्यमाहिषवाराहपिशितामकमूलकम्।
माषसूपदधिक्षीरसुक्तेक्षुरसफाणितम्॥1॥
अवाक्शय्यां च भजतः+ द्विषतः+ दन्तधावनम्।
धूमच्छर्दनगण्डूषानुचितं च सिराव्यधम्॥2॥
क्रुद्धाः श्लेष्मोल्बणा दोषाः कुर्वन्ति+अन्तर्मुखं गदान्।
तत्र खण्डौष्ठ इति+उक्तः+ वातेनौष्ठः+ द्विधा कृतः॥3॥
ओष्ठकोपे तु पवनात् स्तब्धौ+ओष्ठौ महारुजौ।
दाल्येते परिपाट्येते परुषासितकर्कशौ॥4॥
पित्तात्+तीक्ष्णासहौ पीतौ सर्षपाकृतिभिः+चितौ।
पिटिकाभिः+बहुक्लेदौ+आशुपाकौ कफात्+पुनः॥5॥
शीतासहौ गुरू शूनौ सवर्णपिटिकाचितौ।

सन्निपातात्+अनेकाभौ दुर्गन्धास्रावपिच्छिलौ॥6॥
अकस्मात्+म्लानसंशूनरुजौ विषमपाकिनौ।
रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ॥7॥
खर्जूरसदृशं च+अत्र क्षीणे रक्ते+अर्बुदं भवेत्।
मांसपिण्डोपमौ मांसात्+स्यातां मूर्च्छत्+कृमी क्रमात्॥8॥
तैलाभश्वयथुक्लेदौ सकण्ड्वौ मेदसा मृदू।
क्षतजौ+अवदीर्येते पाट्येते च+असकृत्+पुनः॥9॥
ग्रथितौ च पुनः स्यातां कण्डूलौ दशनच्छदौ।
जलबुद्बुदवत्+वातकफात्+ओष्ठे जलार्बुदम्॥10॥
गण्डालजी स्थिरः शोफः+ गण्डे दाहज्वरान्वितः।
वातात्+उष्णसहा दन्ताः शीतस्पर्शे+अधिकव्यथाः॥11॥
दाल्यन्तः+ इव शूलेन शीताख्यः+ दालनः+च सः।
दन्तहर्षे प्रवाताम्लशीतभक्षाक्षमा द्विजाः॥12॥
भवन्ति+अम्लाशनेन+एव सरुजाः+चलिता इव।
दन्तभेदे द्विजास्तोदभेदरुक्स्फुटनान्विताः॥13॥
चालः+चलद्भिः+दशनैः+भक्षणात्+अधिकव्यथैः।
करालः+तु करालानां दशनानां समुद्गमः॥14॥
दन्तः+अधिकः+अधिदन्ताख्यः सः+ च+उक्तः खलु वर्धनः।
जायमाने+अतिरुक्+ दन्ते, जाते तत्र तु शाम्यति॥15॥
अधावनात्+मलः+ दन्ते कफः+ वा वातशोषितः।
पूतिगन्धिः स्थिरीभूतः शर्करा सा+अपि+उपेक्षिता॥16॥
शातयति+अणुशः+ दन्तात्+कपालानि कपालिका।
श्यावः श्यावत्वम्+आयातः+ रक्तपित्तानिलैः+द्विजः॥17॥
समूलं दन्तम्+आश्रित्य दोषैः+उल्बणमारुतैः।
शोषिते मज्ज्ञि सुषिरे दन्ते+अन्नमलपूरिते॥18॥
पूतित्वात्+कृमयः सूक्ष्मा जायन्ते, जायते ततः।
अहेतुतीव्रार्तिशमः ससंरम्भः+असितः+चलः॥19।
प्रलूनः पूयरक्तस्रुत् सः+ च+उक्तः कृमिदन्तकः।
श्लेष्मरक्तेन पूतीनि वहन्ति+अस्रम्+अहेतुकम्॥20॥
शीर्यन्ते दन्तमांसानि मृदुक्लिन्नासितानि च।
शीतादः+असौ उपकुशः पाकः पित्तासृक्+उद्भवः॥21॥
दन्तमांसानि दह्यन्ते रक्तानि+उत्सेधवन्ति+अतः।

कण्डूमन्ति स्रवन्ति+अस्रमाध्मायन्ते+असृजि स्थिते॥22॥

चला मन्दरुजः+ दन्ता पूति वक्त्रं च जायते।

दन्तयोः+त्रिषु वा शोफः+ बदरास्थिनिभः+ घनः॥23॥

कफास्रात्+तीव्ररुक् शीघ्रं पच्यते दन्तपुप्पुटः।

दन्तमांसे मलैः सास्रैः+बाह्यान्तः श्वयथुः+गुरुः॥24॥

सरुग्दाहः स्रवेत्+भिन्नः पूयास्रं दन्तविद्रधिः।

श्वयथुः+दन्तमूलेषु रुजावान् पित्तरक्तजः॥25॥

लालास्नावी सः+ सुषिरः+ दन्तमांसप्रशातनः।

स सन्निपातात्+ज्वरवान् सपूयरुधिरस्रुतिः॥26॥

महासुषिरः+ इति+उक्तः+ विशीर्णद्विजबन्धनः।

दन्तान्ते कीलवत्+शोफः+ हनुकर्णरुजाकरः॥27॥

प्रतिहन्ति+अभ्यवहृतिं श्लेष्मणा सः+अधिमांसकः।

घृष्टेषु दन्तमांसेषु संरम्भः+ जायते महान्॥28॥

यस्मिन्+चलन्ति दन्ताः+च सः+ विदर्भः+अभिघातजः।

दन्तमांसाश्रितान् रोगान् यः साध्यान्+अपि+उपेक्षते॥29॥

अन्तस्तस्य+अस्रवन् दोषः सूक्ष्मां सञ्जनयेत्+गतिम्।

पूयं मुहुः सा स्रवति त्वङ्मांसास्थिप्रभेदिनी॥30॥

ताः पुनः पञ्च विज्ञेया लक्षणैः स्वैः+यथा+उदितैः।

शाकपत्रखरा सुप्ता स्फुटिता वातदूषिता॥31॥

जिह्वा पित्तात् सदाहोषा रक्तैः+मांसाङ्कुरैः+चिता।

शाल्मलीकण्टकाभैः+तु कफेन बहला गुरुः॥32॥

कफपित्तात्+अधः शोफः+ जिह्वास्तम्भकृत्+उन्नतः।

मत्स्यगन्धिः+भवेत्+पक्वः सः+अलसः+ मांसशातनः॥33॥

प्रबन्धने+अधः+ जिह्वायाः शोफः+ जिह्वाग्रसन्निभः।

साङ्कुरः कफपित्तास्रैः+लालोषास्तम्भवान् खरः॥34॥

अधिजिह्वः सरुक्कण्डूर्वाक्याहारविघातकृत्।

तादृगक्+एव+उपजिह्वः+तु जिह्वाया उपरि स्थितः॥35॥

तालुमांसे+अनिलात्+दुष्टे पिटिकाः सरुजः खराः।

बह्व्यः+ घनाः स्रावयुताः+ताः+तालुपिटिकाः स्मृताः॥36॥

तालुमूले कफात्+सास्रात् मत्स्यबस्तिनिभः+ मृदुः।

प्रलम्बः पिच्छिलः शोफः+ नासया+आहारम्+ईरयन्॥37॥

कण्ठोपरोधतृट्कासवमिकृत् गलशुण्डिका।

तालुमध्ये निरुङ्मांसं संहतं तालुसंहतिः॥38॥

पद्माकृतिः+तालुमध्ये रक्तात्+श्वयथुः+अर्बुदम्।

कच्छपः कच्छपाकाराः+चिरवृद्धिः कफात्+अरुक्॥39॥

कोलाभः श्लेष्ममेदोभ्यां पुप्पुटः+ नीरुजः स्थिरः।

पित्तेन पाकः पाकाख्यः पूयास्रावी महारुजः॥40॥

वातपित्तज्वरायासैः+तालुशोषः+तदाह्वयः।

जिह्वाप्रबन्धजाः कण्ठे दारुणा मार्गरोधिनः॥41॥

मांसाङ्कुराः शीघ्रचया रोहिणी शीघ्रकारिणी।

कण्ठास्यशोषकृत्+वातात् सा हनुश्रोत्ररुक्करी॥42॥

पित्तात्+ज्वरोषातृण्मोहकण्ठधूमायनान्विता।

क्षिप्रजा क्षिप्रपाका+अतिरागिणी स्पर्शनासहा॥43॥

कफेन पिच्छिला पाण्डुः असृजा स्फोटकाचिता।

तप्ताङ्गारनिभा कर्णरुक्करी पित्तजाकृतिः॥44॥

गम्भीरपाका निचयात् सर्वलिङ्गसमन्विता।

दोषैः कफोल्बणैः शोफः कोलवत्+ ग्रथितोन्नतः॥45॥

शूककण्टकवत्+कण्ठे शालूकः+ मार्गरोधनः।

वृन्दः+ वृत्तोन्नतः+ दाहज्वरकृत्+ गलपार्श्वगः॥46॥

हनुसन्ध्याश्रितः कण्ठे कार्पासीफलसन्निभः।

पिच्छिलः+ मन्दरुक् शोफः कठिनः+तुण्डिका+ईरिका॥47॥

बाह्यान्तः श्वयथुः+घोरः+ गलमार्गार्गलोपमः।

गलौघः+ मूर्द्धगुरुतातन्द्रालालाज्वरप्रदः॥48॥

वलयं न+अतिरुक् शोफः+तद्वत्+एव+आयतोन्नतः।

मांसकीलः+ गले दोषैः+एकः+अनेकः+अथवा+अल्परुक्॥49॥

कृच्छ्रोच्छ्वासाभ्यवहृतिः पृथुमूलः+ गिलायुकः।

भूरिमांसाङ्कुरवृता तीव्रतृड्ज्वरमूर्द्धरुक्॥50॥

शतघ्नी निचिता वर्तिः शतघ्नीवातिरुक्करी।

व्याप्तसर्वगलः शीघ्रजन्मपाकः+ महारुजः॥51॥

पूतिपूयनिभस्रावी श्वयथुः+गलविद्रधिः।

जिह्वावसाने कण्ठात्+आवपाकं श्वयथुं मलाः॥51॥

जनयन्ति स्थिरं रक्तं नीरुजं तद्गलार्बुदम्।

पवनश्लेष्मोदोभिः+गलगण्डः+ भवेत्+बहिः।

वर्धमानः सः+ कालेन मुष्कवत्+लम्बते+अतिरुक्॥53॥

कृष्णः+अरुणः+ वातोदाढ्यः सः+ वातात्+कृष्णराजिमान्।
वृद्धः+तालुगले शोषं कुर्यात्+च विरसास्यताम्॥54॥
स्थिरः सर्वणः कण्डूमान् शीतस्पर्शः+ गुरुः कफात्।
वृद्धः+तालुगले लेपं कुर्यात्+च मधुरास्यताम्॥55॥
मेदसः श्लेष्मवत्+हानिवृद्ध्योः सः+अनुविधीयते।
देहं वृद्धः+च कुरुते गले शब्दं स्वरे+अल्पताम्॥56॥
श्लेष्मरुद्धा+अनिलगतिः शुष्ककण्ठः+ हतस्वरः।
ताम्यन् प्रसक्तं श्वसिति येन सः+ स्वरहा+अनिलात्॥57॥
करोति वदनस्य+अन्तर्व्रणान् सर्वसरः+अनिलः।
सञ्चारिणः+अरुणान् रूक्षान्+ओष्ठौ ताम्रौ चलत्वचौ॥58॥
जिह्वा शीतासहा गुर्वी स्फुटिता कण्टकाचिता।
विवृणोति च कृच्छ्रेण मुखं पाकः+ मुखस्य सः॥59॥
अधः प्रतिहतः+ वायुः+अर्शोगुल्मकफादिभिः।
याति+ऊर्ध्वं वक्त्रदौर्गन्ध्यं कुर्वन्+ऊर्ध्वगुदः+तु सः॥60॥
मखस्य पित्तजे पाके दाहोषे तिक्तवक्त्रता।
क्षारोक्षितक्षतसमा व्रणाः तद्वत्+च रक्तजे॥61॥
कफजे मधुरास्यत्वं कण्डूमत्+पिच्छिला व्रणाः।
अन्तःकपोलम्+आश्रित्य श्यावपाण्डु कफः+अर्बुदम्॥62॥
कुर्यात्तत्+ घट्टितं छिन्नं मृदितं च विवर्धते।
मुखपाकः+ भवोत्+सास्रैः सर्वैः सर्वाकृतिः+मलैः॥63॥
पूत्यास्यता च तैः+एव दन्तकाष्ठादिविद्विषः।
ओष्ठे गण्डे द्विजे मूले जिह्वायां तालुके गले॥64॥
वक्त्रे सर्वत्रे च+इत्युक्ताः पञ्चसप्ततिरामयाः।
एकादशैकः+ दश च त्रयोदश तथा च षट्॥65॥
अष्टौ+अष्टादशाष्टौ च क्रमात् तेषु+अनुपक्रमाः।
करालः+ मांसरक्तौष्ठौ+अर्बुदानि जलात्+विना॥66॥
कच्छपः+तालुपिटिका गलौघः सुषिरः+ महान्।
स्वरघ्नोर्ध्वगुदश्यावशतघ्नीवलयालसाः॥67॥
नाड्योष्ठकोपौ निचयात्, रक्तात्+सर्वैः+च रोहिणी।
दशने स्फुटिते दन्तभेदः, पक्वोपजिह्विका॥68॥
गलगण्डः स्वरभ्रंशी कृच्छ्रोच्छ्वासः+अतिवत्सरः।
याप्यः+तु हर्षः+ भेदः+च शेषान् शस्त्रौषधैः+जयेत्॥69॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने मुखरोगविज्ञानीयः+नाम+एकविंशः+अध्यायः॥21॥

द्वाविंशः+अध्यायः।

अथ+अतः+ मुखरोगप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

खण्डौष्ठस्य विलिख्यान्तौ स्यूत्वा व्रणवत्+आचरेत्।

यष्टीज्योतिष्मतीरोध्रश्रावणीसारिवोत्पलैः॥1॥

पटोल्या काकमाच्या च तैलम्+अभ्यञ्जनं पचेत्।

नस्यं तैलं वातघ्नमधुरस्कन्धसाधितम्॥2॥

महास्नेहेन वातौष्ठे सिद्धेनाक्तः पिचुः+हितः।

देवधूपमधूच्छिष्टगुग्गुल्वमरदारुभिः॥3॥

यष्ट्याह्वचूर्णयुक्तेन तेन+एव प्रतिसारणम्।

नाड्योष्ठं स्वेदयेत्+दुग्धसिद्धैः+एरण्डपल्लवैः॥4॥

खण्डौष्ठविहितं नस्यं तस्य मूर्ध्नि च तर्पणम्।

पित्ताभिघातजौ+ओष्ठौ जलौकोभिः+उपाचरेत्॥5॥

रोघ्रसर्जरसक्षौद्रमधुकैः प्रतिसारणम्।

गुडूचीयष्टीपत्तङ्गसिद्धम्+अभ्यञ्जने घृतम्॥6॥

पित्तविद्रधिवत्+च+अत्र क्रिया शोणितजे+अपि च।

इदम्+एव नवे कार्यं कर्म ओष्ठे तु कफातुरे॥7॥

पाठाक्षारमधुव्योषैः+हृतास्रे प्रतिसारणम्।

धूमनावनगण्डूषाः प्रयोज्याः+च कफच्छिदः॥8॥

स्विन्नं भिन्नं विमेदस्कं दहेत्+मेदोजम्+अग्निना।

प्रियङ्गुरोध्रत्रिफलामाक्षिकैः प्रतिसारयेत्॥9॥

सक्षौद्रा घर्षणं तीक्ष्णा भिन्नशुद्धे जलार्बुदे।

अवगाढे+अतिवृद्धे वा क्षारः+अग्निः+वा प्रतिक्रिया॥10॥

आमाद्यवस्थास्वलजीं गण्डे शोफवत्+आचरेत्।

स्विन्नस्य शीतदन्तस्य पालीं विलिखितां दहेत्॥11।

तैलेन प्रतिसार्या च सक्षौद्रघनसैन्धवैः।

दाडिमत्वग्वराताक्ष्र्यकान्ताजम्ब्वस्थिनागरैः॥12॥

कवलः क्षीरिणां क्वाथैः+अणुतैलं च नावनम्।

दन्तहर्षे तथा भेदे सर्वा वातहरा क्रिया॥13॥

तिलयष्टीमधुशृतं क्षीरं गण्डूषधारणम्।

सस्नेहं दशमूलाम्बु गण्डूषः प्रचलत्+द्विजे॥14॥
तुत्थरोध्रकणाश्रेष्ठापत्तङ्गपटुघर्षणम्।
स्निग्धाः शील्या यथावस्थं नस्यान्नकवलादयः॥15॥
अधिदन्तकम्+आलिप्तं यदा क्षारेण जर्जरम्।
कृमिदन्तम्+इव+उत्पाट्य तद्वत्+च+उपचरेत्+तदा॥16॥
अनवस्थितरक्ते च दग्धे व्रणः+ इव क्रिया।
अहिंसन् दन्तमूलानि दन्तेभ्यः शर्करां हरेत्॥17॥
क्षारचूर्णैः+मधुयुतैः+ततः+च प्रतिसारयेत्।
कपालिकायाम्+अपि+एवं हर्षोक्तं च समाचरेत्॥18॥
जयेत्+विस्रावणैः स्विन्नम्+अचलं कृमिदन्तकम्।
स्निग्धैः+च+अलेपगण्डूषनस्याहारैः+चलापहैः॥19॥
गुडेन पूर्णं सुषिरं मधूच्छिष्टेन वा दहेत्।
सप्तच्छदार्कक्षीराभ्यां पूरणं कृमिशूलजित्॥20॥
हिङ्गुकट्फलकासीसस्वर्जिकाकुष्ठवेल्लजम्।
रजः+ रुजं जयति+आशु वस्त्रस्थं दशने धृतम्॥21॥
गण्डूषं ग्राहयेत्+तैलम्+एभिः+एव च साधितम्।
क्वाथैः+वा युक्तम्+एरण्डद्विव्याघ्रीभूकदम्बजैः॥22॥
क्रियायोगैः+बहुविधैः+इति+अशान्तरुजं भृशम्।
दृढम्+अपि+उद्धरेत्+दन्तं पूर्वं मूलात्+विमोक्षितम्॥23॥
सन्दंशकेन लघुना दन्तनिर्घातनेन वा।
तैलं सयष्ट्याह्वरजः+ गण्डूषः+ मधु वा ततः॥24॥
ततः+ विदारियष्ट्याह्वशृङ्गाटककसेरुभिः।
तैलं दशगुणक्षीरं सिद्धं युञ्जीत नावनम्॥25॥
कृशदुर्बलवृद्धानां वातार्तानां च न+उद्धरेत्।
न+उद्धरेत्+च+उत्तरं दन्तं बहूपद्रवकृत्+हि सः॥26॥
एषाम्+अपि+उद्धृतौ स्निग्धस्वादुशीतक्रमः+ हितः।
विस्रावितास्रे शीतादे सक्षौद्रैः प्रतिसारणम्॥27॥
मुस्तार्जुनत्वक्त्रिफलाफलिनीतार्क्ष्यनागरैः।
तत्+क्वाथः कवलः+, नस्यं तैलं मधुरसाधितम्॥28॥
दन्तमांसानि+उपकुशे स्विन्नानि+उष्णाम्बुधारणैः।
मण्डलाग्रेण शाकादिपत्रैः+वा बहुशः+ लिखेत्॥29॥
ततः+च प्रतिसार्याणि घृतमण्डमधुद्रुतैः।

लाक्षाप्रियङ्गुपत्तङ्गलवणोत्तमगैरिकैः॥30॥
सकुष्ठशुण्ठीमरिचयष्टीमधुरसाञ्जनैः।
सुखोष्णः+ घृतमण्डः+अनु तैलं वा कवलग्रहः॥31॥
घृतं च मधुरैः सिद्धं हितं कवलनस्ययोः।
दन्तपुप्पुटके स्विन्नछिन्नभिन्नविलेखिते॥32॥
यष्ट्याह्वस्वर्जिकाशुण्ठीसैन्धवैः प्रतिसारणम्।
विद्रधौ कटुतीक्ष्णोष्णरूक्षैः कवललेपनम्॥33॥
घर्षणं कटुकाकुष्ठवृश्चिकालीयवोद्भवैः।
रक्षेत्+पाकं हिमैः पक्वः पाट्यः+ दाह्यः+अवगाढकः॥34॥
सुषिरे छिन्नलिखिते सक्षौद्रैः प्रतिसारणम्।
रोध्रमुस्तमिशिश्रेष्ठाताक्ष्र्यपत्तङ्गकिंशुकैः॥35॥
सकट्फलैः, कषायैः+च तेषां गण्डूषः+ इष्यते।
यष्टीरोध्रोत्पलानन्तासारिवागुरुचन्दनैः॥36॥
सगैरिकसितापुण्ड्रैः सिद्धं तैलं च नावनम्।
छित्त्वा+अधिमांसकं चूर्णैः सक्षौद्रैः प्रतिसारयेत्॥37॥
वचातोजोवतीपाठास्वर्जिकायवशूकजैः।
पटोलनिम्बत्रिफलाकषायः कवलः+ हितः॥38॥
विदर्भे दन्तमूलानि मण्डलाग्रेण शोधयेत्।
क्षारं युञ्ज्यात्+ततः+ नस्यं गण्डूषादि च शीतलम्॥39॥
संशोध्य+उभयतः कायं शिरः+च+उपचरेत्+ततः।
नाडीं दन्तानुगां दन्तं समुद्धृत्य+अग्निना दहेत्॥40॥
कुब्जां न+एकगतिं पूर्णा गुडेन मदनेन वा।
धावनं जातिमदनखदिरस्वादुकण्टकैः॥41॥
क्षीरिवृक्षाम्बुगण्डूषः+, नस्यं तैलं च तत्+कृतम्।
कुर्यात्+वातौष्ठकोपोक्तं कण्टकेषु+अनिलात्मसु॥42॥
जिह्वायां पित्तजातेषु घृष्टेषु रुधिरे स्रुते।
प्रतिसारणगण्डूषनावनं मधुरैः+हितम्॥43॥
तीक्ष्णैः कफोत्थेषु+एवं च सर्षपत्र्यूषणादिभिः।
नवे जिह्वालसे+अपि+एवं, तं तु शस्त्रेण न स्पृशेत्॥44॥
उन्नम्य जिह्वाम्+आकृष्टां बडिशेन+अधिजिह्विकाम्।
छेदयेत्+मण्डलाग्रेण तीक्ष्णोष्णैः+घर्षणादि च॥45॥
उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत्।

कफघ्नैः शुण्डिका साध्या नस्यगण्डूषघर्षणैः॥46॥
एर्वारुबीजप्रतिमं वृद्धायाम्+असिराततम्।
अग्रं निविष्टं जिह्वाया बडिशाद्यवलम्बितम्॥47॥
छेदयेत्+मण्डुलाग्रेण न+अत्यग्रे न च मूलतः।
छेदे+अत्यसृक्क्षयात्+मृत्युः+हीने व्याधिः+विवर्द्धते॥48॥
मरिचातिविषापाठावचाकुष्ठकुटन्नटैः।
छिन्नायां सपटुक्षौद्रैः+घर्षणं, कवलः पुनः॥49॥
कटुकातिविषापाठानिम्बरास्नावचाम्बुभिः।
सञ्जाते पुप्पुटे कूर्मे विलिख्य+एवं समाचरेत्॥50॥
अपक्वे तालुपाके तु कासीसक्षौद्रताक्ष्र्यजैः।
घर्षणं, कवलः शीतकषायमधुरौषधैः॥51॥
पक्वे+अष्टापदवत्+भिन्ने तीक्ष्णोष्णैः प्रतिसारणम्।
वृषनिम्बपटोलाद्यैः+तिक्तैः कवलधारणम्॥52॥
तालुशोषे तु+अतृष्णस्य सर्पिः+उत्तरभक्तिकम्।
कणाशुण्ठीशृतं पानम्+अम्लैः+गण्डूषधारणम्॥53॥
धन्वमांसरसाः स्निग्धाः, क्षीरसर्पिः+च नावनम्।
कण्ठरोगेषु+असृङ्मोक्षः+तीक्ष्णैः+नस्यादि कर्म च॥54॥
क्वाथः पानं च दार्वीत्वङ्निम्बताक्ष्र्यकलिङ्गजः।
हरीतकीकषायः+ वा पेयः+ माक्षिकसंयुतः॥55॥
श्रेष्ठाव्योषयवक्षारदार्वीद्वीपिरसाञ्जनैः।
सपाठातेजिनीनिम्बैः सुक्तगोमूत्रसाधितैः॥56॥
कवलः+, गुटिका वा+अत्र कल्पिता प्रतिसारणम्।
निचुलं कटभी मुस्तं देवदारु महौषधम्॥57॥
वचा दन्ती च मूर्वा च लेपः कोष्णः+अर्तिशोफहा।
अथ+अन्तर्बाह्यतः स्विन्नां वातरोहिणिकां लिखेत्॥58॥
अङ्गुलीशस्त्रकेण+आशु पटुयुक्तनखेन वा।
पञ्चमूलाम्बु कवलः+तैलं गण्डूषनावनम्॥59॥
विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः।
घर्षेत्+सरोध्रपत्तङ्गैः कवलः क्वथितैः+च तैः॥60॥
द्राक्षापरूषकक्वाथौ हितः+च कवलग्रहे।
उपाचरेत्+एम्+एव प्रत्याख्यायास्रसम्भवाम्॥61॥
सागारधूमैः कटुकैः कफजां प्रतिसारयेत्।

नस्यगण्डूषयोः+तैलं साधितं च प्रशस्यते॥62॥
अपामार्गफलश्वेतादन्तीजन्तुघ्नसैन्धवैः।
तद्वत्+च वृन्दशालूकतुण्डिकेरीगिलायुषु॥63॥
विद्रधौ स्राविते श्रेष्ठारोचनाताक्ष्र्यगैरिकैः।
सरोध्रपटुपत्तङ्गकणैः+गण्डूषघर्षणे॥64॥
गलगण्डः पवनजः स्विन्नः+ निःस्रुतशोणितः।
तिलैः+बीजैः+च लट्वोमाप्रियालशणसम्भवैः॥65॥
उपनाह्यः+, व्रणे रुढे प्रलेप्यः+च पुनः पुनः।
शिग्रुतिल्वकतर्करीगजकृष्णापुनर्नवैः॥66॥
कालामृतार्कमूलैः+च पुष्पैः+च करहाटजैः।
एकैषिकान्वितैः पिष्टैः सुरया काञ्जिकेन वा॥67॥
गुडूचीनिम्बकुटजहंसपादीबलाद्वयैः।
साधितं पाययेत्+तैलं सकृष्णादेवदारुभिः॥68॥
कर्तव्यं कफजे+अपि+एतत्+स्वेदविम्लापने तु+अति।
लेपः+अजगन्धातिविषाविशल्याः सविषाणिकाः॥69॥
गुञ्जालाबुशुकाह्वाः+च पलाशक्षारकल्किताः।
मूत्रस्रुतं हठक्षारं पक्त्वा कोद्रवभुक् पिबेत्॥70॥
साधितं वत्सकाद्यैः+वा तैलं सपटुपञ्चकैः।
कफघ्नान् धूमवमननावनादीन्+च शीलयेत्॥71॥
मेदोभवे सिरां विध्येत्+कफघ्नं च विधिं भजेत्।
असनादिरजः+च+एनं प्रातः+मूत्रेण पाययेत्॥72॥
अशान्तौ पाचयित्वा च सर्वान् व्रणवत्+आचरेत्।
मुखपाकेषु सक्षौद्रा प्रयोज्या मुखधावनाः॥73॥
क्वथिताः+त्रिफलापाठामृद्वीकाजातिपल्लवाः।
निष्ठेव्या भक्षयित्वा वा कुठेरादिः+गणः+अथवा॥74॥
मुखपाके+अनिलात् कृष्णापट्वेलाः प्रतिसारणम्।
तैलं वातहरैः सिद्धं हितं कवलनस्ययोः॥75॥
पित्तास्रे पित्तरक्तघ्नः कफघ्नः+च कफे विधिः।
लिखेत्+शाकादिपत्रैः+च पिटिकाः कठिनाः स्थिराः॥76॥
यथादोषोदयं कुर्यात्+संन्निपाते चिकित्सितम्।
नवे+अर्बुदे तु+असंवृद्धे छेदिते प्रतिसारणम्॥77॥
स्वर्जिकानागरक्षौद्रैः, क्वाथः+ गण्डूषः+ इष्यते।

गुडूचीनिम्बकल्कोत्थः+ मधुतैलसमन्वितः॥78॥

यवान्नभुक् तीक्ष्णतैलनस्याभ्यङ्गान्+तथा+आचरेत्।

वमिते पूतिवदने धूमः+तीक्ष्णः सनावनः॥79॥

समङ्गाधातकीरोध्रफलिनीपद्मकैः+जलम्।

धावनं वदनस्य+अन्तः+चूर्णितैः+अवचूर्णितम्॥80॥

शीतादोपकुशोक्तं च नावनादि च शीलयेत्।

फलत्रयद्वीपिकिराततिक्तयष्ट्याह्वसिद्धार्थकटुत्रिकाणि।

मुस्ताहरिद्राद्वययावशूकवृक्षाम्लकाम्लाग्निमवेतसाः+च॥81॥

अश्वत्थजम्ब्वाम्रधनञ्जयत्वक् त्वक् च+अहिमारात्+खदिरस्य सारः।

क्वाथेन तेषां घनतां गतेन तत्+चूर्णयुक्ता गुटिका विधेयाः॥82॥

ता धारिता घ्नन्ति मुखेन नित्यं कण्ठौष्ठकल्वादिगदान् सुकृच्छ्रान्।

विशेषतः+ रोहिणिकास्यशोषगन्धान् विदेहाधिपतिप्रणीतः॥83॥

खदिरतुलाम्+अम्बुघटे पक्त्वा तोयेन तेन पिष्टैः+च।

चन्दनजोङ्गककुङ्कुमपरिपेलववालकोशीरैः॥84॥

सुरतरुरोध्रद्राक्षामञ्जिष्ठाचोचपद्मकविडङ्गैः।

स्पृक्कानतनखकट्फलसूक्ष्मैलाध्यामकैः सपत्तङ्गैः॥85॥

तैलप्रस्थं विपचेत्+कर्षांशैः पाननस्यगण्डूषैः+तत्।

हत्वा+आस्ये सर्वगदान् जनयति गार्ध्रीं दृशं श्रुतिं च वाराहीम्॥86॥

उद्वर्तितं च प्रपुनाटरोध्रदार्वीभिः+अभ्यक्तम्+अनेन वक्त्रम्।

निर्व्यङ्गनीलीमुखदूषिकादि सञ्जायते चन्द्रसमानकान्ति॥87॥

पलशतं बाणात्+तोयघटे पक्त्वा रसे+अस्मिन्+च पलार्धिकैः।

खदिरजम्बूयष्ट्यानन्ताम्रैः+अहिमारनीलोत्पलान्वितैः॥88॥

तैलप्रस्थं पाचयेत्+श्लक्ष्णपिष्टैः+एभिः+द्रव्यैः+धारितं तन्मुखेन।

रोगान् सर्वान् हन्ति वक्त्रे विशेषात्+स्थैर्यं धत्ते दन्तपङ्क्तेः+चलायाः॥89॥

खदिरसारात्+ द्वे तुले पचेत्+वल्कात्+तुलां च+अरिमेदसः।

घटचतुष्के पाधशेषे+अस्मिन् पूते पुनः क्वथनात्+घने॥90॥

आक्षिकं क्षिपेत्+सुसूक्ष्मं रजः सेव्याम्बुपत्तङ्गगैरिकम्।

चन्दनद्वय(श्यामा)रोध्रपुण्ड्राह्वयष्ट्याह्वलाक्षाञ्जनद्वयम्॥91॥

धातकीकट्फलद्विनिशात्रिफलाचतुर्जातजोङ्गकम्।

मुस्तमञ्जिष्ठान्यग्रोधप्ररोह[वचा]मांसीयवासकम्॥92॥

पद्मकैलासम्+अङ्गाः+च शीते तस्मिन्+तथा पालिका पृथक्।

जातिपत्रिकां सजातीफलां सह(नख)लवङ्गकङ्कोल्लकाम्॥93॥

स्फटिकशुभ्रसुरभिकर्पूरकुडवं च तत्र+आवपेत्+ततः।
कारयेत्+गुटिकाः सदा च+एता धार्या मुखे तद्गदापहाः॥94॥
क्वाथ्यौषधव्यत्यययोजनेन तैलं पचेत्+कल्पनया+अनया+एव।
सर्वास्यरोगोद्धृतये तत्+आहुः+दन्तस्थिरत्वे त्विदम्+एव मुख्यम्॥95॥
खदिरेण+एताः गुटिकाः+तैलम्+इदं च+अरिमेदसा प्रथितम्।
अनुशीलयन् प्रतिदिनं स्वस्थः+अपि दृढद्विजः+ भवति॥96॥
क्षुद्रागुडूचीसुमनःप्रवालदार्वीयवासत्रिफलाकषायः।
क्षौद्रेण युक्तः कवलग्रहः+अयं सर्वामयान् वक्त्रगतात्+निहन्ति॥97॥
पाठादार्वीत्वक्कुष्ठमुस्तासमङ्गातिक्तापीताङ्गीरोध्रतेजोवतीनाम्।
चूर्णः सक्षौद्रः+ दन्तमांसार्तिकण्डूपाकस्रावाणां नाशनः+ घर्षणेन॥98॥
गृहधूमतार्क्ष्यपाठाव्योषक्षाराग्न्ययोवरातेजोह्वैः।
मुखदन्तगलविकारे सक्षौद्रः कालकः+ विधार्यः+चूर्णः॥99॥
दार्वीत्वक्सिन्धूद्भवमनःशिलायावशूकहरितालैः।
धार्यः पीतकचूर्णः+ दन्तास्यगलामये समध्वाज्यः॥100॥
द्विक्षारधूमकवरापञ्चपटुव्योषवेल्लगिरिताक्ष्यैः।
गोमूत्रेण विपक्वा गलामयघ्नी रसक्रिया एषा॥101॥
गोमूत्रक्वथनविलीनविग्रहाणां पथ्यानां जलमिशिकुष्ठभावितानाम्।
अत्तारं नरमणवः+अपि वक्त्ररोगाः श्रोतारं नृपम्+इव न स्पृशन्ति+अनर्थाः॥102॥
सप्तच्छदोशीरपटोलमुस्तहरीतकीतिक्तकरोहिणीभिः।
यष्ट्याह्वराजद्रुमचन्दनैः+च क्वाथं पिबेत्+पाकहरं मुखस्य॥103॥
पटोलशुण्ठीत्रिफलाविशालात्रायन्तितिक्ताद्विनिशामृतानाम्।
पीतः कषायः+ मधुना निहन्ति खे स्थितः+च+आस्यगदान्+अशेषान्॥104॥
स्वरसः क्वथितः+ दार्व्या घनीभूतः सगैरिकः।
आस्यस्थः समधुर्वक्त्रपाकनाडीव्रणापहः॥105॥
पटोलनिम्बयष्ट्याह्ववासाजात्यरिमेदसाम्।
खदिरस्य वरायाः+च पृथक्+एवं प्रकल्पना॥106॥
खदिरायोवरापार्थम्+अदयन्ति+अहिमारकैः।
गण्डूषः+अम्बुश‍ृतैः+धार्यः+ दुर्बलद्विजशान्तये॥107॥
मुखदन्तमूलगलजाः प्रायः+ रोगाः कफास्रभूयिष्ठाः।
तस्मात्+तेषाम्+असकृत्+ रुधिरं विस्रावयेत्+दुष्टम्॥108॥
कायशिरसोः+विरेकः+ वमनं कवलग्रहाः+च कटुतिक्ताः।
प्रायः शस्तं तेषां कफरक्तहरं तथा कर्म॥109॥

यवतृणधान्यं भक्तं विदलैः क्षारोषितैः+अपस्नेहाः।
यूषा भक्ष्याः+च हिता यत्+च+अन्यत्+श्लेष्मनाशाय॥110॥
प्राणानिलपथसंस्थाः श्वसितम्+अपि निरुन्धते प्रमादवतः।
कण्ठामयाः+चिकित्सितम्+अतः+ द्रुतं तेषु कुर्वीत॥111॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने मुखरोगप्रतिषेधः+ नाम द्वाविंशः+अध्यायः॥22॥
त्रयोविंशः+अध्यायः।
अथ+अतः+ शिरोरोगविज्ञानीयं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
धूमातपतुषाराम्बुक्रीडातिस्वप्नजागरैः।
उत्स्वेदाधिपुरोवातबाष्पनिग्रहरोदनैः॥1॥
अत्यम्बुमद्यपानेन कृमिभिः+वेगधारणैः।
उपधानमृजाभ्यङ्गद्वेषाधः प्रततेक्षणैः॥2॥
असात्म्यगन्धदुष्टाम्+अभाष्याद्यैः+च शिरोगताः।
जनयन्ति+आमयान् दोषाः तत्र मारुतकोपतः॥3॥
निस्तुद्येते भृशं शङ्खौ घाटा सम्भिद्यते तथा।
भ्रुवोः+मध्यं ललाटं च पतती+इव+अतिवेदनम्॥4॥
बाध्येते स्वनतः श्रोत्रे निष्कृष्येत इव+अक्षिणी।
घूर्णति+इव शिरः सर्वं सन्धिभ्यः+ इव मुच्यते॥5॥
स्फुरति+अति सिराजालं कन्धराहनुसङ्ग्रहः।
प्रकाशासहता घ्राणस्रावः+अकस्मात्+व्यथाशमौ॥6॥
मार्दवं मर्दनस्नेहस्वेदबन्धैः+च जायते।
शिरः+तापः+अयम् अर्धे तु मूर्ध्नः सः+अर्धावभेदकः॥7॥
पक्षात्+कुप्यति मासात्+वा स्वयम्+एव च शाम्यति।
अतिवृद्धः+तु नयनं श्रवणं वा विनाशयेत्॥8॥
शिरोभितापे पित्तोत्थे शिरोधूमायनं ज्वरः।
स्वेदः+अक्षिदहनं मूर्च्छा निशि शीतैः+च मार्दवम्॥9॥
अरुचिः कफजे मूर्ध्नः+ गुरुः+तिमितशीतता।
शिरानिस्पन्दता+आलस्यं रुङ्मन्दा+अह्नि+अधिका निशि॥10॥
तन्द्रा शूनाक्षिकूटत्वं कर्णकण्डूयनं वमिः।
रक्तात् पित्ताधिकरुजः सर्वैः स्यात्+सर्वलक्षणः॥11॥
सङ्कीर्णैः+भोजनैः+मूर्घ्नि क्लेदिते रुधिः+आमिषे।

कोपिते सन्निपाते च जायन्ते मूर्ध्नि जन्तवः॥12॥
शिरसः+ते पिबन्तः+अस्रं घोराः कुर्वन्ति वेदनाः।
चित्तविभ्रंशजननीः+ज्वरः कासः+ बलक्षयः॥13॥
रौक्ष्यशोफव्यधच्छेददाहस्फुरणपूतिताः।
कपाले तालुशिरसोः कण्डू शोषः प्रमीलकः॥14॥
ताम्राच्छसिङ्घाणकता कर्णनादः+च जन्तुजे।
वातोल्बणाः शिरःकम्पं तत्+संज्ञं कुर्वते मलाः॥15॥
पित्तप्रधानैः+वाताद्यैः शङ्खे शोफः सशोणितैः।
तीव्रदाहरुजारागप्रलापज्वरतृड्भ्रमाः॥16॥
तिक्तास्यः पीतवदनः क्षिप्रकारी सः+ शङ्खकः।
त्रिरात्रात्+जीवितं हन्ति सिध्यति+अपि+आशु साधितः॥17॥
पित्तानुबद्धः शङ्खाक्षिभ्रूललाटेषु मारुतः।
रुजं सस्पन्दनां कुर्यात्+अनुसूर्योदयोदयाम्॥18॥
आमध्याह्नं विवर्धिष्णुः क्षुद्वतः सा विशेषतः।
अव्यवस्थितशीतोष्णसुखा शाम्यति+अतः परम्॥19॥
सूर्यावर्तः सः+ इति+उक्ता दश रोगाः शिरोगताः।
शिरसि+एव च वक्ष्यन्ते कपाले व्याधयः+ नव॥20॥
कपाले पवने दुष्टे गर्भस्थस्य+अपि जायते।
सवर्णः+ नीरुजः शोफः+तं विद्यात्+उपशीर्षकम्॥21॥
यथादोषोदयं ब्रूयात् पिटिकार्बुदविद्रधीन्।
कपाले क्लेदबहुलाः पित्तासृक्श्लेष्मजन्तुभिः॥22॥
कङ्गुसिद्धार्थकनिभाः पिटिकाः स्युः+अरुंषिकाः।
कण्डूकेशच्युतिस्वापरौक्ष्यकृत् स्फुटनं त्वचः॥23॥
सुसूक्ष्मं कफवाताभ्यां विद्यात्+दारुणकं तु तत्।
रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्॥24॥
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः।
रोमकूपान् रुणद्ध्यस्य तेन+अन्येषाम्+असम्भवः॥25॥
तदिन्द्रलुप्तं रुज्यां च प्राहुः+चाचा+इति च+अपरे।
खलतेः+अपि जन्म+एवं शातनं तत्र तु क्रमात्॥26॥
सा वातात्+अग्निदग्धाभा, पित्तात्+स्विन्नसिरावृता।
कफात्+हनत्वग्वर्णाः+च यथास्वं निर्दिशेत् त्वचि॥27॥
दोषैः सर्वाकृति सर्वैः+असाध्या सा नखप्रभा।

दग्धाग्निन्+एव निर्लोमा सदाहा या च जायते॥28॥
शोकश्रमक्रोधकृतः शरीरोष्मा शिरोगतः।
केशान् सदोषः पचति पलितं सम्भवति+अतः॥29॥
तत्+वातात्+स्फुटितं श्यावं खरं रूक्षं जलप्रभम्।
पित्तात्+सदाहं पीताभं, कफात् स्निग्धं विवृद्धिमत्॥30॥
स्थूलं सुशुक्लं, सर्वैः+तु विद्यात्+व्यामिश्रलक्षणम्।
शिरोरुजोद्भवं च+अन्यत्+विवर्णं स्पर्शनासहम्॥31॥
असाध्या सन्निपातेन खलतिः पलितानि च।
शरीरपरिणामोत्थानि+अपेक्षन्ते रसायनम्॥32॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने शिरोरोगविज्ञानीयः+ नाम त्रयोविंशः+अध्यायः॥23॥
चतुर्विंशः+अध्यायः।
अथ+अतः+ शिरोरोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
शिरोभितापे+अनिलजे वातव्याधिविधिं चरेत्।
घृतम्+अक्तशिरा रात्रौ पिबेत्+उष्णपयोनुपः॥1॥
माषान् कुलत्थान् मुद्गान् वा तद्वत्+खादेत्+घृतान्वितान्।
तैलं तिलानां कल्कं वा क्षीरेण सह पाययेत्॥2॥
पिण्डोपनाहस्वेदाः+च मांसधान्यकृता हिताः।
वातघ्नदशमूलादिसिद्धक्षीरेण सेचनम्॥3॥
स्निग्धं नस्यं तथा धूमः शिरःश्रवणतर्पणम्।
वरणादौ गणे क्षुण्णे क्षीरम्+अर्धोदकं पचेत्॥4॥
क्षीरावशिष्टं तत्+शीतं मथित्वा सारम्+आहरेत्।
ततः+ मधुरकैः सिद्धं नस्यं तत् पूजितं हविः॥5॥
वर्गे+अत्र पक्वं क्षीरे च पेयं सर्पिः सशर्करम्।
कार्पासमज्जा त्वङ्मुस्ता सुमनःकोरकाणि च॥6॥
नस्यम्+उष्णाम्बुपिष्टानि सर्वम्+ऊर्धरुजापहम्।
शर्कराकुङ्कुमशृतं घृतं पित्तासृगन्वये॥7॥
प्रलेपः सघृतैः कुष्ठकुटिलोत्पलचन्दनैः।
वातोद्रेकभयात्+रक्तं न च+अस्मिन्+अवसेचयेत्॥8॥
इति+अशान्तौ चले दाहः कफे चेष्टः+ यथा+उदितः।
अर्धावभेदके+अपि+एषां तथा दोषान्वयात्+क्रिया॥9॥

शिरीषबीजापामार्गमूलं नस्यं बिडान्वितम्।
स्थिरारसः+ वा, लेपे तु प्रपुन्नाटः+अम्लकल्कितः॥10॥
सूर्यावर्ते+अपि तस्मिन्+तु सिरया+अपहरेत्+असृक्।
शिरोभितापे पित्तोत्थे स्निग्धस्य व्यधयेत्+सिराम्॥11॥
शीताः शिरोमुखालेपसेकशोधनबस्तयः।
जीवनीयशृते क्षीरसर्पिषी पाननस्ययोः॥12॥
कर्तव्यं रक्तजे+अपि+एतत् प्रत्याख्याय च शङ्खके।
श्लेष्माभितापे जीर्णाज्यस्नेहितः कटुकैः+वमेत्॥13॥
स्वेदप्रलेपनस्य+आद्या रूक्षतीक्ष्णोष्णभेषजैः।
शस्यन्ते च+उपवासः+अत्र निचये मिश्रम्+आचरेत्॥14॥
कृमिजे शोणतिं नस्यं तेन मूर्च्छन्ति जन्तवः।
मत्ताः शोणितगन्धेन निर्यान्ति घ्राणवक्त्रयोः॥15॥
सुतीक्ष्णनस्यधूमाभ्यां कुर्यात्+निर्हरणं ततः।
विडङ्गस्वर्जिकादन्तीहिङ्गुगोमूत्रसाधितम्॥16॥
कटुनिम्बेङ्गुदीपीलुतैलं नस्यं पृथक् पृथक्।
अजामूत्रद्रुतं नस्यं कृमिजित् कृमिजित्+परम्॥17॥
पूतिमत्स्ययुतैः कुर्यात्+ धूमं नावनभेषजैः।
कृमिभिः पीतरक्तत्वात्+रक्तम्+अत्र न निर्हरेत्॥18॥
वाताभितापविहितः कम्पे दाहात्+विना क्रमः।
नवे जन्मोत्तरं जाते योजयेत्+उपशीर्षके॥19॥
वातव्याधिक्रियां, पक्वे कर्म विद्रधिचोदितम्।
आमपक्वे यथायोग्यं विद्रधीपिटिकार्बुदे॥20॥
अरुंषिका जलौकोभिः+हृतास्रा निम्बवारिणा।
सिक्ता प्रभूतलवणैः+लिम्पेत्+अश्वशकृद्रसैः॥21॥
पटोलनिम्बपत्रैः+वा सहरिद्रैः सुकल्कितैः।
गोमूत्रजीर्णपिण्याककृकवाकुमलैः+अपि॥22॥
कपालभृष्टं कुष्ठं वा चूर्णितं तैलसंयुतम्।
रुंषिकालेपनं कण्डूक्लेददाहार्तिनाशनम्॥23॥
मालतीचित्रकाश्वघ्ननक्तमालप्रसाधितम्।
चाचारुंषिकयोः+तैलम्+अभ्यङ्गः क्षुरघृष्टयोः॥24॥
अशान्तौ शिरसः शुद्ध्यै यतेत वमनादिभिः।
विध्येत्+शिरां दारुणके लालाट्यां, शीलयेत्+मृजाम्॥25॥

नावनं मूर्द्धबस्तिं च, लेपयेत्+च समाक्षिकैः।
प्रियालबीजमधुककुष्ठमाषैः ससर्षपैः॥26॥
लाक्षाशम्याकपत्रैडगजधात्रीफलैः+तथा।
कोरदूषतृणक्षारवारिप्रक्षालनं हितम्॥27॥
इन्द्रलुप्ते यथासन्नं सिरां विध्वा प्रलेपयेत्।
प्रच्छाय गाढं कासीसमनोह्वातुत्थकोषणैः॥28॥
वन्यामरतरुभ्यां वा गुञ्जामूलफलैः+तथा।
तथा लाङ्गलिकामूलैः करवीररसेन वा॥29॥
सक्षौद्रक्षुद्रवार्ताकस्वरसेन रसेन वा।
धत्तूरकस्य पत्राणां भल्लातकरसेन वा॥30॥
अथवा माक्षिकहविः+तिलपुष्पत्रिकण्टकैः।
तैलाक्ता हस्तिदन्तस्य मषी चाचौषधं परम्॥31॥
शुक्लरोमोद्गमे तद्वत्+मषी मेषविषाणजा।
वर्जयेत्+वारिणा सेकं यावत्+रोमसमुद्भवः॥32॥
खलतौ पलिते वल्यां हरित्+लोम्नि च शोधितम्।
नस्यवक्त्रशिरोभ्यङ्गप्रदेहैः समुपाचरेत्॥33॥
सिद्धं तैलं बृहत्याद्यैः+जीवनीयैः+च नावनम्।
मासं वा निम्बजं तैलं क्षीरभुक्+नावयेत्+यतिः ॥34॥
नीलीशिरीषकोरण्टभृङ्गस्वरसभावितम्।
शेल्वक्षतिलरामाणां बीजं काकाण्डकीसमम्॥35॥
पिष्ट्वा+आजपयसा लोहात्+लिप्तात्+अर्कांशुतापितात्।
तैलं स्रुतं क्षीरभुजः+ नावनात् पलितान्तकृत्॥36॥
क्षीरात्+साहचरात्+ भृङ्गरजसः सौरसाद्रसात्।
प्रस्थैः+तैलस्य कुडवः सिद्धः+ यष्टीपलान्वितः॥37॥
नस्यं शैलासने भाण्डे शृङ्गे मेषस्य वा स्थितः।
क्षीरेण श्लक्ष्णपिष्टौ वा दुग्धिकाकरवीरकौ॥38॥
उत्पाट्य पलितं देयौ+आशये पलितापहौ।
क्षीरं प्रियालं यष्ट्याह्वं जीवनीयः+ गणः+तिलाः॥39॥
कृष्णाः प्रलेपः+ वक्त्रस्य हरित्+लोमवलीहितः।
तिलाः सामलकाः पद्मकिञ्जल्कः+ मधुकं मधु॥40॥
बृंहयेत्+रञ्जयेत्+च+एतत् केशान् मूर्द्धप्रलेपनात्।
मांसी कुष्ठं तिलाः कृष्णाः सारिवा नीलम्+उत्पलम्॥41॥

क्षौद्रं च क्षीरपिष्टानि केशसंवर्धनं परम्।
अयोरजः+ भृङ्गरजः+त्रिफला कृष्णमृत्तिका॥42॥
स्थितम्+इक्षुरसे मासं समूलं पलितं रजेत्।
माषकोद्रवधान्याम्लैः+यवागूः+त्रिदिनोषिता॥43॥
लोहशुक्लोत्कटा पिष्टा बलाकाम्+अपि रञ्जयेत्।
प्रपौण्डरीकमधुकपिप्पलीचन्दनोत्पलैः॥44॥
सिद्धं धात्रीरसे तैलं नस्येन+अभ्यञ्जनेन च।
सर्वान् मूर्धगदान् हन्ति पलितानि च शीलितम्॥45॥
वरीजीवन्तिनिर्यासपयोभिः+यमकं पचेत्।
जीवनीयैः+च तत्+नस्यं सर्वजत्रूर्ध्वरोगजित्॥46॥
मयूरं पक्षपित्तान्त्रपादविट्तुण्डवर्जितम्।
दशमूलबलारास्नामधुकैः+त्रिपलैः+युतम्॥47॥
जले पक्त्वा घृतप्रस्थं तस्मिन् क्षीरसमं पचेत्।
कल्कितैः+मधुरद्रव्यैः सर्वजत्रूर्ध्वरोगजित्॥48॥
तत्+अभ्यासीकृतं पानबस्त्यभ्यञ्जननावनैः।
एतेन+एव कषायेण घृतप्रस्थं विपाचयेत्॥49॥
चतुर्गुणेन पयसा कल्कैः+एभिः+च कार्षिकैः।
जीवन्तीत्रिफलामेदामृद्वीकर्द्धिपरूषकैः॥50॥
समङ्गाचविकाभार्गीकाश्मरीकर्कटाह्वयैः।
आत्मगुप्तामहामेदातालखर्जूरमस्तकैः॥51॥
मृणालबिसखर्जूरयष्टीमधुकजीवकैः।
शतावरीविदारीक्षुबृहतीसारिवायुगैः॥52॥
मूर्वाश्वदंष्ट्रर्षभकशृङ्गाटककसेरुकैः।
रास्नास्थिरातामलकीसूक्ष्मैलाशठिपौष्करैः॥53॥
पुनर्नवातवक्षीरीकाकोलीधन्वयासकैः।
मधूकाक्षोटवाताममुञ्जाताभिषुकैः+अपि॥54॥
महामायूरम्+इति+एतत्+मायूरात्+अधिकं गुणैः।
धात्विन्द्रियस्वरभ्रंशश्वासकासार्दितापहम्॥55॥
योन्यसृक्शुक्रदोषेषु शस्तं वन्ध्यासुतप्रदम्।
आखुभिः कुक्कुटैः+हंसैः शशैः+च+इति प्रकल्पयेत्॥56॥
जत्रूर्ध्वजानां व्याधीनाम्+एकत्रिंशत्+शतद्वयम्।
परस्परम्+असङ्कीर्णं विस्तरेण प्रकाशितम्॥57॥

ऊर्ध्वमूलमधःशाखम्+ऋषयः पुरुषं विदुः।
मूलप्रहारिणः+तस्मात्+ रोगान् शीघ्रतरं जयेत्॥58॥
सर्वेन्द्रियाणि येन+अस्मिन् प्राणा येन च संश्रिताः।
तेन तस्य+उत्तमाङ्गस्य रक्षायाम्+आदृतः+ भवेत्॥59॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने शिरोरोगप्रतिषेधः+ नाम चतुर्विंशः+अध्यायः॥24॥
पञ्चविंशः+अध्यायः।
अथ+अतः+ व्रणप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
व्रणः+ द्विधा निजागन्तुदुष्टशुद्धविभेदतः।
निजः+ दोषैः शरीरोत्थैः+आगन्तुः+बाह्यहेतुजः॥1॥
दोषैः+अधिष्ठितः+ दुष्टः शुद्धः+तैः+अनधिष्ठितः।
संवृतत्वं विवृतता काठिन्यं मृदुता+अति वा॥2॥
अत्युत्सन्नावसन्नत्वम्+अत्यौष्ण्यम्+अतिशीतता।
रक्तत्वं पाण्डुता कार्ष्ण्यं पूतिपूयपरिस्रुतिः॥3॥
पूतिमांससिरास्नायुच्छन्नतोत्सङ्गिता+अतिरुक्।
संरम्भदाहश्वयथुकण्ड्वादिभिः+उपद्रुतः॥4॥
दीर्घकालानुबन्धः+च विद्यात्+दुष्टव्रणाकृतिम्।
स पञ्चदशधा दोषैः सरक्तैः तत्र मारुतात्॥5॥
श्यावः कृष्णः+अरुणः+ भस्मकपोतास्थिनिभः+अपि वा।
मस्तुमांसपुलाकाम्बुतुल्यतन्वल्पसंस्रुतिः॥6॥
निर्मांसस्तोदभेदाढ्यः+ रूक्षः+चटचटायते।
पित्तेन क्षिप्रजः पीतः+ नीलः कपिलपिङ्गलः॥7॥
मूत्रकिंशुकभस्माम्बुतैलाभोष्णबगुस्रुतिः।
क्षारोक्षितक्षतसमव्यथः+ रागोष्मपाकवान्॥8॥
कफेन पाण्डुः कण्डूमान् बहुश्वेतघनस्रुतिः।
स्थूलौष्ठः कठिनः स्नायुसिराजालततः+अल्परुक्॥9॥
प्रवालरक्तः+ रक्तेन सरक्तं पूयम्+उद्गिरेत्।
वाजिस्थानसमः+ गन्धे युक्तः+ लिङ्गैः+च पैत्तिकैः॥10॥
द्वाभ्यां त्रिभिः+च सर्वैः+च विद्यात्+लक्षणसङ्करात्।
जिह्वाप्रभः+ मृदुः श्लक्ष्णः श्यावौष्ठपिटिकः समः॥11॥
किञ्चित्+उन्नतमध्यः+ वा व्रणः शुद्धः+अनुपद्रवः।

त्वगामिषसिरास्नायुसन्ध्यस्थीनि व्रणाशयाः॥12॥
कोष्ठः+ मर्म च तानि+अष्टः+ दुःसाध्यानि+उत्तरोत्तरम्।
सुसाध्यः सत्त्वमांसाग्निवयोबलवति व्रणः॥13॥
वृत्तः+ दीर्घः+त्रिपुटकः+चतुरस्राकृतिः+च यः।
तथा स्फिक्पायुमेढ्रोष्ठपृष्ठान्तर्वक्त्रगण्डगः॥14॥
कृच्छ्रसाध्यः+अक्षिदशननासिकापाङ्गनाभिषु।
सेवनीजठरश्रोत्रपार्श्वकक्षास्तनेषु च॥15॥
फेनपूयानिलवहः शल्यवान्+ऊर्ध्वनिर्वमी।
भगन्दरः+अन्तर्वदनः+तथा कट्यस्थिसंश्रितः॥16॥
कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम्।
व्रणाः कृच्छ्रेण सिद्ध्यन्ति येषां च स्युः+व्रणे व्रणाः॥17॥
न+एव सिद्ध्यन्ति वीसर्पज्वरातीसारकासिनाम्।
पिपासूनामनिद्राणां श्वासिनामविपाकिनाम्॥18॥
भिन्ने शिरःकपाले वा मस्तुलुङ्गस्य दर्शने।
स्नायुक्लेदात्+सिराच्छेदात्+गाम्भीर्यात्+कृमिभक्षणात्॥19॥
अस्थिभेदात्+सशल्यत्वात्+सविषत्वात्+अतर्कितात्।
मिथ्याबन्धादतिस्नेहात्+रौक्ष्यात्+रोमादिघट्टनात्॥20॥
क्षोभात्+अशुद्धकोष्ठत्वात्+सौहित्यात्+अतिकर्शनात्।
मद्यपानात्+दिवास्वप्नात्+व्यवायात्+रात्रिजागरात्॥21॥
व्रणः+ मिथ्योपचारात्+च न+एव साध्यः+अपि सिध्यति।
कपोतवर्णप्रतिमा यस्य+अन्ताः क्लेदवर्जिताः॥22॥
स्थिराः+चिपिटिकावन्तः+ रोहति+इति तम्+आदिशेत्।
अथ+अत्र शोफावस्थायां यथा+आसन्नं विशोधनम्॥23॥
योज्यं शोफः+ हि शुद्धानां व्रणः+च+आशु प्रशाम्यति।
कुर्यात्+शीतोपचारं च शोफावस्थस्य सन्ततम्॥24॥
दोषाग्निः+अग्निवत्+तेन प्रयाति सहसा शमम्।
शोफे व्रणे च कठिने विवर्णे वेदनान्विते॥25॥
विषयुक्ते विशेषेण जलजाद्यैः+हरेत्+असृक्।
दुष्टास्रे+अपगते सद्यः शोफरागरुजां शमः॥26॥
हृते हृते च रुधिरे सुशीतैः स्पर्शवीर्ययोः।
सुश्लक्ष्णैः+तत्+अहः पिष्टैः क्षीरेक्षुस्वरसद्रवैः॥27॥
शतधौतघृतोपेतैः+मुहुः+अन्यैः+अशोषिभिः।

प्रतिलोमं हितः+ लेपः सेकाभ्यङ्गाः+च तत्+कृताः॥28॥
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेत सवल्कलैः।
प्रदेहः+ भूरिसर्पिर्भिः शोफनिर्वापणः परम्॥29॥
वातोल्बणानां स्तब्धानां कठिनानां महारुजाम्।
स्रुतासृजां च शोफानां व्रणानाम्+अपि च+ईदृशाम्॥30॥
आनूपवेसवाराद्यैः स्वेदः, सोमाः+तिलाः पुनः।
भृष्टा निर्वापिताः क्षीरे तत्+पिष्टा दाहरुग्घराः॥31॥
स्थिरान् मन्दरुजः शोफान् स्नेहैः+वातकफापहैः।
अभ्यज्य स्वेदयित्वा च वेणुनाड्या शनैः शनैः॥32॥
विम्लापनार्थं मृद्गीयात् तलेनाङ्गुष्ठकेन वा।
यवगोधूममुद्गैः+च सिद्धपिष्टैः प्रलेपयेत्॥33॥
विलीयते सः+ चेत्+न+एवं ततः+तम्+उपनाहयेत्।
अविदग्धः+तथा शान्तिं विदग्धः पाकम्+अश्नुते॥34॥
सकोलतिलवत्+लोमा दध्यम्ला सक्तुपिण्डिका।
सकिण्वकुष्ठलवणा कोष्णा शस्तोपनाहने॥35॥
सुपक्वे पिण्डिते शोफे पीडनैः+उपपीडिते।
दारणं दारणार्हस्य सुकुमारस्य च+इष्यते॥36॥
गुग्गुल्वतसिगोदन्तस्वर्णक्षीरीकपोतविट्।
क्षारौषधानि क्षाराः+च पक्वशोफविदारणम्॥37॥
पूयगर्भान्+अणुद्वारान् सोत्सङ्गान्+मर्मगान्+अपि।
निःस्नेहैः पीडनद्रव्यैः समन्तात्+प्रति पीडयेत्॥38॥
शुष्यन्तं समुपेक्षेत प्रलेपं पीडनं प्रति।
न मुखे च+एनम्+आलिम्पेत् तथा दोषः प्रसिच्यते॥39॥
कलाययवगोधूममाषमुद्गहरेणवः।
द्रव्याणां पिच्छिलानां च त्वङ्मूलानि प्रपीडनम्॥40॥
सप्तसु क्षालनाद्येषु सुरसारग्वधादिकौ।
भृशं दुष्टे व्रणे योज्यौ मेहकुष्ठव्रणेषु च॥41॥
अथवा क्षालनं क्वाथः पटोलीनिम्बपत्रजः।
अविशुद्धे, विशुद्धे तु न्यग्रोधादित्वगुद्भवः॥42॥
पटोलीतिलयष्ट्याह्वत्रिवृत्+दन्तीनिशाद्वयम्।
निम्बपत्राणि च+आलेपः सपटुर्व्रणशोधनः॥43॥
व्रणान् विशोधयेत्+वर्त्या सूक्ष्मास्यान् सन्धिमर्मगान्।

कृतया त्रिवृतादन्तीलाङ्गलीमधुसैन्धवैः॥44॥
वाताभिभूतान् सास्रावान् धूपयेत्+उग्रवेदनान्।
यवाज्यभूर्जमदनश्रीवेष्टकसुराह्वयैः॥45॥
निर्वापयेत्+ भृशं शीतैः पित्तरक्तविषोल्बणान्।
शुष्काल्पमांसे गम्भीरे व्रण उत्सादनं हितम्॥46॥
न्यग्रोधपद्मकादिभ्यामश्वगन्धाबलातिलैः।
अद्यात्+मांसादमांसानि विधिनोपहितानि च॥47॥
मांसं मांसात्+अमांसेन वर्धते शुद्धचेतसः।
उत्सन्नमृदुमांसानां व्रणानाम्+अवसादनम्॥48॥
जातीमुकुलकासीसमनोह्वालपुराग्निकैः।
उत्सन्नमांसान् कठिनान् कण्डूयुक्तान्+चिरोत्थितान्॥49॥
व्रणान् सुदुःखशोध्यान्+च शोधयेत् क्षारकर्मणा।
स्रवन्तः+अश्मरिजा मूत्रं ये च+अन्ये रक्तवाहिनः॥50॥
छिन्नाः+च सन्धयः+ येषां यथा+उक्तैः+ये च शोधनैः।
शोध्यमाना न शुद्ध्यन्ति शोध्याः स्युः+ते+अग्निकर्मणा॥51॥
शुद्धानां रोपणं योज्यम्+उत्सादाय यत्+ईरितम्।
अश्वगन्धा रुहा रोध्रं कट्फलं मधुयष्टिका॥52॥
समङ्गा धातकीपुष्पं परमं व्रणरोपणम्।
अपेतपूतिमांसानां मांसस्थानाम्+अरोहताम्॥53॥
कल्कं संरोहणं कुर्यात् तिलानां मधुकान्वितम्।
स्निग्धोष्णतिक्तमधुरकषायत्वैः सः+ सर्वजित्॥54॥
सः+ क्षौद्रनिम्बपत्राभ्यां युक्तः संशोधनं परम्।
पूर्वाभ्यां सर्पिषा च+असौ युक्तः स्यात्+आशु रोपणः॥55॥
तिलवद्यवकल्कं तु केचित्+इच्छन्ति तत्+विदः।
सास्रपित्तविषागन्तुगम्भीरान् सोष्मणः+ व्रणान्॥56॥
क्षीररोपणभैषज्यशृतेन+अज्येन रोपयेत्।
रोपणौषधसिद्धेन तैलेन कफवातजान्॥57॥
काच्छीरोध्राभयासर्जसिन्दूराञ्जनतुत्थकम्।
चूर्णितं तैलमदनैः+युक्तं रोपणम्+उत्तमम्॥58॥
समानां स्थिरमांसानां त्वक्स्थानं चूर्णं इष्यते।
ककुभोदुम्बराश्वत्थजम्बूकट्फलरोध्रजैः॥59॥
त्वचम्+आशु निगृह्णन्ति त्वक्चूर्णैः+चूर्णिता व्रणाः।

लाक्षामनोह्वामञ्जिष्ठाहरितालनिशाद्वयैः॥60॥
प्रलेपः सघृतक्षौद्रः+त्वग्विशुद्धिकरः परम्।
कालीयकलताम्रास्थिहेमकालारसोत्तमैः॥61॥
लेपः सगोमयरसः सवर्णकरणः परम्।
दग्धः+ वारणदन्तः+अन्तर्धूमं तैलं रसाञ्जनम्॥62॥
रोमसञ्जननः+ लेपः+तद्वत्+तैलपरिप्लुता।
चतुष्पान्नखरोमास्थित्वक्शृङ्गखुरजा मषी॥63॥
व्रणिनः शस्त्रकर्मोक्तं पथ्यापथ्यान्नम्+आदिशेत्।
द्वे पञ्चमूले वर्गः+च वातघ्नः+ वातिके हितः॥64॥
न्यग्रोधपद्मकाद्यौ तु तद्वत्+पित्तप्रदूषिते।
आरग्वधादिः श्लेष्मघ्नः कफे, मिश्राः+तु मिश्रजे॥65॥
एभिः प्रक्षालनं लेपः+ घृतं तैलं रसक्रिया।
चूर्णः+ वर्तिः+च संयोज्या व्रणे सप्त यथायथम्॥66॥
जातीनिम्बपटोलपत्रकटुकादार्वीनिशासारिवामञ्जिष्ठाभयसिक्थतुत्थमधुकैः+नक्ताह्वबीजान्वितैः।
सर्पिः साध्यम्+अनेन सूक्ष्मवदना मर्माश्रिताः क्लेदिनो गम्भीराः सरुजः+ व्रणाः सगतयः शुद्ध्यन्ति रोहन्ति च॥67॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने व्रणप्रतिषेधः+ नाम पञ्चविंशः+अध्यायः॥25॥
षड्विंशः+अध्यायः।
अथ+अतः+ सद्योव्रणप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सद्योव्रणा ये सहसा सम्भवन्ति+अभिघाततः।
अनन्तैः+अपि तैः+अङ्गम्+उच्यते जुष्टम्+अष्टधा॥1॥
घृष्टावकृत्तविच्छिन्नप्रविलम्बितपातितम्।
विद्धं भिन्नं विदलितं तत्र घृष्टं लसीकया॥2॥
रक्तलेशेन वा युक्तं सप्लोषं छेदनात् स्रवेत्।
अवगाढं ततः कृत्तं, विच्छिन्नं स्यात्+ततः+अपि च॥3॥
प्रविलम्बि सशेषे+अस्थ्नि, पतितं पातितं तनोः।
सूक्ष्मास्यशल्यविद्धं तु विद्धं कोष्ठविवर्जितम्॥4॥
भिन्नम्+अन्यत्+विदलितं मज्जरक्तपरिप्लुतम्।
प्रहारपीडनोत्पेषात् सहास्थ्ना पृथुतां गतम्॥5॥
सद्यः सद्योव्रणं सिञ्चेत्+अथ यष्ट्याह्वसर्पिषा।
तीव्रव्यथं कवोष्णेन बलतैलेन वा पुनः॥6॥

क्षतोष्मणः+ निग्रहार्थं तत्+कालं विसृतस्य च।
कषायशीतमधुरस्निग्धा लेपादयः+ हिताः॥7॥
सद्योव्रणेषु+आयतेषु सन्धानार्थं विशेषतः।
मधुसर्पिः+च युञ्जीत पित्तघ्नीः+च हिमाः क्रियाः॥8॥
ससंरम्भेषु कर्तव्यम्+ऊर्ध्वं च+अधः+च शोधनम्।
उपवासः+ हितं भुक्तं प्रततं रक्तमोक्षणम्॥9॥
घृष्टे विदलिते च+एषः+ सुतराम्+इष्यते विधिः।
तयोः+हि+अल्पं स्रवति+अस्रं पाकः+तेन+आशु जायते॥10॥
अत्यर्थम्+अस्रं स्रवति प्रायशः+अन्यत्र विक्षते।
ततः+ रक्तक्षयात्+वायौ कुपिते+अतिरुजाकरे॥11॥
स्नेहपानपरीषेकस्वेदलेपोपनाहनम्।
स्नेहबस्तिं च कुर्वीत वातघ्नौषधसाधितम्॥12॥
इति साप्ताहिकः प्रोक्तः सद्योव्रणहितः+ विधिः।
सप्ताहात्+गतवेगे तु पूर्वोक्तं विधिम्+आचरेत्॥13॥
प्रायः सामान्यकर्म+इदं वक्ष्यते तु पृथक्+पृथक्।
घृष्टे रुजं निगृह्य+आशु व्रणे चूर्णानि योजयेत्॥14॥
कल्कादीनि+अवकृत्ते तु विच्छिन्नप्रविलम्बिनोः।
सीवनं विधिनोक्तेन बन्धनं च+अनु पीडनम्॥15॥
असाध्यं स्फुटितं नेत्रम्+अदीर्णं लम्बते तु यत्।
सन्निवेश्य यथास्थानम्+अव्याविद्धसिरं भिषक्॥16॥
पीडयेत् पाणिना पद्मपलाशान्तरितेन तत्।
ततः+अस्य सेचने नस्ये तर्पणे च हितं हविः॥17॥
विपक्वम्+आजं यष्ट्याह्वजीवकर्षभकोत्पलैः।
सपयस्कैः परं तत्+हि सर्वनेत्राभिघातजित्॥18॥
गलपीडा+अवसन्ने+अक्ष्णि वमनोत्कासनक्षवाः।
प्राणायामः+अथवा कार्यः क्रिया च क्षतनेत्रवत्॥19॥
कर्णे स्थानात्+च्युते स्यूते श्रोतः+तैलेन पूरयेत्।
कृकाटिकायां छिन्नायां निर्गच्छति+अपि मारुते॥20॥
समं निवेश्यं बध्नीयात् स्यूत्वा शीघ्रं निरन्तरम्।
आजेन सर्पिषा च+अत्र परिषेकः प्रशस्यते॥21॥
उत्तानः+अन्नानि भुञ्जीत, शयीत च सुयन्त्रितः।
घातं शाखासु तिर्यक्स्थं गात्रे सम्यक्+निवेशिते॥22॥

स्थूत्वा वेल्लितबन्धेन बध्नीयात्+हनवाससा।
चर्मणा गोष्फणाबन्धः कार्यः+च+असङ्गते व्रणे॥23॥
पादौ विलम्बिमुष्कस्य प्रोक्ष्य नेत्रे च वारिणा।
प्रवेश्य वृषणौ सीव्येत् सेवन्या तुन्नसंज्ञया॥24॥
कार्यः+च गोष्फणाबन्धः कट्याम्+आवेस्य पट्टकम्।
स्नेहसेकं न कुर्वीत तत्र क्लिद्यति हि व्रणः॥25॥
कालानुसार्यगुर्वेलाजातीचन्दनपर्पटैः।
शिलादार्व्यमृतातुत्थैः सिद्धं तैलं च रोपणम्॥26॥
छिन्नां निःशेषतः शाखां दग्ध्वा तैलेन युक्तितः।
बध्नीयात् कोशबन्धेन ततः+ व्रणवत्+आचरेत्॥27॥
कार्या शल्याहृते विद्धे भङ्गात्+विदलिते क्रिया।
शिरसः+अपहृते शल्ये वालवर्तिं प्रवेशयेत्॥28॥
मस्तुलुङ्गस्रुतेः क्रुद्धः+ हन्यात्+एनं चलः+अन्यथा।
व्रणे रोहति च+एकैकं शनैः+अपयेत्+कचम्॥29॥
मस्तुलुङ्गस्रुतौ खादेत्+मस्तिष्कान्+अन्यजीवजान्।
शल्ये हृते+अङ्गात्+अन्यस्मात्+स्नेहवर्तिं निधापयेत्॥30॥
दूरावगाढाः सूक्ष्मास्या ये व्रणाः स्रुतशोणिताः।
सेचयेत्+चक्रतैलेन सूक्ष्मनेत्रार्पितेन तान्॥31॥
भिन्ने कोष्ठे+असृजा पूर्णे मूर्च्छाहृत्पार्श्ववेदनाः।
ज्वरः+ दाहस्तृडाध्मानं भक्तस्य+अनभिनन्दनम्॥32॥
सङ्गः+ विण्मूत्रमरुतां श्वासः स्वेदः+अक्षिरक्तता।
लोहगन्धित्वम्+आस्यस्य स्यात्+ गात्रे च विगन्धता॥33॥
आमाशयस्थे रुधिरे रुधिरं छर्दयति+अपि।
आध्मानेन+अतिमात्रेण शूलेन च विशस्यते॥34॥
पक्वाशयस्थे रुधिरे सशूलं गौरवं भवेत्।
नाभेः+अधस्तात्+शीतत्वं खेभ्यः+ रक्तस्य च+आगमः॥35॥
अभिन्नः+अपि+आशयः सूक्ष्मैः स्रोतोभिः+अभिपूर्यते।
असृजा स्यन्दमानेन पार्श्वे मूत्रेण बस्तिवत्॥36॥
तत्र+अन्तर्लोहितं शीतपादोच्छ्वासकराननम्।
रक्ताक्षं पाण्डुवदनम्+आनद्धं च विवर्जयेत्॥37॥
आमाशयस्थे वमनं हितं पक्वाशयाश्रिते।
विरेचनं निरूहं च निःस्नेहोष्णैः+विशोधनैः॥38॥

यवकोलकुलत्थानां रसैः स्नेहविवर्जितैः।
भुञ्जीत+अन्नं यवागूं वा पिबेत्+सैन्धवसंयुताम्॥39॥
अतिनिःस्रुतरक्तः+तु भिन्नकोष्ठः पिबेत्+असृक्।
क्लिष्टच्छिन्नान्त्रभेदेन कोष्ठभेदः+ द्विधा स्मृतः॥40॥
मूर्च्छादयः+अल्पाः प्रथमे द्वितीये तु+अति बाधकाः।
क्लिष्टान्त्रः संशयी देही छिन्नान्त्रः+ न+एव जीवति॥41॥
यथास्वं मार्गम्+आपन्ना यस्य विण्मूत्रमारुताः।
व्युपद्रवः सः+ भिन्ने+अपि कोष्ठे जीवति+असंशयम्॥42॥
अभिन्नमन्त्रं निष्क्रान्तं प्रवेश्यं न तु+अतः+अन्यथा।
उत्पङ्गिलशिरोग्रस्तं तत्+अपि+एके वदन्ति तु॥43॥
प्रक्षाल्य पयसा दिग्धं तृणशोणितपांसुभिः।
प्रवेशयेत्+क्लृप्तनखः+ घृतेन+आक्तं शनैः शनैः॥44॥
क्षीरेण+आर्द्रीकृतं शुष्कं भूरिसर्पिः परिप्लुतम्।
अङ्गुल्या प्रमृशेत्+कण्ठं जलेन+उद्वेजयेत्+अपि॥45॥
तथा+अन्त्राणि विशन्ति+अन्तः+तत्+कालं पीडयन्ति च।
व्रणसौक्ष्म्यात्+बहुत्वात्+वा कोष्ठमन्त्रम्+अनाविशत्॥46॥
तत्+प्रमाणेन जठरं पाटयित्वा प्रवेशयेत्।
यथास्थानं स्थिते सम्यक्+अन्त्रे सीव्येत्+अनु व्रणम्॥47॥
स्थानात्+अपेतम्+आदत्ते जीवितं कुपितं च तत्।
वेष्टयित्वा+अनु पट्टेन घृतेन परिषेचयेत्॥48॥
पाययेत ततः कोष्णं चित्रातैलयुतं पयः।
मृदुक्रियार्थं शकृतः+ वायोः+च+अधःप्रवृत्तये॥49॥
अनुवर्तेत वर्षं च यथा+उक्ता व्रणयन्त्रणाम्।
उदरात्+मेदसः+ वर्तिं निर्गतां भस्मना मृदा॥50॥
अवकीर्य कषायैः+वा श्लक्ष्णैः+मूलैः+ततः समम्।
दृढं बध्वा च सूत्रेण वर्द्धयेत्+कुशलः+ भिषक्॥51॥
तीक्ष्णेन+अग्निप्रतप्तेन शस्त्रेण सकृत्+एव तु।
स्यात्+अन्यथा रुगाटोपः+ मृत्युः+वा छिद्यमानया॥52॥
सक्षौद्रे च व्रणे बद्धे सुजीर्णे+अन्ने घृतं पिबेत्।
क्षीरं वा शर्कराचित्रालाक्षागोक्षुरकैः शृतम्॥53॥
रुग्दाहजित्सयष्ट्याह्वैः परं पूर्वोदितः+ विधिः।
मेदोग्रन्थ्युदितं तत्र तैलम्+अभ्यञ्जने हितम्।

तालीसं पद्मकं मांसीहरेण्वगुरुचन्दनम्।
हरिद्रे पद्मबीजानि सोशीरं मधुकं च तैः॥55॥
पक्वं सद्योव्रणेषूक्तं तैलं रोपणम्+उत्तमम्।
गूढप्रहाराभिहते पतिते विषमोच्चकैः॥56॥
कार्यं वातास्रजित् तृप्तिमर्दनाभ्यञ्जनादिकम्।
विश्लिष्टदेहं मथितं क्षीणं मर्माहतं हतम्॥57॥
वासयेत्+तैलपूर्णायां द्रोण्यां मांसरसाशिनम्॥57 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने सद्योव्रणप्रतिषेधः+ नाम षड्विंशः+अध्यायः॥26॥

सप्तविंशः+अध्यायः।

अथ+अतः+ भङ्गप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पातघातादिभिः+द्वेधा भङ्गः+अस्थ्नां सन्ध्यसन्धितः।
प्रसारणाकुञ्चनयोः+अशक्तिः सन्धिमुक्तता॥1॥
इतरस्मिन् भृशं शोफः सर्वावस्थासु+अतिव्यथा।
अशक्तिः+चेष्टिते+अल्पे+अपि पीड्यमाने सशब्दता॥2॥
समासात्+इति भङ्गस्य लक्षणं, बहुधा तु तत्।
भिद्यते भङ्गभेदेन तस्य सर्वस्य साधनम्॥3॥
यथा स्यात्+उपयोगाय तथा तत्+उपदेक्ष्यते।
प्राज्याणुदारि यत्+तु+अस्थि स्पर्शे शब्दं करोति यत्॥4॥
यत्र+अस्थिलेशः प्रविशेत्+मध्यमस्थ्नः+ विदारितः।
भग्नं यत्+च+अभिघातेन किञ्चित्+एव+अवशेषितम्॥5॥
उन्नम्यमानं क्षतवत्+यत्+च मज्जनि मज्जति।
तत्+दुःसाध्यं कृशाशक्तवातलाल्पाशिनाम्+अपि॥6॥
भिन्नं कपालं यत् कट्यां सन्धिमुक्तं च्युतं च यत्।
जघनं प्रति पिष्टं च भग्नं यत्+तत्+विवर्जयेत्॥7॥
असंश्लिष्टकपालं च ललाटं चूर्णितं तथा।
यत्+च भग्नं भवेत्+शङ्खशिरःपृष्ठस्तनान्तरे॥8॥
सम्यग्+यमितम्+अपि+अस्थि दुर्न्यासात्+दुर्निबन्धनात्।
सङ्क्षोभात्+अपि यत्+गच्छेत्+विक्रियां तत्+विवर्जयेत्॥9॥
आदितः+ यत्+च दुर्जातम्+अस्थिसन्धिः+अथ+अपि वा।
तरुणास्थीनि भुज्यन्ते, भज्यन्ते नलकानि तु॥10॥

कपालानि विभिद्यन्ते, स्फुटन्ति+अन्यानि भूयसा।
अथ+अवनतम्+उन्नम्यम्+उन्नतं च+अवपीडयेत्॥11॥
आञ्छेत्+अतिक्षिप्तम्+अधोगतं च+उपरि वर्तयेत्।
आञ्छनोत्पीडनोन्नामचर्मसङ्क्षेपबन्धनैः॥12॥
सन्धीन् शरीरगान् सर्वान् चलान्+अपि+अचलान्+अपि।
इति+एतैः स्थापनोपायैः सम्यक् संस्थाप्य निर्चलम्॥13॥
पट्टैः प्रभूतसर्पिर्भिः+वेष्टयित्वा सुखैः+ततः।
कदम्बोदुम्बराश्वत्थसर्जार्जुनपलाशजैः॥14॥
वंशोद्भवैः+वा पृथुभिः+तनुभिः सुनिवेशितैः।
सुश्लक्ष्णैः सप्रतिस्तम्भैः+वल्कलैः शकलैः+अपि॥15॥
कुशाह्वयैः समं बन्धं पट्टस्य+उपरि योजयेत्।
शिथिलेन हि बन्धेन सन्धिस्थैर्यं न जायते॥16॥
गाढेन+अति रुजादाहपाकश्वयथुसम्भवः।
त्र्यहात्र्यहादृतौ घर्मे सप्ताहात्+मोक्षयेत्+हिमे॥17॥
साधारणे तु पञ्चाहात्+ भङ्गदोषवशेन वा।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत्॥18॥
तं पञ्चमूलपक्वेन पयसा तु सवेदनम्।
सुखोष्णं वा+अवचार्यं स्यात्+चक्रतैलं विजानता॥19॥
विभज्य देशं कालं च वातघ्नौषधसंयुतम्।
प्रततं सेकलेपान्+च विदध्यात्+ भृशशीतलान्॥20॥
गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम्।
प्रातः प्रातः पिबेत्+भग्नः शीतलं लाक्षया युतम्॥21॥
सव्रणस्य तु भग्नस्य व्रणः+ मधुघृतोत्तरैः।
कषायैः प्रतिसार्यः+अथ शेषः+ भङ्गोदितः क्रमः॥22॥
लम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा।
सन्दधीत व्रणान् वैद्यः+ बन्धनैः+च+उपपादयेत्॥23॥
तान् समान् सुस्थितान्+ज्ञात्वा फलिनीरोध्रकट्फलैः।
समङ्गाधातकीयुक्तैः+चूर्णितैः+अवचूर्णयेत्॥24॥
धातकीरोध्रचूर्णैः+वा, रोहन्ति+आशु तथा व्रणाः।
इति भङ्ग उपक्रान्तः स्थिरधातोः+ऋतौ हिमे॥25॥
मांसलस्य+अल्पदोषस्य सुसाध्यः+, दारुणः+अन्यथा।
पूर्वमध्यान्तवयसाम्+एकद्वित्रिगुणैः क्रमात्॥26॥

मासैः स्थैर्यं भवेत्+सन्धैः+यथा+उक्तं भजतां विधिम्।
कटीजङ्घोरुभग्नानां कपाटशयनं हितम्॥27॥
यन्त्रणार्थं तथा कीलाः पञ्च कार्या निबन्धनाः।
जङ्घोर्वोः पार्श्वयोः+द्वौ द्वौ तलः+ एकः+च कीलकः॥28॥
श्रोण्यां वा पृष्ठवंशे वा वक्षसि+अक्षकयोः+तथा।
विमोक्षे भग्नसन्धीनां विधिमेलं समाचरेत्॥29॥
सन्धीन्+चिरविमुक्तान्+तु स्निग्धस्विन्नान् मृदूकृतान्।
उक्तैः+विधानैः+बुद्ध्या च यथास्वं स्थानम्+आनयेत्॥30॥
असन्धिभग्ने रूढे तु विषमोल्बणसाधिते।
आपोथ्य भङ्गं यमयेत्+ततः+ भग्नवत्+आचरेत्॥31॥
भग्नं न+एति यथा पाकं प्रयतेत तथा भिषक्।
पक्वमांससिरास्नायुः सन्धिः श्लेषः न गच्छति॥32॥
वातव्यधिविनिर्दिष्टान् स्नेहान् भग्नस्य योजयेत्।
चुतुष्प्रयोगान् बल्यान्+च बस्तिकर्म च शीलयेत्॥33॥
शाल्याज्यरसदुग्धाद्यैः पौष्टिकैः+अविदाहिभिः।
मात्रया+उपचरेत्+भग्न सन्धिसंश्लेषकारिभिः॥34॥
ग्लानिः+न शस्यते तस्य, सन्धिविश्लेषकृत्+हि सा।
लवणं कटुकं क्षारम्+अम्लं मैथुनम्+आतपम्।
व्यायामं च न सेवेत भग्नो रुक्षं च भोजनम्॥35॥
कृष्णान्+तिलान् विरजसः+ दृढवस्त्रबद्धान् सप्त क्षपा वहति वारिणि वासयेत।
संशोषयेत्+अनुदिनं प्रविसार्य च+एतान् क्षीरे तथा+एव मधुकक्वथिते च तोये॥36॥
पुनः+अपि पीतपयस्कान्+तान् पूर्ववत्+एव शोषितान् बाढम्।
विगततुषान्+अरजस्कान् सञ्चूर्ण्य सुचूर्णितैः+युञ्ज्यात्॥37॥
नलदवालकलोहितयष्टिकानखमिशिप्लवकुष्ठबलात्रयैः।
अगुरुकुङ्कुमचन्दनसारिवासरलसर्जरसामरदारुभिः॥38॥
पद्मकादिगणोपेतैः+तिलपिष्टं ततः+च तत्।
समस्तगन्धभैषज्यसिद्धदुग्धेन पीडयेत्॥39॥
शैलेयरास्नांशुमतीकसेरुकालानुसारीनतपत्ररोध्रैः।
सक्षीरशुक्लैः सपयः सदूर्वैः+तैलं पचेत्+तत्+नलदादिभिः+च॥40॥
गन्धतैलम्+इदम्+उत्तमम्+अस्थिस्थैर्यकृत्+जयति च+आशु विकारान्।
वातपित्तजनितानतिवीर्यान् व्यापिनः+अपि विविधैः+उपयोगैः॥41॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने भङ्गप्रतिषेधः+ नाम सप्तविंशः+अध्यायः॥27॥

अष्टाविंशः+अध्यायः।

अथ+अतः+ भगन्दरप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

हस्त्यश्वपृष्ठगमनकठिनोत्कटकासनैः।

अर्शोनिदानाभिहितैः+अपरैः+च निषेवितैः॥1॥

अनिष्टादृष्टपाकेन सद्यः+ वा साधुगर्हणैः।

प्रायेण पिटिकापूर्वः+ यः+अङ्गुले द्व्यङ्गुले+अपि वा॥2॥

पायोः+व्रणः+अन्तर्बाह्यः+ वा दुष्टासृङ्गांसगः+ भवेत्।

बस्तिमूत्राशयाभ्यासगतत्वात्+स्यन्दनात्मकः॥3॥

भगन्दरः सः+ सर्वान्+च दारयति+अक्रियावतः।

भगबस्तिगुदान्+तेषु दीर्यमाणेषु भूरिभिः॥4॥

वातमूत्रशकृत्+शुक्रं खैः सूक्ष्मैः+वमति क्रमात्।

दोषैः पृथक्+युतैः सर्वैः+आगन्तुः सः+अष्टमः स्मृतः॥5॥

अपक्वं पिटिकाम्+आहुः पाकप्राप्तं भगन्दरम्।

गूढमूलां ससंरम्भां रुगाढ्यां रुढकोपिनीम्॥6॥

भगन्दरकरीं विद्यात् पिटिकां न तु+अतः+अन्यथा।

तत्र श्यावा+अरुणा तोदभेदस्फुरणरुक्करी॥7॥

पिटिका मारुतात् पित्तात्+उष्ट्रग्रीवावत्+उच्छ्रिता।

रागिणी तनुः+ऊष्माढ्या ज्वरधूमायनान्विता॥8॥

स्थिरा स्निग्धा महामूला पाण्डुः कण्डुमती कफात्।

श्यावा ताम्रा सदाहोषा घोररुग् वातपित्तजा॥9॥

पाण्डुरा किञ्चित्+आश्यावा कृच्छ्रपाका कफानिलात्।

पादाङ्गुष्ठसमा सर्वैः+दोषैः+नानाविधव्यथा॥10॥

शूलारोचकतृड्दाहज्वरच्छर्दिरुपद्रुता।

व्रणतां यांति ताः पक्वाः प्रमादात् तत्र वातजा॥11॥

चीयते+अणुमुखैः+छिद्रैः शतपोनकवत् क्रमात्।

अच्छं स्रवद्भिः+आस्रावमे+अजस्रं फेनसंयुतम्॥12॥

शतपोनकसंज्ञः+अयम् उष्ट्रग्रीवः+तु पित्तजः।

बहुपिच्छापरिस्रावी परिस्रावी कफोद्भवः॥13॥

वातपित्तात्+परिक्षेपी परिक्षिप्य गुदं गति।

जायते परितः+तत्र प्राकारं परिखा+इव च॥24॥
ऋजुः+वातकफात्+ऋज्व्या गुदः+ गत्या+अत्र दीर्यते।
कफपित्ते तु पूर्वोत्थं दुर्नामाश्रित्य कुप्यतः॥15॥
अर्शोमूले ततः शोफः कण्डूदाहादिमान् भवेत्।
सः+ शीघ्रं पक्वभिन्नः+अस्य क्लेदयत्+मूलम्+अर्शसः॥16॥
स्रवति+अजस्रं गतिभिः+अयम्+अर्शोभगन्दरः।
सर्वजः शम्बुकावर्तः शम्बुकावर्तसन्निभः॥17॥
गतयः+ दारयन्ति+अस्मिन् रुग्वेगैः+दारुणैः+गुदम्।
अस्थिलेशः+अभ्यवहृतः+ मांसगृद्ध्या यदा गुदम्॥18॥
क्षिणोति तिर्यङ्निर्गच्छन्+उन्मार्गं क्षततः+ गतिः।
स्यात्+ततः पूयदीर्णायां मांसकोथेन तत्र च॥19॥
जायन्ते कृमयः+तस्य खादन्तः परितः+ गुदम्।
विदारयन्ति न+चिराद+उन्मार्गी क्षतजः+च सः॥20॥
तेषु रुग्दाहकण्ड्वादीन् विद्यात्+व्रणनिषेधतः।
षट् कृच्छ्रसाधनाः+तेषां, निचयक्षतजौ त्यजेत्॥21॥
प्रवाहिणीं वलीं प्राप्तं सेवनीं वा समाश्रितम्।
अथ+अस्य पिटिकाम्+एव तथा यत्नात्+उपाचरेत्॥22॥
शुद्ध्यसृक्स्रुतिसेकाद्यैः+यथा पाकं न गच्छति।
पाके पुनः+उपस्निग्धं स्वेदितं च+अवगाहतः॥23॥
यन्त्रयित्वा+अर्शसम्+इव पश्येत्+सम्यक्+भगन्दरम्।
अर्वाचीनं पराचीनम्+अन्तर्मुखबहिर्मुखम्॥24॥
अथ+अन्तर्मुखम्+एषित्वा सम्यक् शस्त्रेण पाटयेत्।
बहिः+मुखं च निःशेषं ततः क्षारेण साधयेत्॥25॥
अग्निना वा भिषक् साधु क्षारेण+एव+उष्ट्रकन्धरम्।
नाडीः+एकान्तराः कृत्वा पाठयेत्+शतपोनकम्॥26॥
तासु रूढासु शेषाः+च, मृत्युः+दीर्णे गुदे+अन्यथा।
परिक्षेपिणि च+अपि+एवं नाड्युक्तैः क्षारसूत्रकैः॥27॥
अर्शोभगन्दरे पूर्वम्+अर्शांसि प्रतिसाधयेत्।
त्यक्त्वोपचर्यः क्षतजः शल्यं शल्यवतः+ततः॥28॥
आहरेत्+च तथा दद्यात् कृमिघ्नं लेपभोजनम्।
पिण्डनाड्यादयः स्वेदाः सुस्निग्धा रुजि पूजिताः॥29॥
सर्वत्र च बहुच्छिद्रे छेदान+आलोच्य योजयेत्।

गोतीर्थसर्वतोभद्रदलाङ्गललाङ्गलान्॥30॥

पार्श्वं गतेन शस्त्रेण छेदः+ गोतीर्थकः+ मतः।

सर्वतः सर्वतोभद्रः, पार्श्वच्छेदः+अर्धलाङ्गलः॥31॥

पार्श्वद्वये लाङ्गलकः समस्तान्+च+अग्निना दहेत्।

आस्रावमार्गान्+निःशेषं न+एवं विकुरुते पुनः॥32॥

यतेत कोष्ठशुद्धौ च भिषक् तस्य+अन्तरा+अन्तरा।

लेपः+ व्रणे बिडालास्थि त्रिफलारसकल्कितम्॥33॥

ज्योतिष्मतीमलयुलाङ्गलिशेलुपाठाकुम्भाग्निसर्ज(र्जि)करवीरवचासुधार्कैः।

अभ्यञ्जनाय विपचेत भगन्दराणां तैलं वदन्ति परमं हितम्+एतत्+एषाम्॥34॥

मधुकरोध्रकणात्+रुटिरेणुकात्+विरजनीफलिनीपटुसारिवाः।

कमलकेसरपद्मकधातकीमदनसर्जरसामयरोदिकाः॥35॥

सबीजपूरच्छदनैः+एभिः+तैलं विपाचितम्।

भगन्दरापचीकुष्टमधुमेहव्रणापहम्॥36॥

मधुतैलयुता विडङ्गसारत्रिफलामागधिकाकणाः+च लीढाः।

कृमिकुष्ठभगन्दरप्रमेहक्षतनाडीव्रणरोपणा भवन्ति॥37॥

अमृतात्+रुटिवेल्लवत्सकं कलिपथ्यामलकानि गुग्गुलुः।

क्रमवृद्धम्+इदं मधुद्रुतं पिटिकास्थौल्यभगन्दरान् जयेत्॥38॥

मागधिकाग्निकलिङ्गविडङ्गैः+बिल्वधृतैः सवरापलषट्कैः।

गुग्गुलुना सदृशेन समेतैः क्षौद्रयुतैः सकलामयनाशः॥39॥

गुग्गुलुपञ्चपलं पलिकांशा मागधिका त्रिफला च पृथक्+स्यात्।

त्वक्त्रुटिकर्षयुतं मधुलीढं कुष्ठभगन्दरगुल्मगतिघ्नम्॥40॥

शृङ्गबेररजोयुक्तं तत्+एव च सुभावितम्।

क्वाथेन दशमूलस्य विशेषात्+वातरोगजित्॥41॥

उत्तमाखदिरसारजं रजः शीलयन्+असनवारिभावितम्।

हन्ति तुल्यमहिषाक्षमाक्षिकं कुष्ठमेहपिटिकाभगन्दरान्॥42॥

भगन्दरेषु+एष विशेषः+ उक्तः शेषाणि तु व्यञ्जनसाधनानि।

व्रणाधिकारात् परिशीलनात्+च सम्यक्+विदित्वा+औपयिकं विदध्यात्॥43॥

अश्वपृष्ठगमनं चलरोधं मद्यमैथुनम्+अजीर्णम्+असात्म्यम्।

साहसानि विविधानि च रूढे वत्सरं परिहरेत्+अधिकं वा॥44॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने भगन्दरप्रतिषेधः+ नामाष्टाविंशः+अध्यायः॥28॥

एकोनत्रिंशः+अध्यायः।

अथ+अतः+ ग्रथ्यर्बुदश्लीपदापचीनाडीविज्ञानीयं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कफप्रधानाः कुर्वन्ति मेदोमांसास्रगा मलाः।
वृत्तोन्नतं यं श्वयथुं सः+ ग्रन्थिः+ग्रथनात्+स्मृतः॥1॥
दोषास्रमांसमेदोस्थिसिराव्रणभवा नव।
ते तत्र वातात्+आयामतोदभेदान्वितः+असितः॥2॥
स्थानात्+स्थानान्तरगतिः+अकस्मात्+हानिवृद्धिमान्।
मृदुः+बस्तिः+इव+आनद्धः+ विभिन्नः+अच्छं स्रवति+असृक्॥3॥
पित्तात्+सदाहः पीताभः+ रक्तः+ वा, पच्यते द्रुतम्।
भिन्नः+अस्रम्+उष्णं स्रवति श्लेष्मणा नीरुजः+ घनः॥4॥
शीतः सवर्णः कण्डूमान्, पक्वः पूयं स्रवेत्+घनम्।
दोषैः+दुष्टे+असृजि ग्रन्थिः+भवेत्+मूर्च्छत्सु जन्तुषु॥5॥
सिरामांसं च संश्रित्य सस्वापः पित्तलक्षणः।
मांसलैः+दूषितं मांसम्+आहारैः+ग्रन्थिम्+आवहेत्॥6॥
स्निग्धं महान्तं कठिनं सिरानद्धं कफाकृतिम्।
प्रवृद्धं मेदुरैः+मेदः+ नीतं मांसे+अथवा त्वचि॥7॥
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम्।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम्॥8॥
स विभिन्नः+ घनं मेदः+ताम्रासितसितं स्रवेत्।
अस्थिभङ्गाभिघाताभ्याम्+उन्नतावनतं तु यत्॥9॥
सः+अस्थिग्रन्थिः पदातेः+तु सहसा+अम्भोवगाहनात्।
व्यायामात्+वा प्रतान्तस्य सिराजालं सशोणितम्॥10॥
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च।
निःष्फुरं नीरुजं ग्रन्थिं कुरुते सः+ सिराह्वयः॥11॥
अरूढे रूढमात्रे वा व्रणे सर्वरसाशिनः।
सार्द्रे वा बन्धरहिते गात्रे+अश्माभिहते+अथवा॥12॥
वातः+अस्रम्+अस्रुतं दुष्टं संशोष्य ग्रथितं व्रणम्।
कुर्यात्+सदाहः कण्डूमान् व्रणग्रन्थिः+अयं स्मृतः॥13॥
साध्या दोषास्रमेदोजाः न तु स्थूलखराः+चलाः।
मर्मकण्ठोदरस्थाः+च महत्+तु ग्रन्थितः+अर्बुदम्॥14॥
तत्+लक्षणं च मेदोन्तैः षोढा दोषादिभिः+तु तत्।
प्रायः+ मेदःकफाढ्यत्वात्+स्थिरत्वात्+च न पच्यते॥15॥

सिरास्थं शोणितं दोषः सङ्कोच्यान्ताः प्रपीड्य च।
पाचयेत तत्+आनद्धं सास्रावं मासपिण्डितम्॥16॥
मांसाङ्कुरैः+चितं याति वृद्धिं च+आशु स्रवेत्+ततः।
अजस्रं दुष्टरुधिरं भूरि तत्+शोणितार्बुदम्॥17॥
तेषु+असृङ्गांसजे वर्ज्ये, चत्वारि+अन्यानि साधयेत्।
प्रस्थिता वङ्क्षणोर्वादिम्+अधःकायं कफोल्बणाः॥18॥
दोषा मांसास्रगाः पादौ कालेन+आश्रित्य कुर्वते।
शनैःशनैः+घनं शोफं श्लीपदं तत्+प्रचक्षते॥19॥
परिपोटयुतं कृष्णम्+अनिमित्तरुजं खरम्।
रूक्षं च वातात् पित्तात्+तु पीतं दाहज्वरान्वितम्॥20॥
कफात्+गुरुः+ स्निग्धम्+अरुक् चितं मांसाङ्कुरैः+बृहत्।
तत्+त्यजेत्+वत्सरातीतं समुहत् सुपरिस्रुति॥21॥
पाणिनासौष्ठकर्णेषु वदन्ति+एके तु पादवत्।
श्लीपदं जायते तत्+च देशे+अनूपे भृशं भृशम्॥22॥
मेदस्थाः कण्ठम्+अन्याक्षकक्षावङ्क्षणगाः मलाः।
सवर्णान् कठिनान् स्निग्धान् वार्ताकामलकाकृतीन्॥23॥
अवगाढान् बहून् गण्डान्+चिरपाकान्+च कुर्वते।
पच्यन्ते+अल्परुजः+ते+अन्ये स्रवन्ति+अन्ये+अतिकण्डुराः॥24॥
नश्यन्ति+अन्ये भवन्ति+अन्ये दीर्घकालानुबन्धिनः।
गण्डमाला+अपची च+इदं दूर्वा+इव क्षयवृद्धिभाक्॥25॥
तां त्यजेत्+सज्वरच्छर्दिपार्श्वरुक्कासपीनसाम्।
अभेदात्+पक्वशोफस्य व्रणे च+अपथ्यसेविनः॥26॥
अनुप्रविश्यं मांसादीन् दूरं पूयः+अभिधावति।
गतिः सा दूरगमनात्+नाडी नाडी+इव संस्रुतेः॥27॥
नाडी+एका+अनृजुः+अन्येषां सः+एव+अनेकगतिः+गतिः।
सा दोषैः पृथक्+एकस्थैः शल्यहेतुः+च पञ्चमी॥28॥
वातात् सरुक्सूक्ष्ममुखी विवर्णा फेनिलोद्वमा।
स्रवति+अभ्यधिकं रात्रौ पित्तात्+तृड्ज्वरदाहकृत्॥29॥
पीतोष्णपूतिपूयस्रुद्दिवा च+अति निषिञ्चति।
घनपिच्छिलसंस्रावा कण्डूला कठिना कफात्॥30॥
निशि च+अभ्यधिकल्केदा सर्वैः सर्वाकृतिं त्यजेत्।
अन्तःस्थितं शल्यम्+अनाहृतं तु करोति नाडीं वहते च सा+अस्य।

फेनानुविद्धं तनुम्+अल्पम्+उष्णं सास्रं च पूयं सरुजं च नित्यम्॥31॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने ग्रन्थ्यर्बुदश्लीपदापचीनाडीविज्ञानीयं नाम+एकोनत्रिंशः+अध्यायः॥29॥

त्रिंशः+अध्यायः।

अथ+अतः+ ग्रन्थ्यर्बुदश्लीपदापचीनाडीप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

ग्रन्थिषु+आमेषु कर्तव्या यथास्वं शोफवत् क्रिया।

बृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा॥1॥

स्नेहयेत्+शुद्धिकामं च, तीक्ष्णैः, शुद्धस्य लेपनम्।

संस्वेद्य बहुशः+ ग्रन्थिं विमृद्नीयात् पुनः पुनः॥2॥

एषः+ वाते विशेषेण क्रमः, पित्तास्रजे पुनः।

जलौकसः+ हिमं सर्वं, कफजे वातिकः+ विधिः॥3॥

तथा+अपि+अपक्वं छित्त्वा+एनं स्थिते रक्ते+अग्निना दहेत्।

साधुः+अशेषं, सशेषः+ हि पुनः+आप्यायते ध्रुवम्॥4॥

मांसव्रणोद्भवौ ग्रन्थी यापयेत्+एवम्+एव च।

कार्यं मेदोभवे+अपि+एतत्+तप्तैः फालादिभिः+च तम्॥5॥

प्रमृद्यात्+तिलदिग्धेन छन्नं द्विगुणवाससा।

शस्त्रेण पाटयित्वा वा दहेत्+मेदसि सूद्धृते॥6॥

सिराग्रन्थौ नवे पेयं तैलं साहचरं, तथा।

उपनाहः+अनिलहरैः+बस्तिकर्म सिराव्यधः॥7॥

अर्बुदे ग्रन्थिवत् कुर्यात् यथास्वं सुतरां हितम्।

[अजाशकृच्छिग्रुमूललाक्षासुरस(लवणक्षार)काञ्जिकैः।

वस्त्रबद्धैः+उपस्वेद्य मर्दयित्वा प्रलेपयेत्॥1॥

उपोदकापत्रपिण्ड्या छदैः+आच्छादितं घनम्।

निवेश्य पट्टं बध्नीयात्+शाम्यति+एवं नवार्बुदम्॥2॥

जीर्णे च+अर्कच्छदसुधासामुद्रगुडकाञ्जिकैः।

प्रच्छाने पिण्डिका बद्धा ग्रन्थ्यर्बुदविलायनी॥3॥]

श्लीपदे+अनिलजे विध्येत् स्निग्धस्विन्नोपनाहिते॥8॥

सिराम्+उपरि गुल्फस्य द्व्यङ्गुले, पाययेत्+च तम्।

मासम्+एरण्डजं तैलं गोमूत्रेण समन्वितम्॥9॥

जीर्णे जीर्णान्नम्+अश्नीयात्+शुण्ठीशृतपयोन्वितम्।

त्रैवृतं वा पिबेत्+एवम्+अशान्तौ+अग्निना दहेत्॥10॥

गुल्फस्य+अधः सिरामोक्षः पैते सर्वं च पित्तजित्।
सिराम्+अङ्गुष्ठके विध्वा कफजे शीलयेत्+यवान्॥11॥
सक्षौद्राणि कषायाणि वर्द्धमानाः+तथा+अभयाः।
लिम्पेत्+सर्षपवार्ताकिमूलाभ्यां धन्वया+अथवा॥12॥
ऊर्ध्वाधःशोधनं पेयम्+अपच्यां साधितं घृतम्।
दन्तीद्रवन्तीत्रिवृताजालिनीदेवदालिभिः॥13॥
शीलयेत्+कफमेदोघ्नं धूमगण्डूषनावनम्।
सिरया+अपहरेत्+रक्तं, पिबेत्+मूत्रेण ताक्ष्र्यजम्॥14॥
[पलम्+अर्द्धपलं वा+अपि कर्षं वा+अपि+उष्णवारिणा।
काञ्चनारत्वचं पीत्वा गण्डमालां व्यपोहति॥1॥]
ग्रन्थीन्+अपक्वान्+आलिम्पेत्+नाकुलीपटुनागरैः।
स्विन्नान् लवणपोटल्या कठिनान्+अनु मर्दयेत्॥15॥
शमीमूलकशिग्रूणां बीजैः सयवसर्षपैः।
लेपः पिष्टः+अम्लतक्रेण ग्रन्थिगण्डविलायनः॥16॥
[क्षुण्णानि निम्बपत्राणि क्लृप्तैः+भल्लातकैः सह।
शरावसम्पुटे दग्ध्वा सार्धं सिद्धार्थकैः समैः॥1॥
एतत्+छागाम्बुना पिष्टं गण्डमालाप्रलेपनम्।]
पाकोन्मुखान् स्रुतास्रस्य पित्तश्लेष्महरैः+जयेत्।
अपक्वान्+एव वा+उद्धृत्य क्षाराग्निभ्याम्+उपाचरेत्॥17॥
काकादनीलाङ्गलिकानहिकोत्तुण्डिकीफलैः।
जीमूतबीजकर्कोटीविशालाकृतवेधनैः॥18॥
पाठान्वितैः पलार्धांशैः+विषकर्षयुतैः पचेत्।
प्रस्थं करञ्जतैलस्य निर्गुण्डीस्वरसाढके॥19॥
अनेन मला गण्डानां चिरजा पूयवाहिनी।
सिध्यति+असाध्यकल्पा+अपि पानाभ्यञ्जननावनैः॥20॥
तैलं लाङ्गलिकीकन्दकल्कपादं चतुर्गुणे।
निर्गुण्डीस्वरसे पक्वं नस्याद्यैः+अपचीप्रणुत्॥21॥
भद्रश्रीदारुमरिचद्विहरिद्रात्रिवृद्धनैः।
मनःशिलालनलदविशालाकरवीरकैः॥22॥
गोमूत्रपिष्टैः पलिकैः+विषस्य+अर्धपलेन च।
ब्राह्मीरसार्कजक्षीरगोशकृद्रससंयुतम्॥23॥
प्रस्थं सर्षपतैलस्य सिद्धम्+आशु व्यपोहति।

पानाद्यैः शीलितं कुष्ठदुष्टनाडीव्रणापचीः॥24॥
वचाहरीतकीलाक्षाकटुरोहिणिचन्दनैः।
तैलं प्रसाधितं पीतं समूलाम्+अपचीं जयेत्॥25॥
शरपुङ्खोद्भवं मूलं पिष्टं तन्दुलवारिणा।
नस्यात्+लेपात्+च दुष्टारुरपचीविषजन्तुजित्॥26॥
मूलैः+उत्तमकारण्याः पीलुपर्ण्याः सहाचरात्।
सरोध्राभययष्ट्याह्वशताह्वाद्वीपिदारुभिः॥27॥
तैलं क्षीरसमं सिद्धं नस्ये+अभ्यङ्गे च पूजितम्।
गोव्यजाश्वखुरा दग्धाः कटुतैलेन लेपनम्॥28॥
ऐङ्गुदेन तु कृष्णाहिः+वायसः+ वा स्वयं मृतः।
इति+अशान्तौ गदस्य+अन्यपार्श्वजङ्घासमाश्रितम्॥29॥
बस्तेः+ऊर्ध्वम्+अधस्तात्+वा मेदः+ हृत्वा+अग्निना दहेत्।
तत ऊर्ध्वं हरेत्+ ग्रन्थीन्+इति+आह भगवान्+निमिः॥30॥
पार्ष्णिं प्रति द्वादश च+अङ्गुलानि मुक्त्वा+इन्द्रबस्तिं च गदान्यपार्श्वे।
विदार्य मत्स्याण्डनिभानि मध्यात्+जालानि कर्षेत्+इति सुश्रुतोक्तिः॥31॥
आ गुल्फकर्णात्+सुमितस्य जन्तोः+तस्य+अष्टभागं खुडकात्+विभज्य।
घ्राणार्जवे+अधः सुरराजबस्तेः+भित्त्वा+अक्षमात्रं तु+अपरे वदन्ति॥32॥
उपनाह्यानिलात्+नाडीं पाटितां साधु लेपयेत्।
प्रत्यक्पुष्पीफलयुतैः+तिलैः पिष्टैः ससैन्धवैः॥33॥
पैत्तीं तु तिलमञ्जिष्ठानागदन्तीनिशाद्वयैः।
श्लैष्मिकीं तिलसौराष्ट्रीनिकुम्भारिष्टसैन्धवैः॥34॥
शल्यजां तिलम्+अध्वाज्यैः+लेपयेत्+छिन्नशोधिताम्।
अशस्त्रकृत्याम्+एषिण्या भित्त्वा+अन्ते सम्यक्+एषिताम्॥35॥
क्षारपीतेन सूत्रेण बहुशः+ दारयेत्+ गतिम्।
व्रणेषु दुष्टसूक्ष्मास्यगम्भीरादिषु साधनम्॥36॥
या वर्त्यः+ यानि तैलानि तत्+नाडीषु+अपि शस्यते।
पिष्टं चञ्चुफलं लेपात्+नाडीव्रणहरं परम्॥37॥
घोण्टाफलत्वक् लवणं सलाक्षं बूकस्य पत्रं वनितापयः+च।
स्नुगर्कदुग्धान्वितः+ एषः+ कल्कः+ वर्तीकृतः+ हन्ति+अचिरेण नाडीम्॥38॥
सामुद्रसौवर्चलसिन्धुजन्मसुपक्वघोण्टाफलवेश्मधूमाः।
आम्रातगायत्रिजपल्लवाः+च कटंकटेर्यौ+अथ चेतकीं च॥39॥
कल्के+अभ्यङ्गे चूर्णे वर्त्यां च+एतेषु शील्यमानेषु।

अगतिः+इव नश्यति गतिः+चपला चपलेषु भूतिः+इव॥40॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठ उत्तरस्थाने ग्रन्थ्यर्बुदश्लीपदापचीनाडीप्रतिषेधः+ नाम त्रिंशः+अध्यायः॥30॥

एकत्रिंशः+अध्यायः।

अथ+अतः क्षुद्ररोगविज्ञानीयं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा॥

पिटिका कफवाताभ्यां बालानाम्+अजगल्लिका॥1॥

यवप्रख्या यवप्रख्या ताभ्यां मांसाश्रिता घना।

अवक्त्रा चालजी वृत्ता स्तोकपूया घनोन्नता॥2॥

ग्रन्थयः पञ्च वा षड्वा कच्छपी कच्छपोन्नताः।

कर्णस्य+ऊर्ध्वं समन्तात्+वा पिटिका कठिनोग्ररुक्॥3॥

शालूकाभा पनसिका शोफः+तु+अल्परुजः स्थिरः।

हनुसन्धिसमुद्भूतः+ताभ्यां पाषाणगर्दभः॥4॥

शाल्मलीकण्टकाकाराः पिटिकाः सरुजः+ घनाः।

मेदोगर्भा मुखे यूनां ताभ्यां च मुखदूषिकाः॥5॥

ते पद्मकण्टका ज्ञेया यैः पद्मम्+इव कण्टकैः।

चीयते नीरुजैः श्वेतैः शरीरं कफवातजैः॥6॥

पित्तेन पिटिका वृत्ता पक्वोदुम्बरसन्निभा।

महादाहज्वरकरी विवृता विवृतानना॥7॥

गात्रेषु+अन्तः+च वक्त्रस्य दाहज्वररुजान्विताः।

मसूरमात्राः+तद्वर्णाः+तत्+संज्ञाः पिटिका घनाः॥8॥

ततः कष्टतराः स्फोटा विस्फोटाख्या महारुजाः।

या पद्मकर्णिकाकारा पिटिका पिटिकाचिता॥9॥

सा विद्धा वातपित्ताभ्यां ताभ्याम्+एव च गर्दभी।

मण्डला विपुलोत्सन्ना सरागपिटिकाचिता॥10॥

कक्षा+इति कक्षासन्नेषु प्रायः+ देशेषु सा+अनिलात्।

पित्तात्+भवन्ति पिटिकाः सूक्ष्मा लाजोपमा घनाः॥11॥

तादृशी महती तु+एका गन्धनाम+इति कीर्तिता।

घर्मस्वेदपरीते+अङ्गे पिटिकाः सरुजः+ घनाः॥12॥

राजिकावर्णसंस्थानप्रमाणा राजिकाह्वयाः।

दोषैः पित्तोल्बणैः+मन्दैः+विसर्पति विसर्पवत्॥13॥

शोफः+अपाकः+तनुः+ताम्रः+ ज्वरकृत्+जालगर्दभः।
मलैः पित्तोल्बणैः स्फोटा ज्वरिणः+ मांसदारणाः॥14॥
कक्षाभागेषु जायन्ते ये+अग्न्याभाः सा+अग्निरोहिणी।
पञ्चाहात्+सप्तरात्रात्+वा पक्षात्+वा हन्ति जीवितम्॥15॥
त्रिलिङ्गा पिटिका वृत्ता जत्रूर्ध्वम्+इरिवेल्लिका।
विदारीकन्दकठिना विदारी कक्षवङ्क्षणे॥16॥
मेदोनिलकफैः+ग्रन्थिः स्नायुमांससिराश्रयैः।
भिन्नः+ वसाज्यम्+अध्वाभं स्रवेत्+तत्र+उल्बणः+अनिलः॥17॥
मांसं विशोष्यं ग्रथितां शर्कराम्+उपपादयेत्।
दुर्गन्धं रुधिरं क्लिन्नं नानावर्णं ततः+ मलाः॥18॥
तां स्रावयन्ति निचितां विद्यात्+तत्+शर्करार्बुदम्।
पाणिपादतले सन्धौ जत्रूर्ध्वं वा+उपचीयते॥19॥
वल्मीकवत्+शनैः+ग्रन्थिः+तद्वत्+बह्वणुभिः+मुखैः।
रुग्दाहकण्डूक्लेदाढ्यैः+वल्मीकः+असौ समस्तजः॥20॥
शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः।
ग्रन्थिः कीलवत्+उत्सन्नः+ जायते कदरं तु तत्॥21॥
वेगसन्धारणात्+वायुः+अपानः+अपानसंश्रयम्।
अणूकरोति बाह्यान्तर्मार्गम्+अस्य ततः शकृत्॥22॥
कृच्छ्रात्+निर्गच्छति व्याधिः+अयं रुद्धगुदः+ मतः।
कुर्यात्+पित्तानिलं पाकं नखमांसे सरुग्ज्वरम्॥23॥
चिप्यम्+अक्षतरोगं च विद्यात्+उपनखं च तम्।
कृष्णः+अभिघातात्+रूक्षः+च खरः+च कुनखः+ नखः॥24॥
दुष्टकर्दमसंस्पर्शात् कण्डूक्लेदान्वितान्तराः।
अङ्गुल्यः+अलसम्+इति+आहुः+तिलाभान्+तिलकालकान्॥25॥
कृष्णान्+अवेदनान्+त्वक्स्थान्+मषान्+तान्+एव च+उन्नतान्।
मषेभ्यः+तु+उन्नततरान्+चर्मकीलान् सितासितान्॥26॥
तथाविधः+ जतुमणिः सहजः+ लोहितः+तु सः।
कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम्॥27॥
शोकक्रोधादिकुपितात्+वातपित्तानत्+मुखे तनु।
श्यामलं मण्डलं व्यङ्गं, वक्त्रात्+अन्यत्र नीलिका॥28॥
परुषं परुषस्पर्शं व्यङ्गं श्यावं च मारुतात्।
पित्तात्+ताम्रान्तम्+आनीलं श्वेतान्तं कण्डुमत्कफात्॥29॥

रक्तात्+रक्तान्तम्+आताम्रं सौषं चिमिचिमायेत्।
वायुना+उदीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति॥30॥
ततः+त्वक्+जायते पाण्डुः क्रमेण च विचेतना।
अल्पकण्डूरविक्लेदा सा प्रसुप्तिः प्रसुप्तितः।31॥
असम्यक्+वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः।
मण्डलानि+अतिकण्डूनि रागवन्ति बहूनि च॥32॥
उत्कोठः सः+अनुबद्धः+तु कोठ इति+अभिधीयते।
प्रोक्ताः षट्त्रिंशत्+इति+एते क्षुद्ररोगा विभागशः॥33॥
[यानविज्ञाय मुह्येत चिकित्सायां चिकित्सकः।]
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने क्षुद्ररोगविज्ञानीयं नाम+एकत्रिंशः+अध्यायः॥31॥
द्वात्रिंशः+अध्यायः।
अथ+अतः क्षुद्ररोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥
विस्रावयेत्+जलौकोभिः+अपक्वाम्+अजगल्लिकाम्।
स्वेदयित्वा यवप्रख्यां विलयाय प्रलेपयेत्॥1॥
दारुकुष्ठमनोह्वालैः+इति+आपाषाणगर्दभात्।
विधिः+तान्+च+आचरेत्+पक्वान् व्रणवत्+साजगल्लिकान्॥2॥
रोध्रकुस्तुम्बरुवचाः प्रलेपः+ मुखदूषिके।
वटपल्लवयुक्ता वा नारिकेलोत्थशुक्तयः॥3॥
अशान्तौ वमनं नस्यं ललाटे च सिराव्यधः।
निम्बाम्बुवान्तः+ निम्बाम्बुसाधितं पद्मकण्टके॥4॥
पिबेत्+क्षौद्रान्वितं सर्पिः+निम्बारग्वधलेपनम्।
विवृतादीन्+तु जालान्तान्+चिकित्सेत्+सेरिवेल्लिकान्।
पित्तवीसर्पवत्+तद्वत् प्रत्याख्यायाग्निरोहिणीम्॥5॥
विलङ्घनं रक्तविमोक्षणं च विरूक्षणं कायविशोधनं च।
धात्रीप्रयोगान् शिशिरप्रदेहान् कुर्यात्+सदा जालकगर्दभस्य॥6॥
विदारिकां हृते रक्ते श्लेष्मग्रन्थिवत्+आचरेत्।
मेदोर्बुदक्रियां कुर्यात्+सुतरां शर्करार्बुदे॥7॥
प्रवृद्धं सुबहुच्छिद्रं सशोफं मर्मणि स्थितम्।
वल्मीकं हस्तपादे च वर्जयेत्+ इतरत्+पुनः॥8॥
शुद्धस्य+अस्रः+ हृते लिम्पेत् सपद्मारेवतामृतैः।

श्यामाकुलत्थिकामूलदन्तीपललसक्तुभिः॥9॥
पक्वे तु दुष्टमांसानि गतीः सर्वाः+च शोधयेत्।
शस्त्रेण सम्यक्+अनु च क्षारेण ज्वलनेन वा॥10॥
शस्त्रेण+उत्कृत्य निःशेषं स्नेहेन कदरं दहेत्।
निरुद्धमणिवत्+कार्यं रुद्धपायोः+चिकित्सितम्॥11॥
चिप्यं शुद्ध्या जितोष्माणं साधयेत्+शस्त्रकर्मणा।
दुष्टं कुनखम्+अपि+एवं चरणावलसे पुनः॥12॥
धान्याम्लसिक्तौ कासीसपटोलीरोचनातिलैः।
सनिम्बपत्रैः+आलिम्पेत्+ दहेत्+तु तिलकालकान्॥13॥
मषान्+च सूर्यकान्तेन क्षारेण यदि वा+अग्निना।
तद्वत्+उत्कृत्य शस्त्रेण चर्मकीलजतूमणी॥14॥
लाञ्छनादित्रये कुर्यात्+यथासन्नं सिराव्यधम्।
लेपयेत्+क्षीरपिष्टैः+च क्षीरिवृक्षत्वगङ्कुरैः॥15॥
व्यङ्गेषु च+अर्जुनत्वक्+वा मञ्जिष्ठा वा समाक्षिका।
लेपः सनवनीता वा श्वेताश्वखुरजा मषी॥16॥
रक्तचन्दनमञ्जिष्ठाकुष्ठरोध्रप्रियङ्गवः
वटाङ्कुरा मसूराः+च व्यङ्गघ्ना मुखकान्तिदाः॥17॥
द्वे जीरके कृष्णतिलाः सर्षपाः पयसा सह।
पिष्टाः कुर्वन्ति वक्त्रेन्दुम्+अपास्तव्यङ्गलाञ्छनम्॥18॥
क्षीरपिष्टा घृतक्षौद्रयुक्ता वा भृष्टनिस्तुषाः।
मसूराः क्षीरपिष्टा वा तीक्ष्णाः शाल्मलिकण्टकाः॥19॥
सगुडः कोलमज्जा वा शशासृक्क्षौद्रकल्कितः।
सप्ताहं मातुलुङ्गस्थं कुष्ठं वा मधुना+अन्वितम्॥20॥
पिष्टा वा छागपयसा सक्षौद्रा मौशली जटा।
गोः+अस्थि मुशलीमूलयुक्तं वा साज्यम्+आक्षिकम्॥21॥
जम्ब्वाम्रपल्लवामः+तु हरिद्रे द्वे नवः+ गुडः।
लेपः सवर्णकृत् पिष्टं स्वरसेन च तिन्दुकम्॥22॥
उत्पलम्+उत्पलकुष्ठं प्रियङ्गुकालीयकं बदरमज्जा।
इदम्+उद्वर्तनम्+आस्यं करोति शतपत्रसंकाशम्॥23॥
एभिः+एव+औषधैः पिष्टैः+मुखाभ्यङ्गाय साधयेत्।
यथादोषर्तुकान् स्नेहान् मधुकक्वाथसंयुतैः॥24॥
यवान् सर्जरसं रोध्रम्+उशीरं मदनं मधु।

घृतं गुडं च गोमूत्रे पचेत्+आदर्विलेपनात्॥25॥
तत्+अभ्यङ्गात्+निहन्ति+आशु नीलिकाव्यङ्गदूषिकान्।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ॥26॥
कुङ्कुमोशीरकालीयलाक्षायष्ट्याह्वचन्दनम्।
न्यग्रोधपादान्+तरुणान् पद्मकं पद्मकेसरम्॥27॥
सनीलोत्पलमञ्जिष्ठं पालिकं ससिलाढके।
पक्त्वा पादावशेषेण तेन पिष्टैः+च कार्षिकैः॥28॥
लाक्षापत्तङ्गमञ्जिष्ठायष्टीमधुककुङ्कुमैः।
अजाक्षीरं द्विगुणितं तैलस्य कुडवं पचेत्॥29॥
नीलिकापलितव्यङ्गवलीतिलकदूषिकान्।
हन्ति तत्+नस्यम्+अभ्यस्तं मुखोपचयवर्णकृत्॥30॥
मञ्जिष्ठा शबरोद्भवः+तुवरिका लाक्षा हरिद्राद्वयं
नेपाली हरितालकुङ्कुमगदा गोरोचना गैरिकम्।
पत्रं पाण्डु वटस्य चन्दनयुगं कालीयकं पारदं
पत्तङ्गं कनकत्वचं कमलजं बीजं तथा केसरम्॥31॥
सिक्थं तुत्थं पद्मकाद्यः+ वसा+आज्यं मज्जा क्षीरं क्षीरिवृक्षाम्बु च+अग्नौ।
सिद्धं सिद्धं व्यङ्गनील्यादिनाशे वक्त्रे छायाम्+ऐन्दवीं च+आशु धत्ते॥32॥
मार्कवस्वरसक्षीरतोयानीष्टानि नावने।
प्रसुप्तौ वातकुष्ठोक्तं कुर्यात्+दाहं च वह्निना॥33॥
उत्कोठे कफपित्तोक्तं कोठे सर्वं च कौष्ठिकम्॥33 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने क्षुद्ररोगप्रतिषेधः+ नाम द्वात्रिंशः+अध्यायः॥32॥
त्रयस्त्रिंशः+अध्यायः।
अथ+अतः+ गुह्यरोगविज्ञानीयं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
स्त्रीव्यवायनिवृत्तस्य सहसा भजतः+अथवा।
दोषाध्युषितसङ्कीर्णमलिनाणुरजः पथाम्॥1॥
अन्ययोनिम्+अनिच्छन्तीम्+अगम्यां नवसूतिकाम्।
दूषितं स्पृशतः+तोयं रतान्तेषु+अपि न+एव वा॥2॥
विवर्धयिषया तीक्ष्णान् प्रलेपादीन् प्रयच्छतः।
मुष्टिदन्तनखोत्पीडाविषवत्+शूकपातनैः॥3॥
वेगनिग्रहदीर्घातिखरस्पर्शविघट्टनैः।

दोषा दुष्टा गता गुह्यं त्रयोविंशतिम्+आमयान्॥4॥
जनयन्ति+उपदंशादीन् उपदंशः+अत्र पञ्चधा।
पृथक्+दोषैः सरुधिरैः समस्तैः+च अत्र मारुतात्॥5॥
मेढ्रे शोफः+ रुजः+चित्राः स्तम्भः+त्वक्परिपोटनम्।
पक्वोदुम्बरसङ्काशः पित्तेन श्वयथुः+ज्वरः॥6॥
श्लेष्मणा कठिनः स्निग्धः कण्डूमान् शीतलः+ गुरुः।
शोणितेन+असितस्फोटसम्भवः+अस्रस्रुतिः+ज्वरः॥7॥
सर्वजे सर्वलिङ्गत्वं श्वयथुः+मुष्कयोः+अपि।
तीव्रा रुक्+आशु+पचनं दरणं कृमिसम्भवः॥8॥
याप्यः+ रक्तोद्भवः+तेषां मृत्यवे सन्निपातजः।
जायन्ते कुपितैः+दोषैः+गुह्यासृक्पिशिताश्रयैः॥9॥
अन्तर्बहिः+वा मेढ्रस्य कण्डूला मांसकीलकाः।
पिच्छिलास्रस्रवा योनौ तद्वत्+च छत्रसन्निभाः॥10॥
ते+अर्शांसि+उपेक्षया घ्नन्ति मेढ्रपुंस्त्वं भगार्तवम्।
गुह्यस्य बहिरन्तः+वा पिटिकाः कफरक्तजाः॥11॥
सर्षपामानसंस्थानां घनाः सर्षपिकाः स्मृताः।
पिटिका बहवः+ दीर्घा दीर्यन्ते मध्यतः+च याः॥12॥
सः+अवमन्थः कफासृग्भ्यां वेदनारोमहर्षवान्।
कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभा+आशुजा॥13॥
अलजीं मेहवत्+विद्यात्+ उत्तमां पित्तरक्तजाम्।
पिटिकां माषमुद्गाभां पिटिका पिटिकाचिता॥14॥
कर्णिका पुष्करस्य+इव ज्ञेया पुष्करिका+इति सा।
पाणिभ्यां भृशसंव्यूढे संव्यूढपिटिका भवेत्॥15॥
मृदितं मृदितं वस्त्रसंरब्धं वातकोपतः।
विषमा कठिना भुग्ना वायुना+अष्ठीलिका स्मृता॥16॥
विमर्दनादिदुष्टेन वायुना चर्म मेढ्रजम्।
निवर्तते सरुग्दाहं क्वचित्+पाकं च गच्छति॥17॥
पिण्डितं ग्रन्थितं चर्म तत्+प्रलम्बम्+अधः+ मणेः।
निवृत्तसंज्ञं सकफं कण्डूकाठिन्यवत्+तु तत्॥18॥
दुरूढं स्फुटितं चर्म निर्दिष्टम्+अवपाटिका।
वातेन दूषितं चर्म मणौ सक्तं रुणद्धि चेत्॥19॥
स्रोतः+ मूत्रं ततः+अभ्येति मन्दधारम्+अवेदनम्।

मणेः+विकाशरोधः+च सः+ निरुद्धमणिः+गदः॥20॥
लिङ्गं शूकैः+इव+अपूर्णं ग्रथिताख्यं कफोद्भवम्।
शूकदूषितरक्तोत्था स्पर्शहानिः+तदा+आह्वया॥21॥
छिद्रैः+अणुमुखैः+यत्+तु मेहनं सर्वतः+चितम्।
वातशोणितकोपेन तं विद्यात्+शतपोनकम्॥22॥
पित्तासृग्भ्यां त्वचः पाकः+त्वक्पाकः+ ज्वरदाहवान्।
मांस्पाकः सर्वजः सर्ववेदनः+ मांसशातनः॥23॥
सरागैः+असितैः स्फोटैः पिटिकाभिः+च पीडितम्।
मेहनं वेदना च+उग्रा तं विद्यात्+असृक्+अर्बुदम्॥24॥
मांसार्बुदं प्राक्+उदितं विद्रधिः+च त्रिदोषजः।
कृष्णानि भूत्वा मांसानि विशीर्यन्ते समन्ततः॥25॥
पक्वानि सन्निपातेन तान् विद्यात्+तिलकालकान्।
मांसोत्थम्+अर्बुदं पाकं विद्रधिं तिलकालकान्॥26॥
चतुरः+ वर्जयेत्+एषां शेषान्+शीघ्रम्+उपाचरेत्।
विंशतिः+व्यापदः+ योनेः+जायन्ते दुष्टभोजनात्॥27॥
विषमस्थाङ्गशयनभृशमैथुनसेवनैः।
दुष्टार्तवादपद्रव्यैः+बीजदोषेण दैवतः॥28॥
योनौ क्रुद्धः+अनिलः कुर्यात्+ रुक्तोदायाम्+असुप्तताः।
पिपीलिकासृप्तिम्+इव स्तम्भं कर्कशातं स्वनम्॥29॥
फेनिलारुणकृष्णाल्पतनुरूक्षार्तवस्रुतिम्।
स्रसं वङ्क्षणपार्श्वादौ व्यथां गुल्मं क्रमेण च॥30॥
तान्+तान्+च स्वान् गदान् व्यापत्+वातिकी नाम सा स्मृता।
सः+एव+अतिचरणा शोफसंयुक्ता+अतिव्यवायतः॥31॥
मैथुनात्+अतिबालायाः पृष्ठजङ्घोरुवङ्क्षणम्।
रुजन् सन्दूषयेत्+योनिं वायुः प्राक्चरणेति सा॥32॥
वेगोदावर्तनात्+योनिं प्रपीडयति मारुतः।
सा फेनिलं रजः कृच्छ्रात्+उदावृत्तं विमुञ्चति॥33॥
इयं व्यापत्+उदावृत्ता जातघ्नी तु यदा+अनिलः।
जातं जातं सुतं हन्ति रौक्ष्यात्+दुष्टार्तवोद्भवम्॥34॥
अत्याशिताया विषमः स्थितायाः सुरते मरुत्।
अन्नेन+उत्पीडितः+ योनेः स्थितः स्रोतसि वक्रयेत्॥35॥
सास्थिमांसं मुखं तीव्ररुजम्+अन्तर्मुखी+इति सा।

वातलाहारसेविन्यां जननयां कुपितः+अनिलः॥36॥
स्त्रियः+ योनिम्+अणुद्वारां कुर्यात्+सूचीमुखी+इति सा।
वेगरोधादृतौ वायुः+दुष्टः+ विण्मूत्रसङ्ग्रहम्॥37॥
करोति योनेः शोषं च शुष्काख्या सा+अतिवेदना।
षडहात् सप्तरात्रात्+वा शुक्रं गर्भाशयात्+मरुत्॥38॥
वमेत्+सरुङ् नीरुजः+ वा यस्याः सा वामिनी मता।
योनौ वातोपतप्तायां स्त्रीगर्भे बीजदोषतः॥39॥
नृद्वेषिण्यस्तनी च स्यात् षण्ढसंज्ञा+अनुपक्रमा।
दुष्टः+ विष्टभ्य योन्यास्यं गर्भकोष्ठं च मारुतः॥40॥
कुरुते विवृतां स्रस्तां वातिकीम्+इव दुःखिताम्।
उत्सन्नमासां ताम्+आहुः+महायोनिं महारुजाम्॥41॥
यथास्वैः+दूषणैः+दुष्टं पित्तं योनिम्+उपाश्रितम्।
करोति दाहपाकोषापूतिगन्धिज्वरान्विताम्॥42॥
भृशोष्णभूरिकुणपनीलपीतासितार्तवाम्।
सा व्यापत् पैत्तिकी रक्तयोन्याख्या+असृगतिस्रुतेः॥43॥
कफः+अभिष्यन्दिभिः क्रुद्धः कुर्यात्+योनिम्+अवेदनाम्।
शीतलां कण्डुला पाण्डुपिच्छिला तत्+विधस्रुतिम्॥44॥
सा व्यापत्+श्लैष्मिकी वातपित्ताभ्यां क्षीयते रजः।
सदाहकार्श्यवैवर्ण्यं यस्याः सा लोहितक्षया॥45॥
पित्तलाया नृसंवासे क्षवथूद्गारधारणात्।
पित्तयुक्तेन मरुता योनिः+भवति दूषिता॥46॥
शूना स्पर्शासहा सार्तिः+नीलपीतास्रवाहीनी।
बस्तिकुक्षिगुरुत्वातिसारारोचककारिणी॥47॥
श्रोणिवङ्क्षणरुक्तोदज्वरकृत् सा परिप्लुता।
वातश्लेष्मामयव्याप्ता श्वेतपिच्छिलवाहिनी॥48॥
उपप्लुता स्मृता योनिः+ विप्लुताख्या तु+अधावनात्।
सञ्जातजन्तुः कण्डूला कण्ड्वा च+अतिः+अतिप्रिया॥49॥
अकालवाहनात्+वायुः श्लेष्मरक्तविमूर्च्छितः।
कर्णिकां जनयेत्+योनौ रजोमार्गनिरोधिनीम्॥50॥
सा कर्णिनी त्रिभिः+दोषैः+योनिगर्भाशयाश्रितैः।
यथास्वोपद्रवकरैः+व्यापत्सा सान्निपातिकी॥51॥
इति योनिगदा नारी यैः शुक्रं न प्रतीच्छति।

ततः+ गर्भं न गृह्णाति रोगान्+च+आप्नोति दारुणान्॥52॥
असृग्दरार्शोगुल्मादीन्+आबाधान्+च+अनिलादिभिः॥52 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृयसंहितायां षष्ठे उत्तरस्थाने गुह्यरोगविज्ञानीयः+ नाम त्रयस्त्रिंशः+अध्यायः॥33॥
चतुस्त्रिंशः+अध्यायः।
अथ+अतः+ गुह्यरोगप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
मेढ्रमध्ये सिरां विध्येत्+उपदंशे नवोत्थिते।
शीतां कुर्यात् क्रियां शुद्धिं विरेकेण विशेषतः॥1॥
तिलकल्कघृतक्षौद्रैः+लेपः पक्वे तु पाटिते।
जम्ब्वाम्रसुमनोनीपश्वेतकाम्बोजिकाङ्कुरान्॥2॥
शल्लकीबदरीबिल्वपलाशतिनिशोद्भवाः।
त्वचः क्षीरिद्रुमाणां च त्रिफलां च पचेत्+जले॥3॥
सः+ क्वाथः क्षालनं, तेन पक्वं तैलं च रोपणम्।
तुत्थगैरिकलोध्रैलामनोह्वालरसाञ्जनैः॥4॥
हरेणुपुष्पकासीससौराष्ट्रीलवणोत्तमैः।
लेपः क्षौद्रयुतैः सूक्ष्मैः+उपदंशव्रणापहः॥5॥
कपाले त्रिफला दग्धा सघृता रोपणं परम्।
सामान्यं साधनम्+इदं प्रतिदोषं तु शोफवत्॥6॥
न च याति यथा पाकं प्रयतेत तथा भृशम्।
पक्वैः स्नायुसिरामांसैः प्रायः+ नश्यति हि ध्वजः॥7॥
अर्शसां छिन्नदग्धानां क्रिया कार्योपदंशवत्।
सर्षपा लिखिताः सूक्ष्मैः कषायैः+अवचूर्णयेत्॥8॥
तैः+एव+अभ्यञ्जनं तैलं साधयेत्+ व्रणरोपणम्।
क्रिया+इयम्+अवमन्थे+अपि रक्तं स्राव्यं तथा+उभयोः॥9॥
कुम्भीकायां हरेत्+रक्तं पक्वायां शोधिते व्रणे।
तिन्दुकत्रिफलारोध्रैः+लेपः+तैलं च रोपणम्॥10॥
अलज्यां स्रुतरक्तायामयम्+एव क्रियाक्रमः।
उत्तमाख्यां तु पिटिकां सञ्छिद्य बडिशोद्धृताम्॥11॥
कल्कैः+चूर्णैः कषायाणां क्षौद्रयुक्तैः+उपाचरेत्।
क्रमः पित्तविसर्पोक्तः पुष्करव्यूढयोः+हितः॥12॥
त्वक्पाके स्पर्शहान्यां च सेचयेत्+ मृदितं पुनः।

बलातैलेन कोष्णेन मधुरैः+च+उपनाहयेत्॥13॥
अष्ठीलिकां हृते रक्ते श्लेष्मग्रन्थिवत्+आचरेत्।
निवृत्तं सर्पिषा+अभ्यज्य स्वेदयित्वा+उपनाहयेत्॥14॥
त्रिरात्रं पञ्चरात्रं वा सुस्निग्धैः शाल्वलादिभिः।
स्वेदयित्वा ततः+ भूयः स्निग्धं चर्म समानयेत्॥15॥
मणिं प्रपीड्य शनकैः प्रविष्टे च+उपनाहनम्।
मणौ पुनःपुनः स्निग्धं भोजनं च+अत्र शस्यते॥16॥
अयम्+एव प्रयोज्यः स्यात्+अवपाट्याम्+अपि क्रमः।
नीडीम्+उभयतोद्वारां निरुद्धे जतुना सृताम्॥17॥
स्नेहाक्तां स्रोतसि न्यस्य सिञ्चेत्+स्नेहैः+चलापहैः।
त्र्यहात्+त्र्यहात्+स्थूलतरां न्यस्य नाडीं विवर्धयेत्॥18॥
स्रोतोद्वारम्+असिद्धौ तु विद्वान् शस्त्रेण पाटयेत्।
सेवनीं वर्जयन् युञ्ज्यात् सद्यः क्षतविधिं ततः॥19॥
ग्रन्थितं स्वेदितं नाड्या स्निग्धोष्णैः+उपनाहयेत्।
लिम्पेत्+कषायैः सक्षौद्रैः+लिखित्वा शतपोनकम्॥20॥
रक्तविद्रधिवत्+कार्या चिकित्सा शोणितार्बुदे।
व्रणोपचारं सर्वेषु यथावस्थं प्रयोजयेत्॥21॥
योनिव्यापत्सु भूयिष्ठं शस्यते कर्म वातजित्।
स्नेहनस्वेदबस्त्यादि वातजासु विशेषतः॥22॥
न हि वातात्+ऋते योनिः+वनितानां प्रदुष्यति।
अतः+ जित्वा तम्+अन्यस्य कुर्यात्+दोषस्य भेषजम्॥23॥
पाययेत(त्तां) बलातैलं मिश्रकं सुकुमारकम्।
स्निग्धस्विन्नां तथा योनिं दुःस्थितां स्थापयेत्+समां॥24॥
पाणिना नमयेत्+जिह्मां संवृतां व्यधयेत् पुनः।
प्रवेशयेत्+निःसृतां च विवृतां परिवर्तयेत्॥25॥
स्थानापवृत्ता योनिः+हि शल्यभूता स्त्रियः+ मता।
कर्मभिः+वमनाद्यैः+च मृदुभिः+योजयेत्+स्त्रियम्॥26॥
सर्वतः सुविशुद्धायाः शेषं कर्म विधीयते।
बस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम्॥27॥
काश्मर्यत्रिफलाद्राक्षाकासमर्दनिशाद्वयैः।
गुडूचीसैर्यकाभीरुशुकनासापुनर्नवैः॥28॥
परूषकैः+च विपचेत्+प्रस्थम्+अक्षसमैः+घृतात्।

योनिवातविकारघ्नं तत्+पीतं गर्भदं परम्॥29॥
वचोपकुञ्चिकाजाजीकृष्णावृषकसैन्धवम्।
अजमोदायवक्षारशर्कराचित्रकान्वितम्॥30॥
पिष्ट्वा प्रसन्नया+आलोड्य खादेत्+तत्+घृतभर्जितम्।
योनिपार्श्वार्तिहृद्रोगगुल्मार्शोविनिवृत्तये॥31॥
वृषकं मातुलुङ्गस्य मूलानि मदयन्तिकाम्।
पिबेत्+मद्यैः सलवणैः+तथा कृष्णोपकुञ्चिके॥32॥
रास्नाश्वदंष्ट्रावृषकैः शृतं शूलहरं पयः।
गुडूचीत्रिफलादन्तीक्वाथैः+च परिषेचनम्॥33॥
नतवार्ताकिनीकुष्ठसैन्धवामरदारुभिः।
तैलात्+प्रसाधिताद्धार्यः पिचुः+योनौ रुजापहः॥34॥
पित्तलानां तु योनीनां सेकाभ्यङ्गपिचुक्रियाः।
शीताः पित्तजितः कार्याः स्नेहनार्थं घृतानि च॥35॥
शतावरीमूलतुलाचतुष्कात् क्षुण्णपीडितात्।
रसेन क्षीरतुल्येन पाचयेत घृताढकम्॥36॥
जीवनीयैः शतावर्याः मृद्वीकाभिः परूषकैः।
पिष्टैः प्रियालैः+च+अक्षांशैः+द्विबलामधुकान्वितैः॥37॥
सिद्धशीते तु मधुनः पिप्पल्याः+च पलाष्टकम्।
शर्कराया दशपलं क्षिपेत्+लिह्यात्+पिचुं ततः॥38॥
योन्यसृक्शुक्रदोषघ्नं वृष्यं पुंसवनं परम्।
क्षतं क्षयम्+असृक्पित्तं कासं श्वासं हलीमकम्॥39॥
कामलां वातरुधिरं विसर्पं हृच्छिरोग्रहम्।
अपस्मारार्दितायाममदोन्मादान्+च नाशयेत्॥40॥
एवम्+एव पयःसर्पिः+जीवनीयोपसाधितम्।
गर्भदं पित्तजानां च रोगाणां परमं हितम्॥41॥
बलाद्रोणद्वयक्वाथे घृततैलाढकं पचेत्।
क्षीरे चतुर्गुणे कृष्णाकाकनासासितान्वितैः॥42॥
जीवन्तीक्षीरकाकोलीस्थिरावीरर्धिजीवकैः।
पयस्याश्रावणीमुद्गपीलुमाषाख्यपर्णिभिः॥43॥
वातपित्तामयान् हत्वा पानात्+ गर्भं दधाति तत्।
रक्तयोन्यामसृग्वर्णैः+अनुबन्धम्+अवेक्ष्य च॥44॥
यथादोषोत्+अयं युञ्ज्यात्+ रक्तस्थापनम्+औषधम्।

पाठां जम्ब्वाम्रयोः+अस्थि शिलोद्भेदं रसाञ्जनम्॥45॥
अम्बष्ठां शाल्मलीपिच्छां समङ्गां वत्सकत्वचम्।
बाह्लीकबिल्वातिविषारोध्रतोयदगैरिकम्॥46॥
शुण्ठीमधूकमाचीकरक्तचन्दनकट्फलम्।
कट्वङ्गवत्सकानन्ताधातकीमधुकार्जुनम्॥47॥
पुष्ये गृहीत्वा सञ्चूर्ण्य सक्षौद्रं तन्दुलाम्भसा।
पिबेत्+अर्शः स्वतीसारे रक्तं यः+च+उपवेश्यते॥48॥
दोषा जन्तुकृता ये च बालनां तान्+च नाशयेत्
योनिदोषं रजोदोषं श्यावश्वेतारुणासितम्॥49॥
चूर्णं पुष्यानुगं नाम हितम्+आत्रेयपूजितम्।
योन्यां बलासदुष्टायां सर्वं रूक्षोष्णम्+औषधम्॥50॥
धातक्यामलकीपत्रस्रोतोजमधुकोत्पलैः।
जम्ब्वाम्रसारकासीसरोध्रकट्फलतिन्दुकैः॥51॥
सौराष्ट्रिकादाडिमत्वगुदुम्बरशलाटुभिः।
अक्षमात्रैः+अजामूत्रे क्षीरे च द्विगुणे पचेत्॥52॥
तैलप्रस्थं तत्+अभ्यङ्गपिचुबस्तिषु योजयेत्।
तेन शूनोन्नता स्तब्धा पिच्छिला स्राविणी तथा॥53॥
विप्लुतोपप्लुता योनिः सिद्ध्येत्+सस्फोटशूलिनी।
यवान्नम्+अभयारिष्टं सीधु तैलं च शीलयेत्॥54॥
पिप्पल्ययोः+अजः पथ्याप्रयोगान्+च समाक्षिकान्।
कासीसं त्रिफलां काङ्क्षीं साम्रजम्ब्वस्थि धातुकी॥55॥
पैच्छिल्ये क्षौद्रसंयुक्तः+चूर्णः+ वैशद्यकारकः।
पलाशधातकीजम्बूसमङ्गामोचसर्जजः॥56॥
दुर्गन्धे पिच्छिले क्लेदे स्तम्भनः+चूर्णः+ इष्यते।
आरग्वधादिवर्गस्य कषायः परिषेचनम्॥57॥
स्तब्धानां कर्कशानां च कार्यं मार्दवकारकम्।
धारणं वेसवारस्य कृसरापायसस्य च॥58॥
दुर्गन्धानां कषायः स्यात्+तैलं वा कल्कः+ एव वा।
चूर्णः+ वा सर्वगन्धानां पूतिगन्धा(न्ध्य)पकर्षणः॥59॥
श्लेष्मलानां कटुप्रायाः समूत्रा बस्तयः+ हिताः।
पित्ते समधुकक्षीरा वाते तैलाम्लसंयुताः॥60॥
सन्निपातसमुत्थायाः कर्म साधारणं हितम्।

एवं योनिषु शुद्धासु गर्भं विन्दन्ति योषितः॥61॥
अदुष्टे प्राकृते बीजे जीवोपक्रमणे सति।
पञ्चकर्मविशुद्धस्य पुरुषस्य+अपि च+इन्द्रियम्॥62॥
परीक्ष्य वर्णैः+दोषाणां दुष्टं तद्घ्नैः+उपाचरेत्।
मञ्जिष्ठाकुष्ठतगरत्रिफलाशर्करावचाः॥63॥
द्वे निशे मधुकं मेदां दीप्यकं कटुरोहिणीम्।
पयस्याहिङ्गुकाकोलीवाजिगन्धाशतावरीः॥64॥
पिष्ट्वा+अक्षांशा घृतप्रस्थं पचेत्+क्षीरचतुर्गुणम्।
योनिशुक्रप्रदोषेषु तत्+सर्वेषु प्रशस्यते॥65॥
आयुष्यं पौष्टिकं मेध्यं धन्यं पुंसवनं परम्।
फलसर्पिः+इति ख्यातं पुष्पे पीतं फलाय यत्॥66॥
म्रियमाणप्रजानां च गर्भिणीनां च पूजितम्।
एतत्+परं च बालानां ग्रहघ्नं देहवर्धनम्॥67॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने गुह्यरोगप्रतिषेधः+ नाम चतुस्त्रिंशः+अध्यायः॥34॥
पञ्चत्रिंशः+अध्यायः।
अथ+अतः+ विषप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
मथ्यमाने जलनिधौ+अमृतार्थं सुरासुरैः।
जातः प्रागमृतोत्पत्तेः पुरुषः+ घोरदर्शनः॥1॥
दीप्ततेजाः+चतुर्दंष्ट्रः+ हरिकेशः+अनलेक्षणः।
जगद्विषण्णं तं दृष्ट्वा तेन+असौ विषसंज्ञितः॥2॥
हुंकृतः+ ब्रह्मणा मूर्ती ततः स्थावरजङ्गमे।
सः+अध्यतिष्ठन्+निजं रूपम्+उज्झित्वा वञ्चनात्मकम्॥3॥
स्थिरम्+अत्युल्बणं वीर्ये यत्+कन्देषु प्रतिष्ठितम्।
कालकूटेन्द्रवत्साख्यशृङ्गीहालाहलादिकम्॥4॥
सर्पलूतादिदंष्ट्रासु दारुणं जङ्गमं विषम्।
स्थावरं जङ्गमं च+इति विषं प्रोक्तम्+अकृत्रिमम्॥5॥
कृत्रिमं गरसंज्ञं तु क्रियते विविधौषधैः।
हन्ति योगवशेन+आशु चिरात्+चिरतरात्+च तत्॥6॥
शोफपाण्डूदरोन्मादुर्नामादीन् करोति वा।
तीक्ष्णोष्णरूक्षविशदं व्यवायि+आशुकरं लघु॥7॥

विकाषि सूक्ष्ममव्यक्तरसं विषमपाकि च।
ओजसः+ विपरीतं तत् तीक्ष्णाद्यैः+अन्वितं गुणैः॥8॥
वातपित्तोत्तरं नृणां सद्यः+ हरति जीवितम्।
विषं हि देहं सम्प्राप्य प्राक्+ दूषयति शोणितम्॥9॥
कफपित्तानिलान्+च+अनु समं दोषान् सहाशयान्।
ततः+ हृदयम्+आस्थाय देहोच्छेदाय कल्पते॥10॥
स्थावरस्य+उपयुक्तस्य वेगे पूर्वे प्रजायते।
जिह्वायाः श्यावता स्तम्भः+ मूर्च्छा त्रासः क्लमः+ वमिः॥11॥
द्वितीये वेपथुः स्वेदः+ दाहः कण्ठे च वेदना।
विषं च+आमाशयं प्राप्तं कुरुते हृदि वेदनाम्॥12॥
तालुशोषः+तृतीये तु शूलं च+आमाशये भृशम्।
दुर्बले हरिते शूने जायेते च+अस्य लोचने॥13॥
पक्वाशयगते तोदहिध्माकासान्त्रकूजनम्।
चतुर्थे जायते वेगे शिरसः+च+अतिगौरवम्॥14॥
कफप्रसेकः+ वैवर्ण्यं पर्वभेदः+च पञ्चमे।
सर्वदोषप्रकोपः+च पक्वाधाने च वेदना॥15॥
षष्ठे संज्ञाप्रणाशः+च सुभृशं च+अतिसार्यते।
स्कन्धपृष्ठकटीभङ्गः+ भवेत्+मृत्युः+च सप्तमे॥16॥
प्रथमे विषवेगे तु वान्तं शीताम्बुसेचितम्।
सर्पिः+मधुभ्यां संयुक्तम्+अगदं पाययेत्+ द्रुतम्॥17॥
द्वितीये पूर्ववत्+वान्तं विरिक्तं च+अनु पाययेत्।
तृतीये+अगदपानं तु हितं नस्यं तथा+अञ्जनम्॥18॥
चतुर्थे स्नेहसंयुक्तम्+अगदं प्रतियोजयेत्।
पञ्चमे मधुकक्वाथमाक्षिकाभ्यां युतं हितम्॥19॥
षष्ठे+अतिसारवत्+सिद्धिः+अवपीडः+तु सप्तमे।
मूर्ध्नि काकपदं कृत्वा सासृक्+वा पिशितं क्षिपेत्॥20॥
कोशातक्यग्निकः पाठा सूर्यवल्यमृताभयाः।
शेलुः शिरीषः किणिही हरिद्रे क्षौद्रसाह्वया॥21॥
पुनर्नवे त्रिकटुकं बृहत्यौ सारिवे बला।
एषां यवागूं निर्यूहे शीतां सघृतमाक्षिकाम्॥22॥
युञ्ज्यात्+वेगान्तरे सर्वविषघ्नीं कृतकर्मणः।
तद्वत्+मधूकमधुकपद्मकेसरचन्दनैः॥23॥

अञ्जनं तगरं कुष्ठं हरितालं मनःशिला।
फलिनी त्रिकटु स्पृक्का नागपुष्पं सकेसरम्॥24॥
हरेणुः+मधुकं मांसी रोचना काकमालिका।
श्रीवेष्टकं सर्जरसः शताह्वा कुङ्कुमं बला॥25॥
तमालपत्रतालीसभूर्जोशीरनिशाद्वयम्।
कन्योपवासिनी स्नाता शुक्लवासा मधुद्रुतैः॥26॥
द्विजान्+अभ्यर्च्य तैः पुष्ये कल्पयेत्+अगदोत्तमम्।
वैद्यः+च+अत्र तदा मन्त्रं प्रयतात्मा पठेत्+इमम्॥27॥
"नमः पुरुषसिंहाय नमः+ नारायणाय च।
यथा+असौ नाभिजानाति रमे कृष्णपराजयम्॥28॥
एतेन सत्यवाक्येन अगदः+ मे प्रसिद्ध्यतु।
नमः+ वैडूर्यमाते हुलुहुलु रक्ष मां सर्वविषेभ्यः॥29॥
गौरि गान्धारि चाण्डालि मातङ्गि स्वाहा।"
पिष्टे च द्वितीयः+ मन्त्रः "हरिमायि स्वाहा॥30॥"
अशेषविषवेतालग्रहकार्मणपाप्मसु।
मरकव्याधिदुर्भिक्षयुद्धाशनिभयेषु च॥31॥
पाननस्याञ्जनालेपमणिबन्धादियोजितः।
एषः+ चन्द्रोदयः+ नाम शान्तिस्वस्त्ययनं परम्॥32॥
[वासवः+ वृत्रम्+अवधीत्+समालिप्तः किलामुना।]
जीर्णं विषघ्नौषधिभिः+हतं वा दावाग्निवातातपशोषितं वा।
स्वभावतः+ वा न गुणैः सुयुक्तं दूषीविषाख्यां विषम्+अभ्युपैति॥33॥
वीर्याल्पभावात्+अविभाव्यम्+एतत् कफावृतं वर्षगणानुबन्धि।
तेन+अर्दितः+ भिन्नपुरीषवर्णो दुष्टास्रारोगी तृडरोचकार्तः॥34॥
मूर्च्छन् वमन् गद्गदवाक् विमुह्यन् भवेत्+च दूष्योदरलिङ्गजुष्टः।
आमाशयस्थे कफवातरोगी पक्वाशयस्थे+अनिलपित्तरोगी॥35॥
भवेत्+नरः+ ध्वस्तशिरोरुहाङ्गो विलूनपक्षः सः+ यथा विहङ्गः।
स्थितं रसादिषु+अथवा विचित्रान् करोति धातुप्रभवान् विकारान्॥36॥
प्राग्वाताजीर्णशीताभ्रदिवास्वप्नाहिताशनैः।
दुष्टं दूषयते धातून्+अतः+ दूषीविषं स्मृतम्॥37॥
दूषीविषार्तं सुस्विन्नम्+ऊर्ध्वं च+अधः+च शोधितम्।
दूषीविषारिम्+अगदं लेहयेत्+मधुना+आप्लुतम्॥38॥
पिप्पल्यः+ ध्यामकं मांसी रोध्रमेला सुवर्चिका।

कुटन्नटं नतं कुष्ठं यष्टी चन्दनगैरिकम्॥39॥
दूषीविषारिः+नाम्ना+अयं न च+अन्यत्र+अपि वार्यते।
विषदिग्धेन विद्धः+तु प्रताम्यति मुहुः+मुहुः॥40॥
विवर्णभावं भजते विषादं च+आशु गच्छति।
कीटैः+इव+आवृतं च+अस्य गात्रं चिमिचिमायते॥41॥
श्रोणिपृष्ठशिरःस्कन्धसन्धयः स्युः सवेदनाः।
कृष्णदुष्टास्रविस्रावी तृण्मूर्च्छाज्वरदाहवान्॥42॥
दृष्टिकालुष्यवमथुश्वासकासकरः क्षणात्।
आरक्तपीतपर्यन्तः श्यावमध्यः+अतिरुग्व्रणः॥43॥
शूयते पच्यते सद्यः+ गत्वा मांसं च कृष्णताम्।
प्रक्लिन्नं शीर्यते+अभीक्ष्णं सपिच्छिलपरिस्रवम्॥44॥
कुर्यात्+अमर्मविद्धस्य हृदयावरणं द्रुतम्।
शल्यमाकृष्य तप्तेन लोहेन+अनु दहेत्+व्रणम्॥45॥
अथवा मुष्ककश्वेतासोमत्वक्ताम्रवल्लितः।
शिरीषात्+ गृध्रनख्याः+च क्षारेण प्रतिसारयेत्॥46॥
शुकनासाप्रतिविषाव्याघ्रीमूलैः+च लेपयेत्।
कीटदष्टचिकित्सां च कुर्यात्+तस्य यथार्हतः॥47॥
व्रणे तु पूतिपिशिते क्रिया पित्तविसर्पवत्।
सौभाग्यार्थं स्त्रियः+ भर्त्रे राज्ञे वा+अरातिचोदिताः॥48॥
गरमाहारसम्पृक्तं यच्छन्ति+आसन्नवर्तिनः।
नानाप्राण्यङ्गशमलविरुद्धौषधिभस्मनाम्॥49॥
विषाणां च+अल्पवीर्याणां योगः+ गरः+ इति स्मृतः।
तेन पाण्डुः कृशः+अल्पाग्निः कासश्वासज्वरार्दितः॥50॥
वायुना प्रतिलोमेन स्वप्नचिन्तापरायणः।
महोदरयकृत्प्लीही दीनवाग्दुर्बलः+अलसः॥51॥
शोफवान् सतताध्मातः शुष्कपादकरः क्षयी।
स्वप्ने गोमायुमार्जारनकुलव्यालवानरान्॥52॥
प्रायः पश्यति शुष्कान्+च वनस्पतिजलाशयान्।
मन्यते कृष्णमात्मानं गौरः+, गौरं च कालकः॥53॥
विकर्णनासानयनं पश्येत्+तत्+विहतेन्द्रियः।
एतैः+अन्यैः+च बहुभिः क्लिष्टः+ घोरैः+उपद्रवैः॥54॥
गरार्तः+ नाशम्+आप्नोति कश्चित्+सद्यः+अचिकित्सितः।

गरार्तः+ वान्तवान् भुक्त्वा तत्+पथ्यं पानभोजनम्॥55॥
शुद्धहृत्+शीलयेत्+हेम सूत्रस्थानविधेः स्मरन्।
शर्कराक्षौद्रसंयुक्तं चूर्णं ताप्यसुवर्णयोः॥56॥
लेहः प्रशमयति+उग्रं सर्वयोगकृतं विषम्।
मूर्वामृतानतकणापटोलीचव्यचित्रकान्॥57॥
वचामुस्तविडङ्गानि तक्रकोष्णाम्बुमस्तुभिः।
पिबेत्+रसेन वा+अम्लेन गरोपहतपावकः॥58॥
पारावतामिषशठीपुष्कराह्वशृतं हिमम्।
गरतृष्णारुजाकासश्वासहिध्माज्वरापहम्॥59॥
विषप्रकृतिकालान्नदोषदूष्यादिसङ्गमे।
विषसङ्कटम्+उद्दिष्टं शतस्य+एकः+अत्र जीवति॥60॥
क्षुत्तृष्णाघर्मदौर्बल्यक्रोधशोकभयश्रमैः।
अजीर्णवर्चोद्रवतापित्तमारुतवृद्धिभिः॥61॥
तिलपुष्पफलाघ्राणभूबाष्पघनगर्जितैः।
हस्तिमूषिकवादित्रनिःस्वनैः+विषसङ्कटैः॥62॥
पुरोवातोत्पलामोदमदनैः+वर्धते विषम्।
वर्षासु च+अम्बुयोनित्वात्+संक्लेदं गुडवद्गतम्॥63॥
विसर्पति घनापाये, तत्+अगस्त्यः+ हिनस्ति च।
प्रयाति मन्दवीर्यत्वं विषं तस्मात्+धनात्यये॥64॥
इति प्रकृतिसात्म्यर्तुस्थानवेगबलाबलम्।
आलोच्य निपुणं बुद्ध्या कर्मानन्तरम्+आचरेत्॥65॥
श्लेष्मिकं वमनैः+उष्णरुक्षतीक्ष्णैः प्रलेपनैः।
कषायकटुतिक्तैः+च भोजनैः शमयेत्+विषम्॥66॥
पैत्तिकं स्रंसनैः सेकप्रदेहैः+भृशशीतलैः।
कषायतिक्तमधुरैः+घृतयुक्तैः+च भोजनैः॥67॥
वातात्मकं जयेत्+स्वादुस्निग्धाम्ललवणान्वितैः।
सघृतैः+भोजनैः+लेपैः+तथा+एव पिशिताशनैः॥68॥
न+अघृतं स्रंसनं शस्तं प्रलेपः+ भोज्यम्+औषधम्।
सर्वेषु सर्वावस्थेषु विषेषु न घृतोपमम्॥69॥
विद्यते भेषजं किञ्चित्+विशेषात् प्रबले+अनिले।
अयत्नात्+श्लेष्मगं साध्यं, यत्नात् पित्ताशयाश्रयम्॥70॥
सुदुःसाध्यम्+असाध्यं वा वाताशयगतं विषम्॥70 1/2॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने विषप्रतिषेधः+ नाम पञ्चत्रिंशः+अध्यायः॥35॥

षट्त्रिंशः+अध्यायः।

अथ+अतः+ सर्पविषप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

दर्वीकरा मण्डलिनः+ राजीमन्तः+च पन्नगाः।

त्रिधाः समासतः+ भौमाः, भिद्यन्ते ते तु+अनेकधा॥1॥

व्यासतः+ योनिभेदेन न+उच्यन्ते+अनुपयोगिनः।

विशेषात्+रूक्षकटुकम्+अम्लोष्णं स्वादुशीतलम्॥2॥

विषं दर्वीकरादीनां क्रमात्+वातादिकोपनम्।

तारुण्यमध्यवृद्धत्वे वृष्टिशीतातपेषु च॥3॥

विषोल्बणा भवन्ति+एते व्यन्तरा ऋतुसन्धिषु।

रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः॥4॥

फणिनः शीघ्रगतयः सर्पा दर्वीकराः स्मृताः।

ज्ञेया मण्डलिनः+अभोगा मण्डलैः+विविधैः+चिताः॥5॥

प्रांशवः+ मन्दगमनाः राजीमन्तः+तु राजिभिः।

स्निग्धा विचित्रवर्णाभिः+तिर्यक्+ऊर्ध्वं च चित्रिताः॥6॥

गोधासुतः+तु गौधेरः+ विषे दर्वीकरैः समः।

चतुष्पात्+ व्यन्तरान् विद्यात्+एतेषाम्+एव सङ्करात्॥7॥

व्यामिश्रलक्षणाः+ते हि सन्निपातप्रकोपनाः।

आहारार्थं भयात् पादस्पर्शात्+अतिविषात् क्रुधः॥8॥

पापवृत्तितया वैरात्+देवर्षियमचोदनात्।

दशन्ति सर्पाः+तेषु+उक्तं विषाधिक्यं यथा+उत्तरम्॥9॥

आदिष्टात् कारणं ज्ञात्वा प्रतिकुर्यात्+यथायथम्।

व्यन्तरः पापशीलत्वात्+मार्गम्+आश्रित्य तिष्ठति॥10॥

यत्र लालापरिक्लेदमात्रं गात्रे प्रदृश्यते।

न तु दंष्ट्राकृतं दंशं तत्+तुण्डाहतम्+आदिशेत्॥11॥

एकं दंष्ट्रापदं द्वे वा व्यालीढाख्यम्+अशोणितम्।

दंष्ट्रापदे सरक्ते द्वे व्यालुप्तं, त्रीणि तानि तु॥12॥

मांसच्छेदात्+अविच्छिन्नरक्तवाहीनि दष्टकम्।

दंष्ट्रापदानि चत्वारि तद्वत्+दष्टनिपीडितम्॥13॥

निर्विषं द्वयमत्राद्यम्+असाध्यं पश्चिमं वदेत्।

विषं न+आहेयम्+अप्राप्य रक्तं दूषयते वपुः॥14॥
रक्तम्+अणु+अपि तु प्राप्तं वर्धते तैलम्+अम्बुवत्।
भीरोः+तु सर्पसंस्पर्शात्+भयेन कुपितः+अनिलः॥15॥
कदाचित्+कुरुते शोफं सर्पाङ्गाभिहतं तु तत्।
दुर्गान्धकारे विद्धस्य केनचित्+दष्टशङ्कया॥16॥
विषोद्वेगः+ ज्वरश्छर्दिः+मूर्च्छा दाहः+अपि वा भवेत्।
ग्लानिः+मोहः+अतिसारः+ वा तत्+शङ्काविषम्+उच्यते॥17॥
तुद्यते सविषः+ दंशः कण्डूशोफरुजान्वितः।
दह्यते ग्रथितः किञ्चित्+विपरीतः+तु निर्विषः॥18॥
पूर्वे दर्वीकृतां वेगे दुष्टं श्यावीभवति+असृक्।
श्यावता तेन वक्त्रादौ सर्पन्ति+इव च कीटकाः॥19॥
द्वितीये ग्रन्थयः+ वेगे, तृतीये मूर्ध्नि गौरवम्।
दृग्रोधः+ दंशविक्लेदः+चतुर्थे ष्ठीवनं वमिः॥20॥
सन्धिविश्लेषणं तन्द्रा पञ्चमे पर्वभेदनम्।
दाहः+ हिध्मा च, षष्ठे तु हृत्पीडा गात्रगौरवम्॥21॥
मूर्च्छा विपाकः+अतीसारः,प्राप्य शुक्रं तु सप्तमे।
स्कन्धपृष्ठकटीभङ्गः सर्वचेष्टानिवर्तनम्॥22॥
अथ मण्डलिदष्टस्य दुष्टं पीतोभवति+असृक्।
तेन पीताङ्गता दाहः+, द्वितीये श्वयथूद्भवः॥23॥
तृतीये दंशविक्लेदः स्वेदः+तृष्णा च जायते।
चतुर्थे ज्वर्यते, दाहः पञ्चमे सर्वगात्रगः॥24॥
दष्टस्य राजिलैः+दुष्टं पाण्डुतां याति शोणितम्।
पाण्डुता तेन गात्राणां, द्वितीये गुरुता+अति च॥25॥
तृतीये दंशविक्लेदः+ नासिकाक्षिमुखस्रवाः।
चतुर्थे गरिमा मूर्ध्नः+ मन्यास्तम्भः+च, पञ्चमे॥26॥
गात्रभङ्गः+ ज्वरः शीतः शेषयोः पूर्ववत्+वदेत्।
कुर्यात्+पञ्चसु वेगेषु चिकित्सां, न ततः परम्॥27॥
जलाप्लुता रतिक्षीणा मीता नकुलनिर्जिताः।
शीतवातातपव्याधिक्षुत्तृष्णाश्रमपीडिताः॥28॥
तूर्णं देशान्तरायाता विमुक्तविषकञ्चूकाः।
कुशौषधीकण्टकवद्ये चरन्ति च काननम्॥29॥
देशं च दिव्याध्युषितं सर्पाः+ते+अल्पविषा मताः।

श्मशानचितिचैत्यादौ पञ्चमीपक्षसन्धिषु॥30॥
अष्टमीनवमीसन्ध्यामध्यरात्रिदिनेषु च।
याम्याग्नेयमघाश्लेषाविशाखापूर्वनैर्ऋते॥31॥
नैर्ऋताख्ये मुहूर्त्ते च दष्टं मर्मसु च त्यजेत्।
दष्टमात्रः सितास्याक्षः शीर्यमाणशिरोरुहः॥32॥
स्तब्धजिह्वः+ मुहुः+मूर्च्छन् शीतोच्छ्वासः+ न जीवति।
हिध्मा श्वासः+ वमिः कासः+ दष्टमात्रस्य देहिनः॥33॥
जायन्ते युगपत्+यस्य सः+ हृच्छूली न जीवति।
फेनं वमति निःसंज्ञः श्यावपादकराननः॥34॥
नासावसादः+ भङ्गः+अङ्गे विड्भेदः श्लथसन्धिता।
विषपीतस्य दष्टस्य दिग्धोनाभिहतस्य च॥35॥
भवन्ति+एतानि रूपाणि सम्प्राप्ते जीवितक्षये।
न नस्यैः+चेतना तीक्ष्णैः+न क्षतात् क्षतजागमः॥36॥
दण्डाहतस्य नः+ राजिः प्रयातस्य यमान्तिकम्।
अतः+अन्यथा तु त्वरया प्रदीप्तागारवत्+भिषक्॥37॥
रक्षन् कण्ठगतान् प्राणान् विषम्+आशु शमं नयेत्।
मात्राशतं विषं स्थित्वा दंशे दष्टस्य देहिनः॥38॥
देहं प्रक्रमते धातून् रुधिरादीन् प्रदूषयत्।
एतस्मिन्+अन्तरे कर्म दंशस्य+उत्कर्तनादिकम्॥39॥
कुर्यात्+शीघ्रं यथा देहे विषवल्ली न रोहति।
दष्टमात्रः+ दशेत्+आशु तम्+एव पवनाशिनम्॥40॥
लोष्टं महीं वा दशनैः+छित्त्वा च+अनु ससम्भ्रमम्।
निष्ठीवेन समालिम्पेत्+दंशं कर्णमलेन वा॥41॥
दंशस्य+उपरि बध्नीयात्+अरिष्टां चतुरङ्गुले।
क्षौमादिभिः+वेणिकया सिद्धैः+मन्त्रैः+च मन्त्रवित्॥42॥
अम्बुवत् सेतुबन्धेन बन्धेन स्तभ्यते विषम्।
न वहन्ति सिराः+च+अस्य विषं बन्धाभिपीडिताः॥43॥
निष्पीड्य+अनूद्धरेत्+दंशं मर्मसन्ध्यगतं तथा।
न जायते विषात्+वेगः+ बीजनाशात्+इव+अङ्कुरः॥44॥
दंशं मण्डलिनां मुक्त्वा पित्तलत्वात्+अथ+अपरम्।
प्रतप्तैः+हेमलोहाद्यैः+दहेदाशूल्मुकेन वा॥45॥
करोति भस्मसात्+सद्यः+ वह्निः किं नाम तु क्षतम्।

आचूषेत् पूर्णवक्त्रः+ वा मृद्भस्मागदगोमयैः॥46॥
प्रच्छायान्तररिष्टायां मांसलं तु विशेषतः।
अङ्गं सह+एव दंशेन लेपयेत्+अगदैः+मुहुः॥47॥
चन्दनोशीरयुक्तेन सलिलेन च सेचयेत्।
विषे प्रविसृते विध्येत्+सिरां सा परमा क्रिया॥48॥
रक्ते निर्ह्रियमाणे हि कृत्स्नं निर्ह्रियते विषम्।
दुर्गन्धं सविषं रक्तम्+अग्नौ चटचटायते॥49॥
यथादोषं विशुद्धं च पूर्ववत्+लक्षयेत्+असृक्।
सिरास्वदृश्यमानासु योज्याः शृङ्गजलौकसः॥50॥
शोणितं स्रुतशेषं च प्रविलीनं विषोष्मणा।
लेपसेकैः सुबहुशः स्तम्भयेत्+भृशशीतलैः॥51॥
अस्कन्ने विषवेगात्+हि मूर्च्छायमदहृद्द्रवाः।
भवन्ति तान् जयेत्+शीतैः+वीजेत्+च+अरोमहर्षतः॥52॥
स्कन्ने तु रुधिरे सद्यः+ विषवेगः प्रशाम्यति।
विषं कर्षति तीक्ष्णत्वात्+ हृदयं तस्य गुप्तये॥53॥
पिबेत्+घृतं घृतक्षौद्रगदं वा घृताप्लुतम्।
हृदयावरणे च+अस्य श्लेष्मा हृदि+उपचीयते॥54॥
प्रवृत्तगौरवोत्क्लेशहृल्लासं वामयेत्+ततः।
द्रवैः काञ्जिककौलत्थतैलमद्यादिवर्जितैः॥55॥
वमनैः+विषहृद्भिः+च न+एवं व्याप्नोति तद्वपुः।
भुजङ्गदोषप्रकृतिस्थानवेगविशेषतः॥56॥
सुसूक्ष्मं सम्यगालोच्य विशिष्टां च+आचरेत्+क्रियाम्।
सिन्दुवारितमूलानि श्वेता च गिरिकर्णिका॥57॥
पानं दर्वीकरैः+दष्टे नस्यं मधु सपाकलम्।
कृष्णसर्पेण दष्टस्य लिम्पेत्+दंशं हृते+असृजि॥58॥
चारटीनाकुलीभ्यां वा तीक्ष्णमूलविषेण वा।
पानं च क्षौद्रमञ्जिष्ठागृहधूमयुतं घृतम्॥59॥
तन्दुलीयककाश्मर्यकिणिहीगिरिकर्णिकाः।
मातुलुङ्गी सिता शेलुः पाननस्याञ्जनैः+हितः॥60॥
अगदः फणिनां घोरे विषे राजीमताम्+अपि।
समाः सुगन्धामृद्वीकाश्वेताख्यागजदन्तिकाः॥61॥
अर्धांशं सौरसं पत्रं कपित्थं बिल्वदाडिमम्।

सक्षौद्रः+ मण्डलिविषे विशेषात्+अगदः+ हितः॥62॥
पञ्चवल्कवरायष्टीनागपुष्पैलवालुकम्।
जीवकर्षभकौ शीतं सिता पद्मकम्+उत्पलम्॥63॥
सक्षौद्रः+ हिमवान्+नाम हन्ति मण्डलिना विषम्।
लेपात्+श्वयथुवीसर्पविस्फोटज्वरदाहहा॥64॥
काश्मर्यं वटशुङ्गानि जीवकर्षभकौ सिता।
मञ्जिष्ठा मधुकं च+इति दष्टः+ मण्डलिना पिबेत्॥65॥
वंशत्वग्बीजकटुकापाटलीबीजनागरम्।
शिरीषबीजातिविषे मूलं गावेधुकं वचा॥66॥
पिष्टः+ गोवारिणा+अष्टाङ्गः+ हन्ति गोनसजं विषम्।
कटुकातिविषाकुष्ठगृहधूमहरेणुकाः॥67॥
सक्षौद्रव्योषतगरा घ्नन्ति राजीमतां विषम्।
निखनेत्+काण्डचित्रायां दशं यामद्वयं भुवि॥68॥
उद्धृत्य प्रच्छितं सर्पिः+धान्यम्+ऋद्भ्यां प्रलेपयेत्।
पिबेत्+पुराणं च घृतं वराचूर्णावचूर्णितम्॥69॥
जीर्णे विरिक्तः+ भुञ्जीत यवान्नं सूपसंस्कृतम्।
करवीरार्ककुसुममूललाङ्गलिकाकणाः॥70॥
कल्कयेत्+आरनालेन पाठामरिचसंयुताः।
एषः+ व्यन्तरदष्टानाम्+अगदः सार्वकार्मिकः॥71॥
शिरीषपुष्पस्वरसे सप्ताहं मरिचं सितम्।
भावितं सर्पदष्टानां पाननस्याञ्जने हितम्॥72॥
द्विपलं नतकुष्ठाभ्यां घृतक्षौद्रं चतुष्पलम्।
अपि तक्षकदष्टानां पानम्+एतत्+सुखप्रदम्॥73॥
अथ दर्वीकृतां वेगे पूर्वे विस्राव्य शोणितम्।
अगदं मधुसर्पिर्भ्यां संयुक्तं त्वरितं पिबेत्॥74॥
द्वितीये वमनं कृत्वा तद्वत्+एव+अगदं पिबेत्।
विषापहे प्रयुञ्जीत तृतीये+अञ्जननावने॥75॥
पिबेत्+चतुर्थे पूर्वोक्ता यवागूं वमने कृते।
षष्ठपञ्चमयोः शीतैः+दिग्धं सिक्तम्+अभीक्ष्णशः॥76॥
पाययेत्+वमनं तीक्ष्णं यवागूं च विषापहैः।
अगदं सप्तमे तीक्ष्णं युञ्ज्यात्+अञ्जननस्ययोः॥77॥
कृत्वा+अवगाढं शस्त्रेण मूर्ध्नि काकपदं ततः।

मांसं सरुधिरं तस्य चर्म वा तत्र निक्षिपेत्॥78॥
तृतीये वमितः पेयां वेगे मण्डलिनां पिबेत्।
अतीक्ष्णम्+अगदं षष्ठे गणं वा पद्मकादिकम्॥79॥
आद्ये+अवगाढं प्रच्छाय वेगे दष्टस्य राजिलैः।
अलाबुना हरेत्+रक्तं पूर्ववत्+च+अगदं पिबेत्॥80॥
षष्ठे+अञ्जनं तीक्ष्णतमम्+अवपीडं च योजयेत्।
अनुक्तेषु च वेगेषु क्रियां दर्वीकरोदिताम्॥81॥
गर्भिणीबालवृद्धेषु मृदुं, विध्येत्+सिरां न च।
त्वङ्नोह्वा निशे वक्रं रसः शार्दूलजः+ नखः॥82॥
तमालः केसरं शीतं पीतं तन्दुलवारिणा।
हन्ति सर्वविषाणि+एतत्+वज्रं वज्रम्+इव+असुरान्॥83॥
बिल्वस्य मूलं सुरसस्य पुष्पं फलं करञ्जस्य नतं सुराह्वम्।
फलत्रिकं व्योषनिशाद्वयं च वस्तस्य मूत्रेण सुसूक्ष्म्+अपिष्टम्॥84॥
भुजङ्गलूतोन्दुरवृश्चिकाद्यैः+विसूचिकाजीर्णगरज्वरैः+च।
आर्तान्+नरान् भूतविधर्षितान्+च स्वस्थीकरोति+अञ्जनपाननस्यैः॥85॥
प्रलेपाद्यैः+च निःशेषं दंशात्+अपि+उद्धरेत्+विषम्।
भूयः+ वेगाय जायेत शेषं दूषीविषाय वा॥86॥
विषापाये+अनिलं क्रुद्धं स्नेहादिभिः+उपाचरेत्।
तैलमद्यकुलत्थाम्लवर्ज्यैः पवननाशनैः॥87॥
पित्तं पित्तज्वरहरैः कषायस्नेहबस्तिभिः।
समाक्षिकेण वर्गेण कफम्+आरग्वधादिना॥88॥
सिता वैगन्धिकः+ द्राक्षा पयस्या मधुकं मधु।
पानं समन्त्रपूताम्बु प्रोक्षणं सान्त्वहर्षणम्॥89॥
सर्वाङ्गाभिहते युञ्ज्यात्+तथा शङ्काविषार्दिते।
कर्केतनं मरकतं वज्रं वारणमौक्तिकम्॥90॥
वैडूर्यं गर्दभमणिं पिचुकं विषमूषिकाम्।
हिमवद्गिरिसम्भूतां सोमराजीं पुनर्नवाम्॥91॥
तथा द्रोणां महाद्रोणां मानसीं सर्पजं मणिम्।
विषाणि विषशान्त्यर्थं वीर्यवन्ति च धारयेत्॥92॥
छत्री झर्झरपाणिः+च चरेत्+रात्रौ विशेषतः।
तत्+छायाशब्दवित्रस्ताः प्रणश्यन्ति भुजङ्गमाः॥93॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने सर्पविषप्रतिषेधः+ नाम षट्त्रिंशः+अध्यायाः॥36॥

सप्तत्रिंशः+अध्यायः।

अथ+अतः कीटलूतादिविषप्रतिषेधं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

सर्वाणाम्+एव विण्मूत्रशुक्राण्डशवकोथजाः।

दोषैः+व्यस्तैः समस्तैः+च युक्ताः कीटाः+चतुर्विधाः॥1॥

दष्टस्य कीटैः+वायव्यैः+दशस्तोदरुजोल्बणः।

आग्नेयैः+अल्पसंस्रावः+ दाहरागविसर्पवान्॥2॥

पक्वपीलुफलप्रख्यः खर्जूरसदृशः+अथवा।

कफाधिकैः+मन्दरुजः पक्वोदुम्बरसन्निभः॥3॥

स्रावाढ्यः सर्वलिङ्गः+तु विवर्ज्यः सान्निपातिकैः।

वेगाः+च सर्पवत्+शोफः+ वर्धिष्णुः+विस्ररक्तता॥4॥

शिरोक्षिगौरवं मूर्च्छा भ्रमः श्वासः+अतिवेदना।

सर्वेषां कर्णिका शोफः+ ज्वरः कण्डूररोचकः॥5॥

वृश्चिकस्य विषं तीक्ष्णम्+आदौ दहति वह्निवत्।

ऊर्ध्वम्+आरोहति क्षिप्तं दंशे पश्चात्+तु तिष्ठति॥6॥

दंशः सद्यः+अतिरुक् श्यावः+तुद्यते स्फुटति+इव च।

ते गवादिशकृत्कोथात्+दिग्धदष्टादिकोथतः॥7॥

सर्पकोथात्+च सम्भूता मन्दमध्यमहाविषाः।

मन्दाः पीताः सिताः श्यावा रूक्षाः कर्बुरमेचकाः॥8॥

रोमशा बहुपर्वाणः+ लोहिताः पाण्डुरोदराः।

धूम्रोदराः+त्रिपर्वाणः+ मध्याः+तु कपिलारुणाः॥9॥

पिशङ्गाः शबलाः+चित्राः शोणिताभा महाविषाः।

अग्न्याभा द्व्येकपर्वाणः+ रक्तासितसितोदराः॥10॥

तैः+दष्टः शूनरसनः स्तब्धगात्रः+ ज्वरार्दितः।

खैः+वमन् शोणितं कृष्णम्+इन्द्रियार्थान्+असंविदन्॥11॥

स्विद्यन् मूर्च्छन् विशुष्कास्यः+ विह्वलः+ वेदनातुरः।

विशीर्यमाणमांसः+च प्रायशः+ विजहाति+असून्॥12॥

उच्चिटिङ्गः+तु वक्त्रेण दशति+अभ्यधिकव्यथः।

साध्यतः+ वृश्चिकात् स्तम्भं शेफसः+ हृष्टरोमताम्॥13॥

करोति सेकम्+अङ्गानां दंशः शीताम्बुना+इव च

उष्ट्रधूमः सः+ एव+उक्तः+ रात्रिचारात्+च रात्रिकः॥14॥
वातपित्तोत्तराः कीटाः, श्लैष्मिकाः कणभोन्दुराः।
प्रायः+ वातोल्बणविषा वृश्चिकाः सोष्ट्रधूमकाः॥15॥
यस्य यस्य+एव दोषस्य लिङ्गाधिक्यं प्रतर्कयेत्।
तस्य तस्य+औषधैः कुर्यात्+विपरीतगुणैः क्रियाम्॥16॥
हृत्पीडोर्ध्वानिलस्तम्भः शिरायामः+अस्थिपर्वरुक्।
घूर्णनोद्वेष्टनं गात्रश्यावता वातिके विषे॥17॥
संज्ञानाशोष्णनिश्वासौ हृद्दाहः कटुकास्यता।
मांसावदरणं शोफः+ रक्तपीतः+च पैत्तिके॥18॥
छर्द्यरोचकहृल्लासप्रसेकोत्क्लेशपीनसैः।
सशैत्यमुखमाधुर्यैः+विद्याच्छलेष्माधिकं विषम्॥19॥
पिण्याकेन व्रणालेपः+तैलाभ्यङ्गः+च वातिके।
स्वेदः+ नाडीपुलाकाद्यैः+बृंहणः+च विधिः+हितः॥20॥
पैत्तिकं स्तम्भयेत्+सेकैः प्रदेहैः+च+अतिशीतलैः।
लेखनच्छेदनस्वेदवमनैः श्लैष्मिकं जयेत्॥21॥
कीटानां त्रिप्रकाराणां त्रैविध्येन क्रिया हिता।
स्वेदालेपनसेकान्+तु कोष्णान् प्रायः+अवचारयेत्॥22॥
अन्यत्र मूर्च्छितात्+दंशपाकतः कोथतः+अथवा।
नृकेशाः सर्षपाः पीता गुडः+ जीर्णः+च धूपनम्॥23॥
विषदंशस्य सर्वस्य काश्यपः परम्+अब्रवीत्।
विषघ्नं च विधिं सर्वं कुर्यात्+संशोधनानि च॥24॥
साधयेत्+सर्पवत्+दष्टान् विषोग्रैः कीटवृश्चिकैः।
तन्दुलीयकतुल्यांशां त्रिवृतां सर्पिषा पिबेत्॥25॥
याति कीटविषैः कम्पं न कैलास इव+अनिलैः।
क्षीरिवृक्षत्वगालेपः शुद्धे कीटविषापहः॥26॥
मुक्तालेपः+ वरः शोफतोददाहज्वरप्रणुत्।
वचा हिङ्गु विडङ्गानि सैन्धवं गजपिप्पली॥27॥
पाठा प्रतिविषा व्योषं काश्यपेन विनिर्मितम्।
दशाङ्गम्+अगदं पीत्वा सर्वकीटविषं जयेत्॥28॥
सद्यः+ वृश्चिकजं दंशं चक्रतैलेन सेचयेत्।
विदारिगन्धासिद्धेन कवोष्णेन+इतरेण वा॥29॥
लवणोत्तमयुक्तेन सर्पिषा वा पुनः पुनः।

सिञ्चेत्+कोष्णारनालेन सक्षीरलवणेन वा॥30॥
उपनाहः+ घृते भृष्टः कल्कः+अजाज्याः ससैन्धवः।
आदंशं स्वेदितं चूर्णैः प्रच्छाय प्रतिसारयेत्॥31॥
रजनीसैन्धवव्योषशिरीषफलपुष्पजैः।
मातुलुङ्गाम्लगोमूत्रपिष्टं च सुरसाग्रजम्॥32॥
लेपः सुखोष्णः+च हितः पिण्याकः+ गोमयः+अपि वा।
पाने सर्पिः+मधुयुतं क्षीरं वा भूरिशर्करम्॥33॥
पारापतशकृत् पथ्या तगरं विश्वभेषजम्।
बीजपूररसोन्मिश्रः परमः+ वृश्चिकागदः॥34॥
सशैवलोष्ट्रदंष्ट्रा च हन्ति वृश्चिकजं विषम्।
हिङ्गुना हरितालेन मातुलुङ्गरसेन च॥35॥
लेपाञ्जनाभ्यां गुटिका परमं वृश्चिकापहा।
करञ्जार्जुनशेलूनां कटभ्याः कुटजस्य च॥36॥
शिरीषस्य च पुष्पाणि मस्तुना दंशलेपनम्।
यः+ मुह्यति प्रश्वसिति प्रलपति+उग्रवेदनः॥37॥
तस्य पथ्यानिशाकृष्णामञ्जिष्ठातिविषोषणम्।
सालाबुवृन्तं वार्ताकरसपिष्टं प्रलेपनम्।
सर्वत्र च+उग्रालिविषे पाययेत्+दधिसर्पिषी।
विध्येत्+सिरां विदध्यात्+च वमनाञ्जननावनम्।
उष्णस्निग्धाम्लमधुरं भोजनं च+अनिलापहम्॥39॥
नागरं गृहकपोतपुरीषं बीजपूरकरसः+ हरितालम्।
सैन्धवं च विनिहन्ति+अगदः+अयं लेपतः+अलिकुलजं विषम्+आशु॥40॥
अन्ते वृश्चिकदष्टानां समुदीर्णे भृशं विषे।
विषेण+आलेपयेत्+दंशम्+उच्चिटिङ्गे+अपि+अयं विधिः॥41॥
नागपुरीषच्छत्रं रोहिषमूलं च शेलुतोयेन।
कुर्यात्+गुटिकां लेपादियमलिविषनाशनी श्रेष्ठा॥42॥
अर्कस्य दुग्धेन शिरीषबीजं त्रिः+भावितं पिप्पलिचूर्णमिश्रिम्।
एषः+अगदः+ हन्ति विषाणि कीटभुजङ्गलूतोन्दुरवृश्चिकानाम्॥43॥
शिरीषपुष्पं सकरञ्जबीजं काश्मीरजं कुष्ठमनःशिले च।
एषः+अगदः+ रात्रिकवृश्चिकानां संक्रान्तिकारी कथितः+ जिनेन॥44॥
कीटेभ्यः+ दारुणतरा लूताः षोडशता जगुः।
अष्टाविंशतिः+इति+एके ततः+अपि+अन्ये तु भूयसीः॥46॥

सहस्ररश्म्यनुचरा वदन्ति+अन्ये सहस्रशः।
बहूपद्रवरूपा तु लूतैका+एव विषात्मिका॥46॥
रूपाणि नामतः+तस्य दुर्ज्ञेयानि+अतिसङ्करात्।
न+अस्ति स्थानव्यवस्था च दोषतः+अतः प्रचक्षते॥47॥
कृच्छ्रसाध्या पृथक्+दोषैः+असाध्या निचयेन सा।
तत्+दंशः पैत्तिकः+ दाहतृट्स्फोटज्वरमोहवान्॥48॥
भृशोष्मा: रक्तपीताभः क्लेदी द्राक्षाफलोपमः।
श्लैष्मिकः कठिनः पाण्डुः परूषकफलाकृतिः॥49॥
निद्रां शीतज्वरं कासं कण्डूं च कुरुते भृशम्।
वातिकः परुषः श्यावः पर्वभेदज्वरप्रदः॥50॥
तत्+विभागं यथास्वं च दोषलिङ्गैः+विभावयेत्।
असाध्यायां तु हृन्मोहश्वासहिध्माशिरोग्रहाः॥51॥
श्वेतपीतासितारक्ताः पिटिकाः श्वयथूद्भवः।
वेपथुः+वमथुः+दाहः+तृडान्ध्यं वक्रनासता॥52॥
श्यावौष्ठवक्त्रदन्तत्वं पृष्ठग्रीवौ+अभञ्जनम्।
पक्वजम्बूसवर्णं च दंशात्+स्रवति शोणितम्॥53॥
सर्वा+अपि सर्वजा प्रायः+ व्यपदेशः+तु भूयसा।
तीक्ष्णमध्यावरत्वेन सा त्रिधा हन्ति+उपेक्षिता॥54॥
सप्ताहेन दशाहेन पक्षेण च परं क्रमात्।
लूतादंशः+च सर्वः+अपि दद्रुमण्डलसन्निभः॥55॥
सितः+असितः+अरुणः पीतः श्यावः+ वा मृदुः+उन्नतः।
मध्ये कृष्णः+अथवा श्यावः पर्यन्ते जालकावृतः॥56॥
विसर्पवान्+शोफयुतः+तप्यते बहुवेदनः।
ज्वराशुपाकविक्लेदकोथावदरणान्वितः॥57॥
क्लेदेन यत्+स्पृशति+अङ्गं तत्र+अपि कुरुते व्रणम्।
श्वासदंष्ट्राशकृन्मूत्रशुक्रलालानखार्तवैः॥58॥
अष्टाभिः+उद्वमति+एषा विषं वक्त्रात्+विशेषतः।
लूतां नाभेः+दशति+ऊर्ध्वम्+ऊर्ध्वं च+अधः+च कीटकाः॥59॥
तत्+दूषितं च वस्त्रादि देहे पृक्तं विकारकृत्।
दिनार्धं लक्ष्यते न+एव दंशः+ लूताविषोद्भवः॥60॥
सूचीव्यधवत्+आभाति ततः+असौ प्रथमे+अहनि।
अव्यक्तवर्णः प्रचलः किञ्चित्+कण्डूरुजान्वितः॥61॥

द्वितीये+अभ्युन्नतः+अन्तेषु पिटिकैः+इव वा+आचितः।
व्यक्तवर्णः+ नतः+ मध्ये कण्डूमान् ग्रन्थिसन्निभः॥62॥
तृतीये सज्वरः+ रोमहर्षकृत्+रक्तमण्डलः।
शरावरूपः+तोदाढ्यः+ रोमकूपेषु सास्रवः॥63॥
महान्+चतुर्थे श्वयथुः+तापश्वासभ्रमप्रदः।
विकारान् कुरुते तान्+तान् पञ्चमे विषकोपजान्॥64॥
षष्ठे व्याप्नोति मर्माणि सप्तमे हन्ति जीवितम्।
इति तीक्ष्णं विषं, मध्यं हीनं च विभजेत्+अतः॥65॥
एकविंशतिरात्रेण विषं शाम्यति सर्वथा।
अथ+आशु लूतादष्टस्य शस्त्रेण+अदंशम्+उद्धरेत्॥66॥
दहेत्+च जाम्बवौष्ठाद्यैः+न तु पित्तोत्तरं दहेत्।
कर्कशं भिन्नरोमाणं मर्मसन्ध्यादिसंश्रितम्॥67॥
प्रसृतं सर्वतः+ दंशं न छिन्दीत दहेत्+न च।
लेपयेत्+दग्धम्+अगदैः+मधुसैन्धवसंयुतैः॥68॥
सुशीतैः सेचयेत्+च+अनु कषायैः क्षीरिवृक्षजैः।
सर्वतः+अपहरेत्+रक्तं शृङ्गाद्यैः सिरया+अपि वा॥69॥
सेकलेपाः+ततः शीता बोधिश्लेष्मातकाक्षकैः।
फलिनीद्विनिशाक्षोद्रसर्पिर्भिः पद्मकाह्वयः॥70॥
अशेषलूताकीटानाम्+अगदः सार्वकार्मिकः।
हरिद्राद्वयपत्तङ्गमञ्जिष्ठानतकेसरैः॥71॥
सक्षौद्रसर्पिः पूर्वस्मात्+अधिकः+चम्पकाह्वयः।
तद्वत्+गोमयनिष्पीडशर्कराघृतमाक्षिकैः॥72॥
अपामार्गमनोह्वालदार्वीध्यामकगैरिकैः।
नतैलाकुष्ठमरिचयष्ट्याह्वघृतमाक्षिकैः॥73॥
अगदः+ मन्दरः+ नाम तथा+अन्यः+ गन्धमादनः।
नतरोध्रवचाकट्वीपाठैलापत्रकुङ्कुमैः॥74॥
विषघ्नं बहुदोषेषु प्रयुञ्जीत विशोधनम्।
यष्ट्याह्वमदनाङ्कोल्लजालिनीसिन्दुवारिकाः॥75॥
कफे ज्येष्ठाम्बुना पीत्वा विषम्+आशु समुद्वमेत्।
शिरीषपत्रत्वङ्मूलफलं वा+अङ्कोल्लमूलवत्॥76॥
विरेचयेत्+च त्रिफलानीलिनीत्रिवृतादिभिः।
निवृत्ते दाहशोफादौ कर्णिका पातयेत्+ व्रणात्॥77॥

कुसुम्भपुष्पं गोदन्तः स्वर्णक्षीरी कपोतविट्।
त्रिवृता सैन्धवं दन्ती कर्णिकापातनं, तथा॥78॥
मूलम्+उत्तरवारुण्या वंशनिर्लेखसंयुतम्।
तद्वत्+च सैन्धवं कुष्ठं दन्तीकटुकदौग्धिकम्॥79॥
राजकोशातकीमूलं, किण्वः+ वा मथितोद्भवः।
कर्णिकापातसमये बृंहयेत्+च विषापहैः॥80॥
स्नेहकार्यम्+अशेषं च सर्पिषा+एव समाचरेत्।
विषस्य वृद्धये तैलम्+अग्नेः+इव तृणोलुपम्॥81॥
ह्रीबेरवैकङ्कतगोपकन्यामुस्ताशमीचन्दनटिण्टुकानि।
शैवालनीलोत्पलवक्रयष्टीत्वङ्नाकुलीपद्मकराठमध्यम्॥82॥
रजनीघनसर्पलोचनाकणशुण्ठीकणमूलचित्रकाः।
वरुणागुरुबिल्वपाटलीपिचुमन्दामयशेलुकेसरम्॥83॥
बिल्वचन्दननतोत्पलशुण्ठीपिप्पलीनिचुलवेतसकुष्ठम्।
शुक्तिशाकवरपाटलिभार्गीसिन्दुवारकरघाटवराङ्गम्॥84॥
पित्तकफानिललूताः पानाञ्जननस्यलेपसेकेन।
अगदवरा वृत्तस्थाः कुगतीः+इव वारयन्ति+एते॥85॥
रोध्रं सेव्यं पद्मकं पद्मरेणुः कालीयाख्यं चन्दनं यत्+च रक्तम्।
कान्तापुष्पं दुग्धिनीका मृणालं लूताः सर्वा घ्नन्ति सर्वक्रियाभिः॥86॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने
कीटलूतादिविषप्रतिषेधः+ नाम सप्तत्रिंशः+अध्यायः॥37॥
अष्टत्रिंशः+अध्यायः।
अथ+अतः+ मूषिकालर्कविषप्रतिषेधं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
लालनः+चपलः पुत्रः+ हसिराः+चिक्किरः+अजिरः।
कषायत्+अन्तः कुलकः कोकिलः कपिलः+असितः॥1॥
अरुणः शबलः श्वेतः कपोतः पलितोन्दुरः।
छुच्छुन्दरः+ रसालाख्यः+ दशाष्टौ च+इति मूषिकाः॥2॥
शुक्रं पतति यत्र+एषां शुक्रदिग्धैः स्पृशन्ति वा।
यत्+अङ्गम्+अङ्गैः+तत्र+अस्रे दूषिते पाण्डुतां गते॥3॥
ग्रन्थयः श्वयथुः कोठः+ मण्डलानि भ्रमः+अरुचिः।
शीतज्वरः+अतिरुक्सादः+ वेपथुः पर्वभेदनम्॥4॥
रोमहर्षः स्रुतिः+मूर्च्छा दीर्घकालानुबन्धनम्।

श्लेष्मानुबद्धबह्वाखुपोतकच्छर्दनं सतृट्॥5॥
व्यवायि+आखुविषं कृच्छ्रं भूयः+ भूयः+च कुप्यति।
मूर्च्छाङ्गशोफवैवर्ण्यक्लेदशब्दाश्रुतिज्वराः॥6॥
शिरोगुरुत्वं लालासृक्छर्दिः+च+असाध्यलक्षणम्।
शूनबस्तिं विवर्णौष्ठम्+आख्वाभैः+ग्रन्थिभिः+चितम्॥7॥
छुच्छुन्दरसगन्धं च वर्जयेत्+आखुदूषितम्।
शुनः श्लेष्मोल्बणां दोषाः संज्ञां संज्ञावहाश्रिताः॥8॥
मुष्णन्तः कुर्वते क्षोभं धातूनाम्+अतिदारुणम्।
लालावानन्धबधिरः सर्वतः सः+अभिधावति॥9॥
स्रस्तपुच्छहनुस्कन्धः शिरोदुःखी नताननः।
दंशः+तेन विदष्टस्य सुप्तः कृष्णं क्षरति+असृक्॥10॥
हृच्छिरोरुग्ज्वरस्तम्भतृष्णामूर्च्छोद्भवः+अनु च।
अनेन+अन्ये+अपि बोद्धव्या व्याला दंष्ट्राप्रहारिणः॥11॥
शृगालाश्वतराश्वर्क्षद्वीपिव्याघ्रवृकादयः।
कण्डूनिस्तोदवैवर्ण्यसुप्तिक्लेदज्वरभ्रमाः॥12॥
विदाहरागरुक्पाकशोफग्रन्थिविकुञ्चनम्।
दंशावदरणं स्फोटाः कर्णिका मण्डलानि च॥13॥
सर्वत्र सविषे लिङ्गं, विपरीतं तु निर्विषे।
दष्टः+ येन तु तत्+चेष्टारुतं कुर्वन् विनश्यति॥14॥
पश्यन्+तम्+एव च+अकस्मात्+आदर्शसलिलादिषु।
यः+अद्भ्यः+त्रस्येत्+अदष्टः+अपि शब्दसंस्पर्शदर्शनैः॥15॥
जलसन्त्रासनामानं दष्टं तम्+अपि वर्जयेत्।
आखुना दष्टमात्रस्य दंशं काण्डेन दाहयेत्॥16॥
दर्पणेन+अथवा, तीव्ररुजा स्यात्+कर्णिका+अन्यथा।
दग्धं विस्रावयेत्+हंसं प्रच्छितं च प्रलेपयेत्॥17॥
शिरीषरजनीवक्रकुङ्कुमामृतवल्लिभिः।
अगारधूममञ्जिष्ठारजनीलवणोत्तमैः॥18॥
लेपः+ जयति+आखुविषं कर्णिकायाः+च पातनः।
ततः+अम्लैः क्षालयित्वा+अनु तोयैः+अनु च लेपयेत्॥19॥
पालिन्दीश्वेतकटभीबिल्वमूलगुडूचिभिः।
अन्यैः+च विषशोफघ्नैः सिरां वा मोक्षयेत्+द्रुतम्॥20॥
छर्दनं नीलिनीक्वाथैः शुकाख्याङ्कोल्लयोः+अपि।

कोशातक्याः शुकाख्यायाः फलं जीमूतकस्य च॥21॥
मदनस्य च सञ्चूर्ण्य दध्ना पीत्वा विषं वमेत्।
वचामदनजीमूतकुष्ठं वा मूत्रपेषितम्॥22॥
पूर्वकल्पेन पातव्यं सर्वोन्दुरविषापहम्।
विरेचनं त्रिवृन्नीलीत्रिफलाकल्क इष्यते॥23॥
शिरोविरोचने सारः शिरीषस्य फलानि च।
अञ्जनं गोमयरसः+ व्योषसूक्ष्मरजोन्वितः॥24॥
कपित्थगोमयरसः+ मधुमान्+अवलेहनम्।
तन्दुलीयकमूलेन सिद्धं पाने हितं घृतम्॥25॥
द्विनिशाकटभीरक्तायष्ट्याह्वैः+वा+अमृतान्वितैः।
आस्फोतमूलसिद्धं वा, पञ्चकापित्थम्+एव वा॥26॥
सिन्दुवारं नतं शिग्रुबिल्वमूलं पुनर्नवा।
वचाश्वदंष्ट्राजीमूतम्+एषां क्वाथं समाक्षिकम्॥27॥
पिबेत्+शाल्योदनं दध्नां भुञ्जानः+ मूषिकार्दितः।
तक्रेण शरपुङ्खाया बीजं सञ्चूर्ण्य वा पिबेत्॥28॥
अङ्कोल्लमूलकल्कः+ वा बस्तमूत्रेण कल्कितः।
पानालेपनयोः+युक्तः सर्वाखुविषनाशनः॥29॥
कपित्थमध्यतिलकतिलाङ्कोल्लजटाः पिबेत्।
गवां मूत्रेण, पयसा मञ्जरीं तिलकस्य वा॥30॥
अथवा सैर्यकात्+मूलं सक्षौद्रं तन्दुलाम्बुना।
कटुकालाबुविन्यस्तं पीतं वा+अम्बु निशोषितम्॥31॥
सिन्दुवारस्य मूलानि बिडालास्थि विषं नतम्।
जलपिष्टः+अगदः+ हन्ति नस्याद्यैः+आखुजं विषम्॥32॥
सशेषं मूषिकविषं प्रकुप्यति+अभ्रदर्शने।
यथायथं वा कालेषु दोषाणां वृद्धिहेतुषु॥33॥
तत्र सर्वे यथावस्थं प्रयोज्याः स्युः+उपक्रमाः।
यथास्वं ये च निर्दिष्टाः+तथा दूषीविषापहाः॥34॥
दंशं तु+अलर्कदष्टस्य दग्धम्+उष्णेन सर्पिषा।
प्रदिह्यात्+अगदैः+तैः+तैः पुराणं च घृतं पिबेत्॥35॥
अर्कक्षीरयुतं च+अस्य योज्यम्+आशु विरेचनम्।
अङ्कोल्लोत्तरमूलाम्बु त्रिपलं सहविःपलम्॥36॥
पिबेत्+सधत्तूरफलां श्वेतां वा+अपि पुनर्नवाम्।

ऐकध्यं पललं तैलं रूपिकायाः पयः+ गुडः॥37॥

भिनत्ति विषम्+आलर्कं घनवृन्दम्+इव+अनिलः।

समन्त्रं सौषधीरत्नं स्नपनं च प्रयोजयेत्॥38॥

चतुष्पाद्भिः+द्विपाद्भिः+वा नखदन्तपरिक्षतम्।

शूयते पच्यते रागज्वरस्रावरुजान्वितम्॥39॥

सोमवल्कः+अश्वकर्णः+च गोजिह्वा हंसपादिका।

रजन्यौ गैरिकं लेपः+ नखदन्तविषापहः॥40॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने मूषिकालर्कविषप्रतिषेधः+ नाम+अष्टत्रिंशः+अध्यायः॥38॥

एकोनचत्वारिंशः+अध्यायः।

अथ+अतः+ रसायनविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

दीर्घम्+आयुः स्मृतिं मेधाम्+आरोग्यं तरुणं वयः।

प्रभावर्णस्वरौदार्यं देहेन्द्रियबलोदयम्॥1॥

वाक्सिद्धिं वृषतां कान्तिम्+अवाप्नोति रसायनात्।

लाभोपायः+ हि शस्तानां रसादीनां रसायनम्॥2॥

पूर्वे वयसि मध्ये वा तत्प्रयोज्यं जितात्मनः

स्निग्धस्य स्रुतरक्तस्य विशुद्धस्य च सर्वथा॥3॥

अविशुद्धे शरीरे हि युक्तः+ रासायनः+ विधिः।

वाजीकरः+ वा मलिने वस्त्रे रङ्ग इव+अफलः॥4॥

रसायनानां द्विविधं प्रयोगम्+ऋषयः+ विदुः।

कुटीप्रावेशिकं मुख्यं वातातपिकम्+अन्यथा॥5॥

पुरे प्राप्य+उपकरणे हर्म्यनिर्वातनिर्भये।

दिशि+उदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम्॥6॥

धूमातपरजोव्यालस्त्रीमूर्खाद्यविलङ्घिताम्।

सज्जवैद्योपकरणां सुमृष्टां कारयेत्+कुटीम्॥7॥

अथ पुण्ये+अह्नि सम्पूज्य पूज्यान्+तां प्रविशेत्+शुचिः।

तत्र संशोधनैः शुद्धः सुखी जातबलः पुनः॥8॥

ब्रह्मचारी धृतियुतः श्रद्दधानः+ जितेन्द्रियः।

दानशीलदयासत्यव्रतधर्मपरायणः॥9॥

देवतानुस्मृतौ युक्तः+ युक्तस्वप्नप्रजागरः।

प्रियौषधः पेशलवागारभेत रसायनम्॥10॥

हरीतकीम्+आमलकं सैन्धवं नागरं वचाम्।
हरिद्रां पिप्पलीं वेल्लं गुडं च+उष्णाम्बुना पिबेत्॥11॥
स्निग्धस्विन्नः+ नरः पूर्वं, तेन साधु विरिच्यते।
ततः शुद्धशरीराय कृतसंसर्जनाय च॥12॥
त्रिरात्रं पञ्चरात्रं वा सप्ताहं वा घृतान्वितम्।
दद्यात्+यावकम्+आ शुद्धेः पुराणशकृतः+अथवा॥13॥
इत्थं संस्कृतकोष्ठस्य रसायनम्+उपाहरेत्।
यस्य यत्+यौगिकं पश्येत्+सर्वम्+आलोच्य सात्म्यवित्॥14॥
पथ्यासहस्रं त्रिगुणधात्रीफलसमन्वितम्।
पञ्चानां पञ्चमूलानां सार्धं पलशतद्वयम्॥15॥
जले दशगुणे पक्त्वा दशभागस्थिते रसे।
आपोथ्य कृत्वा व्यस्थीनि विजयामलकानि+अथ॥16॥
विनीय तस्मिन्+निर्यूहे योजयेत्+कुडवांशकम्।
त्वगेलामुस्तरजनीपिप्पल्यगुरुचन्दनम्॥17॥
मण्डूकपर्णीकनकशङ्खपुष्पीवचाप्लवम्।
यष्ट्याह्वयं विडङ्गं च चूर्णितं तुलया+अधिकम्॥18॥
सितोपलार्धभारं च पात्राणि त्रीणि सर्पिषः।
द्वे च तैलात् पचेत्+सर्वं तत्+अग्नौ लेहतां गतम्॥19॥
अवतीर्णं हिमं युञ्ज्यात्+विंशैः क्षौद्रशतैः+त्रिभिः।
ततः खजेन मथितं निदध्यात्+ घृतभाजने॥20॥
या न+उपरुन्ध्यात्+आहारम्+एकं मात्रा+अस्य सा स्मृता।
षष्टिकः पयसा च+अत्र जीर्णे भोजनम्+इष्यते॥21॥
वैखानसा वालखिल्याः+तथा च+अन्ये तपोधनाः।
ब्रह्मणा विहितं धन्यम्+इदं प्राश्य रसायनम्॥22॥
तन्द्राश्रमक्लमवलीपलितामयवर्जिताः।
मेधास्मृतिबलोपेता बभूवुः+अमितायुषः॥23॥
अभयामलकसहस्रं निरामयं पिप्पलीसहस्रयुतम्।
तरुणपलाशक्षारद्रवीकृतं स्थापयेत्+भाण्डे॥24॥
उपयुक्ते च क्षारे छायासंशुष्कचूर्णितं योज्यम्।
पादांशेन सितायाः+चतुर्गुणाभ्यां मधुघृताभ्याम्॥25॥
तत्+घृतकुम्भे भूमौ निधाय षण्माससंस्थम्+उद्धृत्य।
प्राह्णे प्राश्य यथा+अनलम्+उचिताहारः+ भवेत्+सततम्॥26॥

इति+उपयुञ्ज्य+अशेषं वर्षशतम्+अनामयः+ जरारहितः।
जीवति बलपुष्टिवपुः स्मृतिमेधाद्यन्वितः+ विशेषेण॥27॥
नीरुजार्द्रपलाशस्य छिन्ने शिरसि तत्क्षतम्।
अन्तर्द्विहस्तं गम्भीरं पूर्यमामलकैः+नवैः॥28॥
आमूलं वेष्टितं दर्भैः पद्मिनीपङ्कलेपितम्।
आदीप्य गोमयैः+वन्यैः+निर्वाते स्वेदयेत्+ततः॥29॥
स्विन्नानि तानि+आमलकानि तृप्त्या खादेत्+नरः क्षौद्रघृतान्वितानि।
क्षीरं शृतं च+अनु पिबेत्+प्रकामं तेन+एव वर्तेत च मासम्+एकम्॥30॥
वर्ज्यानि वर्ज्यानि च तत्र यत्नात् स्पृश्यं च शीताम्बु न पाणिना+अपि।
एकादशाहे+अस्य ततः+ व्यतीते पतन्ति केशा दशना नखाः+च॥31॥
अथ+अल्पकैः+एव दिनैः सुरूपः स्त्रीषु+अक्षयः कुञ्जरतुल्यवीर्यः।
विशिष्टमेधाबलबुद्धिसत्त्वः+ भवति+असौ वर्षसहस्रजीवी॥32॥
दशमूलबलामुस्तजीवकर्षभकोत्पलम्।
पर्णिन्यौ पिप्पली शृङ्गी मेदा तामलकी त्रुटिः॥33॥
जीवन्ती जोङ्गकं द्राक्षा पौष्करं चन्दनं शठी।
पुनर्नवर्द्धिकाकोलीकाकनासामृताद्वयम्॥34॥
विदारी वृषमूलं च तत्+एकध्यं पलोन्मितम्।
जलद्रोणे पचेत्+पञ्च धात्रीफलशतानि च॥35॥
पादशेषं रसं तस्मात्+व्यस्थीनि+आमलकानि च।
गृहीत्वा भर्जयेत्+तैलघृतात्+ द्वादशभिः पलैः॥36॥
मत्स्यण्डिकातुलार्धेन युक्तं तत्+लेहवत् पचेत्।
स्नेहार्धं मधु सिद्धे तु तवक्षीर्याः+चतुष्पलम्॥37॥
पिप्पल्या द्विपलं दद्यात्+चतुर्जातं कणार्धितम्।
अतः+अवलेहयेत्+मात्रां कुटीस्थः पथ्यभोजनः॥38॥
इति+एषः च्यवनप्राशः+ यं प्राश्य च्ववनः+ मुनिः।
जराजर्जरितः+अपि+आसीत्+नारीनयननन्दनः॥39॥
कासं श्वासं ज्वरं शोषं हृद्रोगं वातशोणितम्।
मूत्रशुक्राश्रयान् दोषान् वैस्वर्यं च व्यपोहति॥40॥
बालवृद्धक्षतक्षीणकृशानाम्+अङ्गवर्धनः।
मेधां स्मृतिं कान्तिम्+अनामयत्वम्+आयुः प्रकर्षं पवनानुलोम्यम्।
स्त्रीषु प्रहर्षः बलम्+इन्द्रियाणाम्+अग्नेः+च कुर्यात्+विधिना+उपयुक्तः॥41॥
मधुकेन तवक्षीर्या पिप्पल्या सिन्धुजन्मना।

पृथक्+लोहैः सुवर्णेन वचया मधुसर्पिषा॥42॥

सितया वा समा युक्ता समायुक्ता रसायनम्।

त्रिफला सर्वरोगघ्नी मेधायुःस्मृतिबुद्धिदा॥43॥

मण्डूकपर्ण्याः स्वरसं यथाग्नि क्षीरेण यष्टीमधुकस्य चूर्णम्।

रसं गुडूच्याः सहमूलपुष्प्याः कल्कं प्रयुञ्जीत च शङ्खपुष्प्याः॥44॥

आयुष्प्रदान्यामयनाशनानि बलाग्निवर्णस्वरवर्धनानि।

मेध्यानि च+एतानि रसायनानि मेध्या विशेषेण तु शङ्खपुष्पी॥45॥

नलदं कटुरोहिणी पयस्या मधुकं चन्दनसारिवोग्रगन्धाः।

त्रिफला कटुकत्रयं हरिद्रे सपटोलं लवणं च तैः सुपिष्टैः॥46॥

त्रिगुणेन रसेन शङ्खपुष्प्याः सपयस्कं घृतनल्वणं विपक्वम्

उपयुज्य भवेत्+जडः+अपि वाग्मी श्रुतधारी प्रतिभानवानरोगः॥47॥

पेष्यैः+मृणालबिसकेसरपत्रबीजैः सिद्धं सहेमशकलं पयसा च सर्पिः।

पञ्चारविन्दम्+इति तत्प्रथितं पृथिव्यां प्रभ्रष्टपौरुषबलप्रतिभैः+निषेव्यम्॥48॥

यन्नालकन्ददलकेसरवत्+विपक्वं नीलोत्पलस्य तत्+अपि प्रथितं द्वितीयम्।

सर्पिः+चतुष्कुवलयं सहिरण्यपत्रं मेध्यं गवाम्+अपि भवेत् किमु मानुषाणाम्॥49॥

ब्राह्मीवचासैन्धवशङ्खपुष्पीमत्स्याक्षकब्रह्मसुवर्चलैन्द् र्यः।

वैदेहिका च त्रियवाः पृथक्+स्युः+यवौ सुवर्णस्य तिलः+ विषस्य॥50॥

सर्पिषः+च पलम्+एकतः+ एतत्+योजयेत्+परिणते च घृताढ्यम्।

भोजनं समधु वत्सरम्+एवं शीलयन्+अधिकधीस्मृतिमेधः॥51॥

अतिक्रान्तजराव्याधितन्द्रालस्यश्रमक्लमः।

जीवति+अब्दशतं पूर्णं श्रीतेजः कान्तिदीप्तिमान्॥52॥

विशेषतः कुष्ठकिलासगुल्मविषज्वरोन्मादगरोदराणि।

अथर्वमन्त्रादिकृताः+च कृत्याः शाम्यन्ति+अनेन+अतिबलाः+च वाताः॥53॥

शरन्मुखे नागबलां पुष्ययोगे समुद्धरेत्।

अक्षमात्रं ततः+ मूलात्+चूर्णितात्+पयसा पिबेत्॥54॥

लिह्यात्+मधुघृताभ्यां वा क्षीरवृत्तिः+अनन्नभुक्।

एवं वर्षप्रयोगेण जीवेत्+वर्षशतं बली॥55॥

फलोन्मुखः+ गोक्षुरकः समूलश्छायाविशुष्कः सुविचूर्णिताङ्गः।

सुभावितः स्वेन रसेन तस्मात्+मात्रां परां प्रासृतिकीं पिबेत्+यः॥56॥

क्षीरेण तेन+एव च शालिम्+अश्नन् जीर्णे भवेत्+स द्वितुलोपयोगात्।

शक्ताः सुरूपः सुभगः शतायुः कामी ककुद्मान्+इव गोकुलस्थः॥57॥

वाराहीकन्दम्+आर्द्रार्द्रं क्षीरेण क्षीरपः पिबेत्।

मासं निरन्नः+ मासं च क्षीरान्नादः+ जरां जयेत्॥58॥
तत्+कन्दश्लक्ष्णचूर्णं वा स्वरसेन सुभावितम्।
घृतक्षौद्रप्लुतं लिह्यात्+तत्+पक्वं वा घृतं पिबेत्॥59॥
तद्वत्+विदार्यतिबलाबलामधुकवायसीः।
श्रेयसीश्रेयसीयुक्तापथ्याधात्रीस्थिरामृताः॥60॥
मण्डूकीशङ्खकुसुमावाजिगन्धाशतावरीः।
उपयुञ्जीत मेधाधीवयः स्थैर्यबलप्रदाः॥61॥
यथास्वं चित्रकः पुष्पैः+ज्ञेयः पीतसितासितैः।
यथा+उत्तरं सः+ गुणवान् विधिना च रसायनम्॥62॥
छायाशुष्कं ततः+ मूलं मासं चूर्णीकृतं लिहन्।
सर्पिषा मधुसर्पिर्भ्यां पिबन् वा पयसा यतिः॥63॥
अम्भसा वा हितान्नाशी शतं जीवति नीरुजः।
मेधावी बलवान् कान्तः+ वपुष्मान् दीप्तपावकः॥64॥
तैलेन लीढः+ मासेन वातान् हन्ति सुदुस्तरान्।
मूत्रेण श्वित्रकुष्ठानि पीतः+तक्रेण पायुजान्॥65॥
भल्लातकानि पुष्टानि धान्यराशौ निधापयेत्।
ग्रीष्मे संगृह्य हेमन्ते स्वादुस्निग्धहिमैः+वपुः॥66॥
संस्कृत्य तानि+अष्टगुणे सलिले+अष्टौ विपाचयेत्।
अष्टांशशिष्टं तत्+क्वाथं सक्षीरं शीतलं पिबेत्॥67॥
वर्धयेत्+प्रत्यहं च+अनु तत्र+एकैकम्+अरुष्करम्।
सप्तरात्रत्रयं यावत् त्रीणि त्रीणि ततः परम्॥68॥
आचत्वारिंशतः+तानि ह्रासयेत्+वृद्धिवत्+ततः।
सहस्रम्+उपयुञ्जीत सप्ताहैः+इति सप्तभिः॥69॥
यन्त्रितात्मा घृतक्षीरशालिषष्टिकभोजनः।
तद्वत्+त्रिगुणितं कालं प्रयोगान्ते+अपि च+आचरेत्॥70॥
आशिषः+ लभते+अपूर्वा वह्नेः+दीप्तिं विशेषतः।
प्रमेहकृमिकुष्टार्शोमेदोदोषविवर्जितः॥71॥
पिष्टस्वेदनम्+अरुजैः पूर्णं भल्लातकैः+विजर्जरितैः।
भूमिनिखाते कुम्भे प्रतिष्ठितं कृष्णमृत्+लिप्तम्॥72॥
परिवारितं समन्तात्+पचेत्+ततः+ गोमयाग्निना मृदुना।
तत्+स्वरसः+ यश्च्यवते गृह्णीयात्+तं दिने+अन्यस्मिन्॥73॥
अमुम्+उपयुज्य स्वरसं मध्वष्टमभागिकं द्विगुणसर्पः।

पूर्वविधियन्त्रितात्मा प्राप्नोति गुणान् सः+ तान्+एव॥74॥
पुष्टानि पाकेन परिच्युतानि भल्लातकान्याढकसम्मितानि।
घृष्ट्वेष्टिकाचूर्णकणैः+जलेन प्रक्षाल्य संशोष्य च मारुतेन॥75॥
जर्जराणि विपचेत्+जलकुम्भे पादशेषधृतगालितशीतम्।
तत्+रसं पुनः+अपि श्रपयेत क्षीरकुम्भसहितं चरणस्थे॥76॥
सर्पिः पक्वं तत्र तुल्यप्रमाणं युञ्ज्यात्+स्वेच्छं शर्कराया रजोभिः।
एकीभूतं तत्+खजक्षोभणेन स्थाप्यं धान्ये सप्तरात्रं सुगुप्तम्॥77॥
तम्+अमृतरसपाकं यः प्रगे प्राशमश्नन् अनु पिबति यथेष्टं वारि दुग्धं रसं वा।
स्मृतिमतिबलमेधासत्त्वसारैः+उपेतः कनकनिचयगौरः सः+अश्नुते दीर्घमायुः॥78॥
द्रोणे+अम्भसः+ व्रणकृतां त्रिशतात्+विपक्वात् क्वाथाढके पलसमैः+तिलतैलपात्रम्।
तिक्ताविषाद्वयवरागिरिजन्मताक्ष्यैः सिद्धं परं निखिलकुष्ठनिबर्हणाय॥79॥
सहामलकशुक्तिभिः+दधिसरेण तैलेन वा गुडेन पयसा घृतेन यवसक्तुभिः+वा सह।
तिलेन सह माक्षिकेण पललेन सूपेन वा वपुष्करम्+अरुष्करं परममेध्यम्+आयुष्करम्॥80॥
भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च।
भवन्ति+अमृतकल्पानि प्रयुक्तानि यथाविधि॥81॥
कफजः+ न सः+ रोगः+अस्ति न विबन्धः+अस्ति कश्चन।
यं न भल्लातकं हन्यात्+शीघ्रम्+अग्निबलप्रदम्॥81॥
वातातपविधाने+अपि विशेषेण विवर्जयेत्।
कुलत्थदधिशुक्तानि तैलाभ्यङ्गाग्निसेवनम्॥83॥
वृक्षास्तुवरका नाम पश्चिमार्णवतीरजाः।
वीचीतरङ्गविक्षोभमारुतोद्धूतपल्लवाः॥84॥
तेभ्यः फलानि+आददीत सुपक्वान्यम्बुदागमे।
मज्ज्ञः फलेभ्यः+च+आदाय शोषयित्वा+अवचूर्ण्य च॥85॥
तिलवत् पीडयेत्+ द्रोण्यां, क्वाथयेत्+वा कुसुम्भवत्।
तत्तैलं सम्भृतं भूयः पचेत्+आसलिलक्षयात्॥86॥
अवतार्य करीषे च पक्षमात्रं निधापयेत्।
स्निग्धस्विन्नः+ हृतमलः पक्षात्+उद्धृत्य तत्+ततः॥87॥
चतुर्थभक्तान्तरितः प्रातः पाणितलं पिबेत्।
मन्त्रेण+अनेन पूतस्य तैलस्य दिवसे शुभे॥88॥
"मज्जसार महावीर्यं सर्वान् धातून् विशोधय।
शङ्खचक्रगदापाणिः+त्वाम्+आज्ञापयते+अच्युतः॥89॥"
तेन+अस्य+ऊर्ध्वम्+अधस्तात्+च दोषा यान्ति+असकृत्+ततः।

सायम्+अस्नेहलवणां यवागूं शीतलां पिबेत्॥90॥
पञ्चाहानि पिबेत्+तैलम्+इत्थं वर्ज्यान् विवर्जयन्।
पक्षं मुद्गरसान्नाशी सर्वकुष्ठैः+विमुच्यते॥81॥
तत्+एव खदिरक्वाथे त्रिगुणे साधु साधितम्।
निहितं पूर्ववत्+पक्षं पिबेत्+मासं सुयन्त्रितः॥92॥
तेन+अभ्यक्तशरीरः+च कुर्वन्+आहारम्+ईरितम्।
[भिन्नस्वरं रक्तनेत्रं शीर्णाङ्गं कृमिभक्षितम्।]
अनेन+आशु प्रयोगेण साधयेत्+कुष्ठिनं नरम्॥93॥
सर्पिः+मधुयुतं पीतं तत्+एव खदिरात्+विना।
पक्षं मांसरसाहारं करोति द्विशतायुषम्॥94॥
तत्+एव नस्ये पञ्चाशद्दिवसानुपयोजितम्।
[वलीपलितनिर्मुक्तं स्थिरस्मृतिकचद्विजम्।]
वपुष्मतं श्रुतधरं करोति त्रिशतायुषम्॥95॥
पञ्चाष्टौ सप्त दश वा पिप्पलीः+मधुसर्पिषा।
रसायनगुणान्वेषी समाम्+एकां प्रयोजयेत्॥96॥
तिस्रः+तिस्रः+तु पूर्वाह्णे भुक्त्वा+अग्रे भोजनस्य च।
पिप्पल्यः किंशुकक्षारभाविता घृतभर्जिताः॥97॥
प्रयोज्या मधुसम्मिश्रा रसायनगुणैषिणा।
क्रमवृद्ध्या दशाहानि दशपैप्पलिकं दिनम्॥98॥
वर्धयेत्+पयसा सार्धं तथा+एव+अपनयेत्+पुनः।
जीर्णौषधः+च भुञ्जीत षष्टिकं क्षीरसर्पिषा॥99॥
पिप्पलीनां सहस्रस्य प्रयोगः+अयं रसायनम्।
पिष्टाः+ताः+ बलिभिः पेयाः शृता मध्यबलैः+नरैः॥100॥
[शीतीकृता हीनबलैः+वीक्ष्य दोषामयान् प्रति।]
तद्वत्+च छागदुग्धेन द्वे सहस्रे प्रयोजयेत्।
एभिः प्रयोगैः पिप्पल्यः कासश्वासगलग्रहान्॥101॥
यक्ष्ममेहग्रहण्यर्शः पाण्डुत्वविषमज्वरान्।
घ्नन्ति शोफं वमिं हिध्मां प्लीहानं वातशोणितम्॥102॥
बिल्वार्धमात्रेण च पिप्पलीनां पात्रं प्रलिम्पेत्+अयसः+ निशायाम्।
प्रातः पिबेत्+तत्+सलिलाञ्जलिभ्यां वर्षं यथेष्टाशनपानचेष्टः॥103॥
शुण्ठीविडङ्गत्रिफलागुडूचीयष्टीहरिद्रातिबलाबलाः+च।
मुस्तासुराह्वागुरुचित्रकाः+च सौगन्धिकं पङ्कजमुत्पलानि॥104॥

धवाश्वकर्णासनबालपत्रसाराः+तथा पिप्पलिवत् प्रयोज्याः।
लोहोपलिप्ताः पृथक्+एव जीवेत्+समाः शतं व्याधिजराविमुक्तः॥105॥
क्षीराञ्जलिभ्यां च रसायनानि युक्तानि+अमूनि+आयसलेपनानि।
कुर्वन्ति पूर्वोक्तगुणप्रकर्षम्+आयुःप्रकर्षं द्विगुणं ततः+च॥106॥
असनखदिरयूषैः+भावितां सोमराजीं मधुघृतशिखिपथ्यालोहचूर्णैः+उपेताम्।
शरदम्+अवलिहानः पारिणामान् विकारान्+त्यजति मितहिताशी तद्वदाहारजातान्॥107॥
तीव्रेण कुष्ठेन परीतमूर्तिः+यः सोमराजीं नियमेन खादेत्।
संवत्सरं कृष्णतिलद्वितीयां सः+ सोमराजीं वपुषा+अतिशेते॥108॥
ये सोमराज्या वितुषीकृतायाः+चूर्णैः+उपेतात् पयसः सुजातात्।
उद्धृत्य सारं मधुना लिहन्ति तक्रं तत्+एव+अनु पिबन्ति च+अन्ते॥109॥
कुष्ठिनः शीर्यमाणाङ्गाः+ते जाताङ्गुलिनासिकाः।
भान्ति वृक्षा इव पुनः प्ररूढनवपल्लवाः॥110॥
[शीतवातहिमदग्धतनूनां स्तब्धभग्नकुटिलव्यथितास्थ्नाम्।
भेषजस्य पवनोपहतानां वक्ष्यते विधिः+अतः+ लशुनस्य॥1॥]
राहोः+अमृतचौर्येण लूनाद्ये पतिता गलात्।
अमृतस्य कणा भूमौ ते रसोनत्वम्+आगताः॥111॥
द्विजा न+अश्नन्ति तमतः+ दैत्यदेहसमुद्भवम्।
साक्षात्+अमृतसम्भूतेः+ग्रामणीः सः+ रसायनम्॥112॥
शीलयेत्+लशुनं शीते, वसन्ते+अपि कफोल्बणः।
घनोदये+अपि वातार्तः, सदा वा ग्रीष्मलीलयाः॥113॥
स्निग्धशुद्धतनुः शीतमधुरोपस्कृताशयः।
तत्+उत्तंसावतंसाभ्यां चर्चितानुचराजिरः॥114॥
तस्य कन्दान् वसन्तान्ते हिमवत्+शकदेशजान्।
अपनीतत्वचः+ रात्रौ तिमयेत्+मदिरादिभिः॥115॥
तत्+कल्कस्वरसं प्रातः शुचितान्तवपीडितम्।
मदिरायाः सुरूढायाः+त्रिभागेन समन्वितम्॥116॥
मद्यस्य+अन्यस्य तक्रस्य मस्तुनः काञ्जिकस्य वा।
तत्+कालः+ एव वा युक्तं युक्तम्+आलोच्य मात्रया॥117॥
तैलसर्पिः+वसामज्जक्षीरमांसरसैः पृथक्।
क्वाथेन वा यथाव्याधि रसं केवलम्+एव वा॥118॥
पिबेत्+गण्डूषमात्रं प्राक् कण्ठनाडीविशुद्धये।
प्रततं स्वेदनं च+अनु वेदनायां प्रशस्यते॥119॥

शीताम्बुसेकः सहसा वमिमूर्च्छाययोः+मुखे।
शेषं पिबेत् क्लमापायः+ स्थिरतां गत ओजसि॥120॥
विदाहपरिहाराय परं शीतानुलेपनः।
धारयेत्+साम्बुकणिका मुक्ताकर्पूरमालिकाः॥121॥
कुडवः+अस्य परा मात्रा तत्+अर्धं केवलस्य तु।
पलं पिष्टस्य तन्मज्जः सभक्तं प्राक् च शीलयेत्॥122॥
जीर्णशाल्योदनं जीर्णे शङ्खकुन्देन्दुपाण्डुरम्।
भुञ्जीत यूषैः पयसा रसैः+वा धन्वचारिणाम्॥123॥
मद्यम्+एकः+ पिबेत्+तत्र तृट्प्रबन्धे जलान्वितम्।
अमद्यपः+तु+आरनालं फलाम्बु परिसिक्थकाम्॥124॥
तत्+कल्कं वा समघृतं घृतपात्रे खजाहतम्।
स्थितं दशाहात्+अश्नीयात्+तद्वत्+वा वसया समम्॥125॥
विकञ्चूकप्राज्यरसोनगर्भान् सशूल्यमांसान् विविधोपदंशान्।
निमर्दकान् वा घृतशुक्तयुक्तान् प्रकाममद्यात्+लघु तुच्छम्+अश्नन्॥126॥
पित्तरक्तविनिर्मुक्तसमस्तावरणावृते।
शुद्धे वा विद्यते वायौ न द्रव्ये लशुनात्+परम्॥127॥
प्रियाम्बुगुडदुग्धस्य मांसमद्याम्लविद्विषः।
अतितिक्षोः+अजीर्णं च रसोनः+ व्यापदे ध्रुवम्॥128॥
पित्तकोपभयात्+अन्ते युञ्ज्यात्+मृदु विरेचनम्।
रसायनगुणान्+एवं परिपूर्णान् समश्नुते॥129॥
ग्रीष्मे+अर्कतप्ता गिरयः+ जतुतुल्यं वमन्ति यत्।
हेमादिषड्धातुरसं प्रोच्यते तत्+शिलाजतु॥130॥
सर्वं च तिक्तकटुकं न+अत्युष्णं कटु पाकतः।
छेदनं च विशेषेण लौहं तत्र प्रशस्यते॥131॥
गोमूत्रगन्धि कृष्णं गुग्गुल्वाभं विशर्करं मृत्स्नम्।
स्निग्धम्+अनम्लकषायं मृदु गुरु च शिलाजतु श्रेष्ठम्॥132॥
व्याधिव्याधितसात्म्यं समनुस्मरन् भावयेत्+अयःपात्रे।
प्राक् केवलजलधौतं शुष्कं क्वाथैः+ततः+ भाव्यम्॥133॥
समगिरिजम्+अष्टगुणिते निःक्वाथ्यं भावनौषधं तोये।***************
तन्निर्यूहे+अष्टांशे पूतोष्णे प्रक्षिपेत्+ गिरिजम्॥134॥
तत्+समरसतां यातं संशुष्कं प्रक्षिपेत्+रसे भूयः।
स्वैः स्वैः+एवं क्वाथैः+भाव्यं वारान् भवेत्+सप्त॥135॥

अथ स्निग्धस्य शुद्धस्य घृतं तिक्तकसाधितम्।
त्र्यहं युञ्जीत गिरिजमेकैकेन तथा त्र्यहम्॥136॥
फलत्रयस्य यूषेण पटोल्या मधुकस्य च।
योगं योग्यं ततः+तस्य कालापेक्षं प्रयोजयेत्॥137॥
शिलाजम्+एवं देहस्य भवति+अत्युपकारकम्।
गुणान् समग्रान् कुरुते सहसा व्यापदं न च॥138॥
एकत्रिसप्तसप्ताहं कर्षमर्धपलं पलम्।
हीनमध्योत्तमः+ योगः शिलाजस्य क्रमान्मतः॥139॥
संस्कृतं संस्कृते देहे प्रयुक्तं गिरिजाह्वयम्।
युक्तं व्यस्तैः समस्तैः+वा ताम्रायोरूप्यहेमभिः॥140॥
क्षीरेणालोडितं कुर्यात्+शीघ्रं रासायनं फलम्।
कुलत्थान् काकमाचीं च कपोतान्+च सदा त्यजेत्॥141॥
न सः+अस्ति रोगः+ भुवि साध्यरूपः+ जत्वश्मजं यं न जयेत् प्रसह्य।
तत् कालयोगैः+विधिवत् प्रयुक्तं स्वस्थस्य च+उर्जां विपुलां दधाति॥141॥
कुटीप्रवेशः क्षणिनां परिच्छदवतां हितः।
अतः+अन्यथा तु ये तेषां सौर्यमारुतिकः+ विधिः॥143॥
वातातपसहा योगा वक्ष्यन्ते+अतः+ विशेषतः।
सुखोपचारा भ्रंशे+अपि ये न देहस्य बाधकाः॥144॥
शीतोदकं पयः क्षौद्रं घृतमेकैकशः+ द्विशः।
त्रिशः समस्तम्+अथवा प्राक् पीतं स्थापयेत्+वयः॥145॥
गुडेन मधुना शुण्ठ्या कृष्णया लवणेन वा।
द्वे द्वे खादन् सदा पथ्ये जीवेद्वर्षशतं सुखी॥146॥
हरीतकीं सर्पिषि सम्प्रताप्य समश्नतः+तत् पिबतः+ घृतं च।
भवेच्चिरस्थायि बलं शरीरे सकृत् कृतं साधु यथा कृतज्ञे॥147॥
धात्रीरसक्षौद्रसिताघृतानि हिताशनानां लिहतां नराणाम्।
प्रणाशमायान्ति जराविकारा ग्रन्था विशाला इव दुर्गृहीताः॥148॥
धात्रीकृमिघ्नासनसारचूर्णं सतैलसर्पिः+मधुलोहरेणु।
निषेवमाणस्य भवेत्+नरस्य तारुण्यलावण्यम्+अविप्रणष्टम्॥149॥****************
लौहं रजः+ वेल्लभवं च सर्पिःक्षौद्रद्रुतं स्थापितम्+अब्दमात्रम्।
समुद्गके बीजकसारक्लृप्ते लिहन् बली जीवति कृष्णकेशः॥150॥
विडङ्गभल्लातकनागराणि ये+अश्नन्ति सर्पिः+मधुसंयुतानि।
जरानदीं रोगतरङ्गिणीं ते लावण्ययुक्ताः पुरुषाः+तरन्ति॥151॥

खदिरासनयूषभावितायाः+त्रिफलाया घृतमाक्षिकप्लुतायाः।
नियमेन नरा निषेवितारः+ यदि जीवन्ति+अरुजः किमत्र चित्रम्॥152॥
बीजकस्य रसम्+अङ्गुलिहार्यं शर्करां मधु घृतं त्रिफलां च।
शीलयत्सु पुरुषेषु जरत्ता स्वागता+अपि विनिवर्ततः+ एव॥153॥
पुनर्नवस्य+अर्धपलं नवस्य पिष्टं पिबेत्+यः पयसा+अर्धमासम्।
मासद्वयं तत्+त्रिगुणं समां वा जीर्णः+अपि भूयः सः+ पुनर्नवः स्यात्॥154॥
मूर्वाबृहत्यंशुमतीबलानामुशीरपाठासनसारिवाणाम्।
कालानुसार्यागुरुचन्दनानां वदन्ति पौनर्नवम्+एव कल्पम्॥155॥
शतावरीकल्ककषायसिद्धं ये सर्पिः+अश्नन्ति सिताद्वितीयम्।
तान् जीविताध्वानम्+अभिप्रपन्नात्+न विप्रलुम्पन्ति विकारचौराः॥156॥
पीता+अश्वगन्धा पयसा+अर्धमासं घृतेन तैलेन सुखाम्बुना वा।
कृशस्य पुष्टिं वपुषः+ विधत्ते बालस्य सस्यस्य यथा सुवृष्टिः॥157॥
दिने दिने कृष्णतिलप्रकुञ्चं समश्नतां शीतजलानुपानम्।
पोषः शरीरस्य भवति+अनल्पः+ दृढीभवन्ति+आमरणात्+च दन्ताः॥158॥
चूर्णं श्वदंष्ट्रामलकामृतानां लिहन् ससर्पिः+मधुभागमिश्रम्।
वृषः स्थिरः शान्तविकारदुःखः समाः शतं जीवति कृष्णकेशः॥159॥
सार्धं तिलैरामलकानि कृष्णैः+अक्षाणि संक्षुद्य हरीतकीः+वा।
ये+अद्युः+मयूराः+ इव ते मनुष्या रम्यं परीणामम्+अवाप्नुवन्ति॥160॥
शिलाजतुक्षौद्रविडङ्गसर्पिः+लोहाभयापारदताप्यभक्षः।
आपूर्यते दुर्बलदेहधातुः+त्रिपञ्चरात्रेण यथा शशाङ्कः॥161॥
ये मासम्+एकं स्वरसं पिबन्ति दिने दिने भृङ्गरजःसमुत्थम्।
क्षीराशिनः+ते बलवीर्ययुक्ताः समाः शतं जीवितम्+आप्नुवन्ति॥162॥
मासं वचाम्+अपि+उपसेवमानाः क्षीरेण तैलेन घृतेन वा+अपि।
भवन्ति रक्षोभिः+अधृष्यरूपा मेधाविनः+ निर्मलमृष्टवाक्याः॥163॥
मण्डूकपर्णीम्+अपि भक्षयन्तः+ भृष्टां घृते मासम्+अनन्नभक्षाः।
जीवन्ति कालं विपुलं प्रगल्भाः+तारुण्यलावण्यगुणोदयस्थाः॥164॥
लाङ्गलीत्रिफलालोहपलपञ्चाशता कृतम्।
मार्कवस्वरसे षष्ट्या गुलिकानां शतत्रयम्॥165॥
छायाविशुष्कं गुलिकार्धम्+अद्यात् पूर्वं समस्ताम्+अपि तां क्रमेण।
भजेत्+विरिक्तः क्रमशः+च मण्डं पेयां विलेपीं रसकौदनं च॥166॥
सर्पिः स्निग्धं मासम्+एकं यतात्मा मासात्+ऊर्ध्वं सर्वथा स्वैः+अवृत्तिः।
वर्ज्यं यत्नात्+सर्वकालं तु+अजीर्णं वर्षेण+एवं योगम्+एव+उपयुञ्ज्यात्॥167॥

भवति विगतरोगः+ यः+अपि+असाध्यामयार्तः प्रबलपुरुषकारः शोभते यः+अपि वृद्धः।
उपचितपृथुगात्रश्रोत्रनेत्रादियुक्तः+तरुणः+ इव समानं पञ्च जीवेत्+शतानि॥168॥
गायत्रीशिखिशिंशिपासनशिवावेल्लाक्षकारुष्करान् पिष्ट्वा+अष्टादशसंगुणे+अम्भसि धृतान् खण्डैः सहायोमयैः।
पात्रे लोहमये त्र्यहं रविकरैः+आलोडयन् पाचयेत् अग्नौ च+अनु मृदौ सलोहशकलं पादस्थितं तत्+पचेत्॥169॥
पूतस्य+अंशः क्षीरतः+अंशः+तथा+अंशौ भार्ङ्गात्+निर्यासात्+ द्वौ वरायाः+त्रयोंऽशाः।
अंशाः+चत्वारः+च+इह हैयङ्गवीनादेकीकृत्य+एतत्साधयेत्+कृष्णलौहे॥170॥
विमलखण्डसितामधुभिः पृथक् युतम्+अयुक्तम्+इदं यदि वा घृतम्।
स्वरुचिभोजनपानविचेष्टितः+ भवति ना पलशः परिशीलयन्॥171॥
श्रीमान्+निर्धूतपाप्मा वनमहिषबलः+ वाजिवेगः स्थिराङ्गः केशैः+भृङ्गाङ्गनीलैः+मधुसुरभिमुखः+ न+एकयोषित्+निषेवी।
वाङ्मेधाधीसमृद्धः सुपटुहुतवहः+ मासमात्रोपयोगात्+ धत्ते+असौ नारसिंहं वपुः+अनलशिखातप्तचामीकराभम् ॥172॥
अत्तारं नारसिंहस्य व्याधयः+ न स्पृशन्ति+अपि।
चक्रोज्ज्वलभुजं भीता नारसिंहम्+इव+असुराः॥173॥
भृङ्गप्रवालान्+अमुना+एव भृष्टान् घृतेन यः खादति यन्त्रितात्मा।
विशुद्धकोष्ठः+असनसारसिद्धदुग्धानुपः+तत्+कृतभोजनार्थः॥174॥
मासोपयोगात् सः+ सुखी जीवति+अब्दशतत्रयम्।
गृह्णाति सकृत्+अपि+उक्तम्+अविलुप्तस्मृतीन्द्रियः॥175॥
अनेन+एव च कल्पेन यः+तैलम्+उपयोजयेत्।
तान्+एव+आप्नोति सः+ गुणान् कृष्णकेशः+च जायते॥176॥
उक्तानि शक्यानि फलान्वितानि युगानुरूपाणि रसायनानि।
महानुशंसानि+अपि च+अपराणि प्राप्त्यादिकष्टानि न कीर्तितानि॥177॥
रसायनविधिभ्रंशात्+जायेरन् व्याधयः+ यदि।
यथास्वम्+औषधं तेषां कार्यं मुक्त्वा रसायनम्॥178॥
सत्यवादिनमक्रोधमध्यात्मप्रवणेन्द्रियम्।
शान्तं सद्वृत्तनिरतं विद्यात्+नित्यरसायनम्॥179॥
गुणैः+एभिः समुदितः सेवते यः+ रसायनम्॥
सः+ निवृत्तात्मा दीर्घायुः परत्र+इह च मोदते॥180॥
शास्त्रानुसारिणी चर्या चित्तज्ञाः पार्श्ववर्तिनः।
बुद्धिः+अस्खलिता+अर्थेषु परिपूर्णं रसायनम्॥181॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने रसायनविधिः+नाम एकोनचत्वारिंशः+अध्यायः॥39॥
चत्वारिंशः+अध्ययाः।
अथ+अतः+ वाजीकरणविधिम्+अध्यायं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
वाजीकरणम्+अन्विच्छेत्+सततं विषयी पुमान्।
तुष्टिः पुष्टिः+अपत्यं च गुणवत्+तत्र संश्रितम्॥1॥
अपत्यसन्तानकरं यत्+सद्यः संप्रहर्षणम्।
वाजीवातिबलः+ येन याति+अप्रतिहतः+अङ्गनाः॥2॥
भवति+अतिप्रियः स्त्रीणां येन येन+उपचीयते।
तत्+वाजीकरणं तत्+हि देहस्य+ऊर्जस्करं परम्॥3॥
धर्म्यं यशस्यम्+आयुष्यं लोकद्वयरसायनम्।
अनुमोदामहे ब्रह्मचर्यम्+एकान्तनिर्मलम्॥4॥
अल्पसत्वस्य तु क्लेशैः+बाध्यमानस्य रागिणः।
शरीरक्षयरक्षार्थं वाजीकरणम्+उच्यते॥5॥
कल्यस्य+उदग्रवयसः+ वाजीकरणसेविनः।
सर्वेषु+ऋतुषु+अहरहः+व्यवायः+ न निवार्यते॥6॥
अथ स्निग्धविशुद्धानां निरूहान् सानुवासनान्।
घृततैलरसक्षीरशर्कराक्षौद्रसंयुतान्॥7॥
योगवित्+योजयेत्+पूर्वं क्षीरमांसरसाशिनाम्।
ततः+ वाजीकरान् योगान् शुक्रापत्यबलप्रदान्॥8॥
अच्छायः पूतिकुसुमः फलेन रहितः+ द्रुमः।
यथा+एकः+च+एकशाखः+च निरपत्यः+तथा नरः॥9॥
स्खलद्गमनम्+अव्यक्तवचनं धूलिधूसरम्।
अपि लालाविलमुखं हृदयाह्लादकारकम्॥10॥
अपत्यं तुल्यतां केन दर्शनस्पर्शनादिषु।
किं पुनः+यत्+यशोधर्ममानश्रीकुलवर्धनम्॥11॥
शुद्धकाये यथाशक्ति वृष्ययोगान् प्रयोजयेत्।
शरेक्षुकुशकाशानां विदार्या वीरणस्य च॥12॥
मूलानि कण्टकार्याः+च जीवकर्षभकौ बलाम्।
मेदे द्वे द्वे च काकोल्यौ शूर्पपर्ण्यौ शतावरीम्॥13॥
अश्वगन्धाम्+अतिबलाम्+आत्मगुप्तां पुनर्नवाम्।
वीरां पयस्यां जीवन्तीम्+ऋद्धिं रास्नां त्रिकण्टकम्॥14॥
मधुकं शालिपर्णीं च भागाः+त्रिपलिकान् पृथक्।
माषाणाम्+आढकं च+एतत्+ द्विद्रोणे साधयेत्+अपाम्॥15॥
रसेनाढकशेषेण पचेत्+तेन घृताढकम्।

दत्त्वा विदारीधात्रीक्षुरसानाम्+आढकाढकम्॥16॥
घृतात्+चतुर्गुणं क्षीरं पेष्याणि+इमानि च+आवपेत्।
वीरां स्वगुप्तां काकोल्यौ यष्टी फल्गूनि पिप्पलीम्॥17॥
द्राक्षां विदारीं खर्जूरं मधुकानि शतावरीम्।
तत्+सिद्धपूतं चूर्णस्य पृथक् प्रस्थेन योजयेत्॥18॥
शर्करायाः+तुगायाः+च पिप्पल्याः कुडवेन च।
मरिचस्य प्रकुञ्चेन पृथक्+अर्धपलोन्मितैः॥19॥
त्वगेलाकेसरैः श्लक्ष्णैः क्षौद्रद्विकुडवेन च।
पलमात्रं ततः खादेत् प्रत्यहं रसदुग्धभुक्॥20॥
तेन+अरोहति वाजीव कुलिङ्ग इव हृष्यति।
विदारीपिप्पलीशालिप्रियालेक्षुरकात्+रजः॥21॥
पृथक् स्वगुप्तामूलात्+च कुडवांशं तथा मधु।
तुलार्धं शर्कराचूर्णात् प्रस्थार्धं नवसर्पिषः॥22॥
सः+अक्षमात्रम्+अतः खादेत् यस्य रामाशतं गृहे।
सात्मगुप्ताफलान् क्षीरे गोधूमान् साधितान् हिमान्॥23॥
माषान् वा सघृतक्षौद्रान् खादन् गृष्टिपयः+अनुपः।
जागर्ति रात्रिं सकलाम्+अखिन्नः खेदयन् स्त्रियः॥24॥
बस्ताण्डसिद्धे पयसि भावितान्+असकृत्+तिलान्।
यः खादेत्+ससितान् गच्छेत्+सः+ स्त्रीशतम्+अपूर्ववत्॥25॥
चूर्णं विदार्या बहुशः स्वरसेन+एव भावितम्।
क्षौद्रसर्पिः+युतं लीढ्वा प्रमदाशतम्+ऋच्छति॥26॥
कृष्णाधात्रीफलरजः स्वरसेन सुभावितम्।
शर्करामधुसर्पिर्भिः+लीढ्वा यः+अनु पयः पिबेत्॥27॥
स नरः+अशीतिवर्षः+अपि युवा+इव परिहृष्यति।
कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम्॥28॥
पयः+अनुपानं यः+ लिह्यात्+नित्यवेगः सः+ ना भवेत्।
कुलीरशृङ्ग्या यः कल्कम्+आलोड्य पयसा पिबेत्॥29॥
सिताघृतपयोन्नाशी सः+ नारीषु वृषायते।
यः पयस्यां पयः सिद्धां खादेत्+मधुघृतान्विताम्॥30॥
पिबेत्+बाष्कयणं च+अनु क्षीरं न क्षयम्+एति सः।
स्वयंगुप्तेक्षुरकयोः+बीजचूर्णं सशर्करम्॥31॥
धारोष्णेन नरः पीत्वा पयसा रासभायते।

उच्चटाचूर्णम्+अपि+एवं शतावर्याः+च योजयेत्॥32॥
चन्द्रशुभ्रं दधिसरं ससिताषष्टिकौदनम्।
पटे सुमार्जितं भुक्त्वा वृद्धः+अपि तरुणायते॥33॥
श्वदंष्ट्रेक्षुरमाषात्मगुप्ताबीजशतावरीः।
पिबन् क्षीरेण जीर्णः+अपि गच्छति प्रमदाशतम्॥34॥
यत्+किञ्चित्+मधुरं स्निग्धं बृंहणं बलवर्धनम्।
मनसः+ हर्षणं यत्+च तत्+सर्वं वृष्यम्+उच्यते॥35॥
द्रव्यैः+एवं+विधैः+तस्मात्+दर्पितः प्रमदां व्रजेत्।
आत्मवेगेन च+उदीर्णः स्त्रीगुणैः+च प्रहर्षितः॥36॥
सेव्याः सर्वेन्द्रियसुखा धर्मकल्पद्रुमाङ्कुराः।
विषयातिशयाः पञ्च शराः कुसुमधन्वनः॥37॥
इष्टा हि+एकैकशः+अपि+अर्था हर्षप्रीतिकराः परम्।
किं पुनः स्त्रीशरीरे ये सङ्घातेन प्रतिष्ठिताः॥38॥
नाम+अपि यस्या हृदयोत्सवाय  यं पश्यतां तृप्तिः+अनाप्तपूर्वा।
सर्वेन्द्रियाकर्षणपाशभूता कान्तानुवृत्तिव्रतदीक्षिता या॥39॥
कलाविलासाङ्गवयोविभूषा शुचिः सलज्जा रहसि प्रगल्भा।
प्रियंवदा तुल्यमनःशया या सा स्त्री वृषत्वाय परं नरस्य॥40॥
आचरेत्+च सकलां रतिचर्यां कामसूत्रविहितामनवद्याम्।
देशकालबलशक्यनुरोधात्+वैद्यतन्त्रसमयोक्त्यविरुद्धाम्॥41॥
अभ्यञ्जनोद्वर्तनसेकगन्धस्रक्चित्रवस्त्राभरणप्रकाराः।
गान्धर्वकाव्यादिकथाप्रवीणाः समस्वभावा वशगा वयस्याः॥42॥
दीर्घिका स्वभवनान्तनिविष्टा पद्मरेणुमधुमत्तविहङ्गा।
नीलसानुगिरीकूटनितम्बे काननानि पुरकण्ठगतानि॥43॥
दृष्टिसुखा विविधा तरुजातिः श्रोत्रसुखः कलकोकिलनादः।
अङ्गसुखर्तुवशेन विभूषा चित्तसुखः सकलः परिवारः॥44॥
ताम्बूलम्+अच्छमदिरा कान्ता कान्ता निशा शशाङ्काङ्का।
यत्+यत्+च किञ्चित्+इष्टं मनसः+ वाजीकरं तत्+तत्॥45॥
मधु मुखम्+इव सोत्पलं प्रियायाः कलरणना परिवादिनी प्रिया+इव।
कुसुमचयमनोरमा च शय्या किसलयिनी लतिका+इव पुष्पिताग्रा॥46॥
देशे शरीरे च न काचित्+अर्तिः+अर्थेषु न+अल्पः+अपि मनोविघातः।
वाजीकराः सन्निहिताः+च योगाः कामस्य कामं परिपूरयन्ति॥47॥
मुस्तापर्पटकं ज्वरे, तृषि जलं मृद्भृष्टलोष्टोद्भवं,

लाजाश्छर्दिषु, बस्तिजेषु गिरिजं, मेहेषु धात्रीनिशे।
पाण्डौ श्रेष्ठमयः+अभया+अनिलकफे, प्लीहामये पिप्पली,
सन्धाने कृमिजा, विषे शुकतरुः+मेदोनिले गुग्गुलुः॥48॥
वृषः+अस्रपित्ते, कृटजः+अतिसारे, भल्लातकः+अर्शःसु, गरेषु हेम।
स्थूलेषु ताक्ष्यं, क्रिमिषु कृमिघ्नं, शोषे सुरा छागपयः+अथ मांसम्॥49॥
अक्ष्यामयेषु त्रिफला, गुडूची वातास्ररोगे, मथितं ग्रहण्याम्।
कुष्ठेषु सेव्यः खदिरस्य सारः, सर्वेषु रोगेषु शिलाह्वयं च॥50॥
उन्मादं घृतम्+अनवं, शोकं मद्यं, व्यपस्मृतिं ब्राह्मी।
निद्रानाशं क्षीरं जयति, रसाला प्रतिश्यायम्॥51॥
मांसं कार्श्यं, लशुनः प्रभञ्जनं, स्तब्धगात्रता स्वेदः।
गुडमञ्जर्याः खपुरः+ न स्यात् स्कन्धांसबाहुरुजम्॥52॥
नवनीतखण्डमर्दितम्+औष्ट्रं मूत्रं पयः+च हन्ति+उदरम्।
नस्यं मूर्धविकारान्, विद्रधिम्+अचिरोत्थम्+अस्रविस्रावः॥53॥
नस्यं कवलः+ मुखजान्, नस्याञ्जनतर्पणानि नेत्ररुजः।
वृद्धत्वं क्षीरघृते, मूर्च्छां शीताम्बुमारुतच्छायाः॥54॥
समशुक्तार्द्रकमात्रा मन्दे वह्नौ, श्रमे सुरा स्नानम्।
दुःखसहत्वे स्थैर्ये व्यायामः+, गोक्षुरो+हितः कृच्छ्रे॥55॥
कासे निदिग्धिका, पार्श्वशूले पुष्करजा जटा।
वयसः स्थापने धात्री, त्रिफला गुग्गुलुर्व्रणे॥56॥
बस्तिः+वातविकारान्, पैत्तान् रेकः, कफोद्भवान् वमनम्।
क्षौद्रं जयति बलासं, सर्पिः पित्तं, समीरणं तैलम्॥57॥
इति+अग्र्यं यत्+प्रोक्तं रोगाणाम्+औषधं शमायालम्।
तद्देशकालबलतः+ विकल्पनीयं यथायोगम्॥58॥
इति+आत्रेयात्+आगमय्य+अर्थसूत्रं तत्+सूक्तानां पेशलानाम्+अतृप्तः।
भेडादीनां सम्मतः+ भक्तिनम्रः पप्रच्छ+इदं संशयानः+अग्निवेशः॥59॥
दृश्यन्ते भगवन् केचित्+आत्मवन्तः+अपि रोगिणः।
द्रव्योपस्थातृसम्पन्नां वृद्धवैद्यमतानुगाः॥60॥
क्षीयमाणामयप्राणाः+ विपरीताः+तथा+अपरे।
हिताहितविभागस्य फलं तस्मात्+अनिश्चितम्॥61॥
किं शास्ति शास्त्रम्+अस्मिन् इति कल्पयतः+अग्निवेशमुख्यस्य।
शिष्यगणस्य पुनः+वसुः+आचख्यौ कात्स्न्र्यतः+तत्त्वम्॥62॥
न चिकित्सा+अचिकित्सा च तुल्या भवितुम्+अर्हति।

विना+अपि क्रियया स्वास्थ्यं गच्छतां षोडशांशया॥63॥
आतङ्कपङ्कमग्नानां हस्तालम्बः+ भिषग्जितम्।
जीवितं म्रियमाणानां सर्वेषाम्+एव न+औषधात्॥64॥
न हि+उपायम्+अपेक्षन्ते सर्वे रोगाः+, न च+अन्यथा।
उपायसाध्याः सिध्यन्ति, न+अहेतुः+हेतुमान् यतः॥65॥
यत्+उक्तं सर्वसम्पत्तियुक्तया+अपि चिकित्सया।
मृत्युः+भवति, तत्+न+एवं न+उपाये+अस्ति+अनुपायता॥66॥
आपि च+उपाययुक्तस्य धीमतः+ जातुचित् क्रिया।
न सिध्येत्+दैववैगुण्यात्+न तु+इयं षोडशात्मिका॥67॥
कस्य+असिद्धः+अग्नितोयादिः स्वेदस्तम्भादिकर्मणि।
न प्रीणनं कर्षणं वा कस्य क्षीरं गवेधुकम्॥68॥
कस्य माषात्मगुप्तादौ वृष्यत्वे न+अस्ति निश्चयः।
विण्मूत्रकरणाक्षेपौ कस्य संशयितौ यवे॥69॥
विषं कस्य जरां याति मन्त्रतन्त्रविवर्जितम्।
कः प्राप्तः कल्यतां पथ्यात्+ऋते रोहिणिकादिषु॥70॥
अपि च+अकालमरणं सर्वसिद्धान्तनिश्चितम्।
महता+अपि प्रयत्नेन वार्यतां कथम्+अन्यथा॥71॥
चन्दनादि+अपि दाहादौ रूढम्+आगमपूर्वकम्।
शास्त्रात्+एव गतं सिद्धिं ज्वरे लङ्घनबृंहणम्॥72॥
चतुष्पाद्गुणसम्पन्ने सम्यक्+आलोच्य योजिते।
मा कृथा व्याधिनिर्घातं विचिकित्सां चिकित्सिते॥73॥
एतत्+हि मृत्युपाशानाम्+अकाण्डे छेदनं दृढम्।
रोगोत्त्रासितभीतानां रक्षासूत्रम्+असूत्रकम्॥74॥
एतत्+तत्+अमृतं साक्षात्+जगदायासवर्जितम्।
याति हालाहलत्वं तु सद्यः+ दुर्भाजनस्थितम्॥75॥
अज्ञासशास्त्रसद्भावान् शास्त्रमात्रपरायणान्।
त्यजेत्+दूरात्+ भिषक्पाशान् पाशान् वैवस्वतानिव॥76॥
भिषजां साधुवृत्तानां भद्रम्+आगमशालिनाम्।
अभ्यस्तकर्मणां भद्रं भद्रं भद्राभिलाषिणाम्॥77॥
इति तन्त्रगुणैः+युक्तं तन्त्रदोषैः+विवर्जितम्।
चिकित्साशास्त्रम्+अखिलं व्याप्यं यत् परितः स्थितम्॥78॥
विपुलामलविज्ञानमहामुनिमतानुगम्।

महासागरगम्भीरसङ्ग्रहार्थोपलक्षणम्॥79॥

अष्टाङ्गवैद्यकमहोदधिमन्थनेन यः+अष्टाङ्गसङ्ग्रहमहामृतराशिः+आप्तः।

तस्मात्+अनल्पफलम्+अल्पसमुद्यमानां प्रीत्यर्थम्+एतत्+उदितं पृथक्+एव तन्त्रम्॥80॥

इदम्+आगमसिद्धत्वात्+प्रत्यक्षफलदर्शनात्।

मन्त्रवत्संप्रयोक्तव्यं न मीमांस्यं कथञ्चन॥81॥

दीर्घजीवितम्+आरोग्यं धर्मम्+अर्थं सुखं यशः।

पाठावबोधानुष्ठानैः+अधिगच्छति+अतः+ ध्रुवम्॥82॥

एतत्+पठन् सङ्ग्रहबोधशक्तः स्वभ्यस्तकर्मा भिषगप्रकम्प्यः।

आकम्पयति+अन्यविशालतन्त्रकृताभियोगान् यदि तत्+न चित्रम्॥83॥

यदि चरकम्+अधीते तत्+ ध्रुवं सुश्रुतादिप्रणिगदितगदानां नाममात्रे+अपि बाह्यः।

अथ चरकविहीनः प्रक्रियायाम्+अखिन्नः किम्+इव खलु करोतु व्याधितानां वराकः॥84॥

अभिनिवेशवशात्+अभियुज्यते सुभणिते+अपि न यः+ दृढमूढकः।

पठतु यत्नपरः पुरुषायुषं स खलु वैद्यकम्+आद्यम्+अनिर्विदः॥85॥

वाते पित्ते श्लेष्मशान्तौ च पथ्यं तैलं सर्पिः+माक्षिकं च क्रमेण।

एतत्+ ब्रह्मा भाषतां ब्रह्मजः+ वा का निर्मन्त्रे वक्तृभेदोक्तिशक्तिः॥86॥

अभिधातृवशात् किंवा द्रव्यशक्तिः+विशिष्यते।

अतः+ मत्सरम्+उत्सृज्य माध्यस्थ्यम्+अवलम्ब्यताम्॥87॥

ऋषिप्रणीते प्रीतिः+चेत्+मुक्त्वा चरकसुश्रुतौ।

भेडाद्याः किं न पठ्यन्ते तस्मात्+ग्राह्यं सुभाषितम्॥88॥

हृदयम्+इव हृदयम्+एतत्+सर्वायुर्वेदवाङ्मयपयोधेः।

कृत्वा यत्+शुभम्+आप्तं शुभम्+अस्तु परं ततः+ जगतः॥89॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां षष्ठे उत्तरस्थाने वाजीकरणविधिः+नाम चत्वारिंशः+अध्यायः॥40॥

समाप्तं च+इदं षष्ठम्+उत्तरस्थानम्।

समाप्ता+इयम्+अष्टाङ्गहृदयसंहिता।